623

व्यवहार मयूख:

Vyavahāra Mayookha : Title

Nilkantha Bhatta : Author

: Editor

: Year, Vols.

: Publisher

623 : Remarks

॥ श्रीगणेशाय नमः ॥ ॥ श्रीसवित्रे नमः ॥ उत्क्रान्तपनयरीतिं नत्वा नास्वत्पदांबुजं सम्यक् ॥ विरचयति नी
लकंठो व्यवहारविनिर्णयो किंचि ॥ १ ॥ द्विजराजैकमूर्द्धन्यदृषाध्यक्षश्रिवान्वितम् ॥ कारपोसवोपिदेष्टारं ना
वये शंकरं गुरुं ॥ २ ॥ विरोधिमार्गद्दयेदर्शनार्थं द्वैधावत्तुवात्र परः पुमान्यः ॥ श्रीशंकरो नहइहैकरूपो मी
मांसकाद्वैतगुरीचकारा ॥ ३ ॥ वतारकै रादृतमत्रकिंचिन्मयातु निर्मूलतया तदुज्झितम् ॥ उतोक्तिता नेन हि
तेन कापि त्वपुष्पहीनापचितिर्निहीयते ॥ ४ ॥ विप्रतिपद्यमाननरांतरगता ज्ञाता धर्मज्ञापनानुकूलो
व्यापारो व्यवहारः ॥ वादिप्रतिवादिकर्तृकः संभवे श्रोगसाक्षिप्रमाणविरोधिको दिव्यवस्थापनानुकू
लो वाव्यापारः स ॥ संप्रतिपत्फलरेतु व्यवहारपदप्रयोगो नास्ति इति मदनरत्ने ॥ वादवितंडादिव्यावृत्त्यर्थमुत्र
स्थलं ॥ अथ तत्पदं याज्ञवल्क्यः ॥ स्मृत्याचारव्यपेतेन मार्गेण धर्षितः परैः ॥ आवेदयति पश्चाज्ञे व्यवहार
पदं हि तत् ॥ आधर्षितस्तिरतिक्रात्यायनोक्तेः ॥ मनुः ॥ व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सहपा ॥ कृतः तस्या रामः
ष्टादशा नोदानाहमनुः ॥ तेषामाद्यमृणादानं निक्षेपोस्वामिविक्रयः ॥ संभूयवसमुत्थानं दत्तस्यानपक ॥ ४६२ ॥

र्म च चेतनस्यैव चादानं संविदश्च व्यतिक्रमः ॥ क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥ सीमाविवादधर्म
श्च पारुष्ये दंडवाचिके स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥ स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वयमेव च
पदान्यष्टादशैतानि व्यवहारस्थिता विहेति ॥ अनपकर्माप्रदानं ॥ अनुशयः पश्चात्तापः ॥ द्यूतमप्राणिकरणि
का क्रीडा ॥ प्राणिकरणिका समाह्वयः ॥ अत्र मनुष्पदंडपारुष्याणां साहसभेदत्वेपि पृथङ्निर्देशो गोबलीव
र्दन्यायेन ॥ एतेषां चाष्टादशपदानां स्वरूपमग्रे व्यक्तीकरिष्यते ॥ अथ व्यवहारमातृका ॥ बृहस्पतिः ॥ दुर्ग
मध्ये गृहं कुर्याज्जलवृक्षान्वितं पृथक् ॥ प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत्सभां ॥ सैव च धर्माधि
करणं धर्मशास्त्रविचारेण सारासारविवेचनाय यत्राधिक्रियते तस्थाने धर्माधिकरणं हि तदिति कात्यायनो
क्तेः ॥ मनुः ॥ व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ॥ मंत्रज्ञैर्मंत्रिभिश्चैव विनीतः प्रविशेत्सभां ॥ विनीतवेषा
भरणः पश्येत्कार्याणि कार्यिणां ॥ याज्ञवल्क्यः ॥ व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह ॥ धर्मशास्त्रानुसा
रेण क्रोधलोभविवर्जितः ॥ नृपः प्रजापालनाधिकृतो यः कश्चित् न क्षत्रिय एव ॥ कात्यायनः ॥ सप्राड्विवाक

व्य·म·
॥२॥ सामात्यः सब्राह्मणपुरोहितः॥ सभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः॥ अत्र ब्राह्मणो नियुक्तः सभ्यो ऽनियु
क्तः॥ तथा चोक्तं॥ नियुक्तो वा ऽनियुक्तो वा धर्मज्ञो वक्तुमर्हतीति॥ प्राड्विवाकस्वरूपमाह बृहस्पतिः॥ विवादे पृच्छति
प्रश्नं प्रतिप्रश्नं तथैव च॥ प्रिय पूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृत इति॥ अमात्यस्वरूपमाह व्यासः॥ सर्वशास्त्र
प्रवीणाश्च कुलीनान्यायभाषिणः॥ विप्रप्राड्विवाकमायातम ममात्यस्थापयेद्द्विजमिति॥ अत्र पुनर्द्विजग्रहणं विप्रा
भावे क्षत्रियवैश्ययोरुपादानार्थं॥ तथा च कात्यायनः॥ यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्॥ वैश्यं वा ध
र्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् इति॥ सभ्यानाह याज्ञवल्क्यः॥ श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः॥ राज्ञा
सभासदः कार्या रिपौ मित्रे च ये समा इति॥ एतेषां संख्यामाह बृहस्पतिः॥ लोकवेदज्ञधर्मज्ञाः सप्त पंच त्रयोपि वा
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभेति॥ शाब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची॥ नानालिपिज्ञौ कर्त्तव्यौ
राज्ञा गणकलेखकौ॥ शब्दः शब्दशास्त्रं अभिधानं कोशः॥ कात्यायनः॥ श्रोतारो वणिजस्तत्र कर्त्तव्या न्यायद
र्शिनः॥ तत्र सभायां॥ बृहस्पतिः॥ आकारगोरक्षणे चसमाद्स्पर्धि प्रतिवादिनां॥ सभ्याधीनः सत्यवादी कर्त्तव्यस्तु राम·
॥४६॥

स्वरूपः॥ अयं च शूद्र एव॥ तथा च व्यासः॥ साध्यपालस्तु कर्त्तव्यो राज्ञा साध्यप्रसाधकः॥ क्रमायातो दृ
ढः शूद्रः समर्थानां च मते स्थित इति॥ याज्ञवल्क्यः॥ अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु॥ सभ्यैः सह नि
योक्तव्यो ब्राह्मणः सर्वधर्मवित्॥ नृपाध्यक्षादीनां कार्यमाह बृहस्पतिः॥ वक्ताध्यक्षो नृपः शास्ता स
भ्याः कार्यपरीक्षकाः॥ गणको गणयेदर्थं लिखेन्न्यायं च लेखकः॥ स एव पूर्वाभिमुखस्तूपविशेद्राजा सभ्यास्तदभिमु
खाः॥ गणकः पश्चिमास्यस्तु लेखको दक्षिणामुखः॥ राजसभातो निर्णयकर्तॄनाह याज्ञवल्क्यः॥ नृपेणा
धिकृताः पूगाः श्रेणयोथ कुलानि च॥ पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणां॥ नृपेणाधिकृताः प्राड्विवाका
दयः॥ पूगाः नानाकर्मोपजीविनां विजातीयानां समूहाः॥ पूगास्तु नानाकर्मोपजीविनां विजातीयविपरीताश्च
श्रेणयः॥ कुलानि ज्ञातिसंबंधिबंधूनां समूहाः॥ बृहस्पतिरपि॥ येवारण्यचरास्तेषामरण्ये करणं भवेत्
सेनायां सैनिकानां तु सार्थेषु वणिजां तथा॥ करणं सभा॥ व्यवहारदर्शने कालमाह कात्यायनः॥ सभ्यास्था
नेषु पूर्वाह्णे कार्यसंनिर्णयं नृपः॥ कुर्याच्छास्त्रप्रणीतेन मार्गेण मित्रकर्षणः॥ दिवसस्याष्टमं भागं मुक्त्वा का

गत्रयं तु यत् स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृत इति ॥ छायायामायां ऊर्द्ध्वमष्टमो भाग मत उत्तरमावर्त्तना
त्प्राचीनं भागत्रयं वर्ज्यमिति पीयूषः ॥ आह संवर्त्तः ॥ चतुर्दश्यष्टमी अमावास्या पौर्णमासी तथाष्टमीति पि चास्तु न तैषु
व्यवहारान्विचक्षण इति ॥ बृहस्पतिः ॥ सर्वान्वितामधिष्ठाय वर्णाश्रमानुजो विभिः ॥ पश्येप्सुराणां धर्मार्थशा
स्त्राणि श्रृणुयात्तथा ॥ तांसनां ॥ अर्थशास्त्रं नीतिशास्त्रं ॥ धर्मशास्त्रार्थशास्त्रयोर्विप्रतिपत्तावाह नारदः ॥ यत्र वि
प्रतिपत्तिः स्यात् धर्मशास्त्रार्थशास्त्रयोः ॥ अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेदिति ॥ धर्मशास्त्रयो
र्विरोधे त्वाह याज्ञवल्क्यः ॥ स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः ॥ न्यायमनालोचयतो दोषमाह बृहस्प
तिः ॥ केवलं शास्त्रमाश्रित्य न कर्त्तव्यो हि निर्णयः ॥ युक्तिहीने विचारे तु धर्महानिः प्रजायत इति देशाचाराद्यप्य
लोचयेदित्याह बृहस्पतिः ॥ देशजातिकुलानां च ये धर्माः प्राक्प्रवर्त्तिताः ॥ तथैव ते पालनीयाः प्रजा प्रक्षुभ्य
तेन्यथा ॥ जनापरक्तिर्भवति बलं कोशश्च नरपतिः ॥ उद्व्हते दाक्षिणात्यैर्मातुलस्य सुतो द्विजैः ॥ मध्यदेशे क
र्मकराः शिल्पिनश्च गवाशिनः ॥ मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः ॥ उत्तरे मद्यपा नार्यः स्पृश्या नृणां

रजस्वला ॥ अनेन कर्मणा नैते प्रायश्चित्तदमार्हका इति ॥ पूर्वे प्राच्याः ॥ कचित्सर्वइति पाठः ॥ सर्वे ब्रास्त
णाद्यः ॥ दमो दंड यस्तत्प्रायश्चित्तादिस्मरणं तदेतद्व्यवस्थानुपातदेशं परं मितिकेत ॥ अन्ये तु प्रायश्चि
त्तरूपो यो दम इति व्याचक्षते दण्डमात्रं ॥ अन्ये देशो दंडः प्रायश्चित्तं चेत्याहुः ॥ व्यासः ॥ वणिक्शि
ल्पिप्रभृतेषु कृषिरंगोपजीविषु ॥ अशक्यो निर्णयो ह्यन्यैस्तज्जैरेव तु कारयेत् ॥ मनुः ॥ आश्रमेषु द्वि
जातीनां कार्ये विवदतां मिथः ॥ न विब्रूयान्नृपो धर्मं चिकीर्षन् हितमात्मन इति ॥ कात्यायनः ॥ काले कार्या
र्थिनं पृच्छेत्प्रणतं पुरतः स्थितं ॥ किं कार्यं का च ते पीडा मा भैषीर्ब्रूहि मानव ॥ केन कस्मिन्कदा कस्मात्पृच्छेदेवं
समागतं ॥ एवं पृष्टः स यद्ब्रूयात्तत्सभ्यैर्ब्राह्मणैः सह ॥ विचार्य कार्यं न्याय्यं चेदाह्वानार्थमतः परं ॥ मुद्रां वा
निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत् ॥ नारदः ॥ वक्तव्येर्थे ह्यतिष्ठंतमुत्क्रामंतं च तद्वचः ॥ आसेधयेद्विवा
दार्थी यावदाह्वानदर्शनं ॥ आसेधस्य चातुर्विध्यमाह स एव ॥ स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा
चतुर्विधः स्यादासेधस्तमासिद्धो न लंघयेत् ॥ आसिद्धस्यासेधातिक्रमे दंडमाह स एव ॥ आसेधयोग्ये आसि

ग्र.म.
॥४॥ द्द्धाक्रामन्दंडमर्हतीति क्वचिदासेधे चरेव दंडमाह स एव॥ यस्त्विंद्रियनिरोधसनासनादिभिः॥ आसेधयेदनासेध्यं स दं
ड्यो न त्वतिक्रमादिति॥ क्वचिदासेधातिक्रमे दंडाभावमाह नारदः॥ नदीसंतारदुर्देशोपप्लवादिषु॥ आसिद्धस्तं परा
सेधमुत्क्रामन्नापराधुयादिति॥ अनासेध्यानासेधे दंडमाह कात्यायनः॥ आसेधपसनासेधं राज्ञा शास्य
इति स्थितिरिति॥ अनासेध्यानाह स एव॥ वृक्षपर्वतारूढा हस्त्यश्वरथनौस्थिताः॥ विषमस्थाश्च ते सर्वे
नासेध्याः कार्यसाधकैः॥ व्याध्यार्ता व्यसनस्थाश्च यजमानास्तथैव च॥ अकल्पबालस्थविरविषमस्थक्रि
याकुलाः॥ कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलाः॥ मत्तोन्मत्तप्रमत्तार्त्तभृत्यानाह्वानयेन्नृपः॥
न हीनपक्षां युवतिं कुलेजातां प्रसूतिकां॥ सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः॥ तदधीनकुटुंबिन्यः स्वै
रिण्यो गणिकाश्च याः॥ निष्कुला याश्च पतितास्तासामाह्वानमिष्यते॥ ज्ञात्वातियोगं येपि स्युर्वनेषु प्रव्रजिता
दयः॥ तानप्याह्वानयेद्राजगुरुकार्येष्वकोपयन्॥ कालं देशं च विज्ञाय कार्याणां च बलाबलं॥ अकल्या राम:
दीनामपि यानैः शनैराह्वानयेन्नृपः॥ व्यापैरिति क्वचित्पाठः॥ आहूतो नागच्छन् दंड्यः॥ तथा च बृहस्पतिः॥ ॥४६५॥

॥ आहूतोप्यनागच्छेद्दर्पाद्बंधुबलान्वितः॥ अभियोगानुरूपेण तस्य दंडं प्रकल्पयेत्॥ अभियोगभेदेन दं
डभेदमाह कात्यायनः॥ हीनेकर्मणि पंचाशन्मध्यमे तु शतावरः॥ गुरुकार्येषु दंड्यः स्यान्नित्यं पंचशतावर
इति॥ आहूतस्यागमे नेयत्कार्यं तदाह पितामहः॥ सभायाः पुरतः स्थाप्यो नियोज्यो वादिना तथेति॥ तथा या
सहार्थे कात्यायनः॥ ततोर्थी योक्ताः प्रब्रूयादनियुक्तस्त्वनंतरं॥ तयोरन्ये सदस्यास्तु प्राड्विवाकस्ततः प
रं॥ बृहस्पतिः॥ अर्थं पूर्विकया याचेत्प्रसमर्थीनीयदा दंडोवणानुरूपेण ग्राह्यः पाडामवेक्ष्य वा॥ अप्रगल्भजडो
न्मत्तवृद्धस्त्रीबालरोगिणां॥ पूर्वोत्तरं वदेद्बंधुर्नियुक्तोन्यथवा नरः॥ नारदः॥ अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहि
तोपि वा॥ योयस्यार्थे विवदते तयोर्जयपराजयौ॥ यत्तु कात्यायनः॥ योन भ्राता न च पिता न पुत्रो न नियोगकृत्
परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुवन्निति तदनियुक्तपरं॥ क्वचित्प्रतिनिधिर्नावनेनैवोक्तः॥ ब्रह्महत्यासु
रापाने स्तेये गुर्वंगनागमे॥ मनुष्यमारणे स्तेये परदाराभिमर्शने॥ अभक्ष्यभक्षणे चैव कन्याहरणदूषणे॥ पा
रुष्ये कूटकरणे नृपद्रोहे तथैव च॥ प्रतिवादी न दातव्यः कर्ता तु विवदेत्स्वयमिति॥ व्यत्यस्ते कप्रति नि

व्य·म·

॥५॥

मिनिषेध्यार्थं तु नस्तेयग्रहणं ॥ प्रत्यर्थिनिरुक्षापिते ऽर्थिना कार्यमाह ॥ याज्ञवल्क्यः ॥ प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदि
तमर्थिना ॥ समामासतदर्द्धाहर्नामजात्यादिचिह्नितं ॥ स्मृत्यंतरे ॥ अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलं ॥ सा
ध्यवद्वाचकपदं प्रकृतार्थानुबंधि च ॥ प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमं ॥ संक्षिप्तं लिखितार्थं च देशकाल
विरोधि च ॥ वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत् ॥ स्थानावसथसाध्याख्याजात्याकारवयोयुतं ॥ साध्यप्रमा
णसंख्याचदात्मप्रत्यर्थिनामवत् ॥ परात्मपूर्वजानेकराजनामभिरंकितं ॥ क्षमालिंगात्मपीडावत्कथिताह
र्तृदायकं ॥ यदावेदयते राज्ञे तद्भाषेत्यभिधीयता इति ॥ अत्रोक्तवर्षादीनां ऋण्यादिषूपयोगो वक्ष्यते ॥ देशादीनां
च क्वाचिदुपयोग उक्तः स्मृत्यंतरे ॥ देशश्चैव तथा स्थानं संनिवेशस्तथैव च ॥ जातिसंज्ञाधिवासश्च प्रमाणं क्षेत्रना
म च ॥ पितृपैतामहं चैव पूर्वराजानुकीर्तनं ॥ स्थावरेषु विवादेषु दशैतानि निवेशयेत् ॥ इति कात्यायनः ॥ पूर्वप
क्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ॥ पांडुलेखेन फलके ततः पत्रे विशोधितं ॥ शोधनस्यावधिमाह नारदः ॥ शो
धयेत्पूर्ववादं तु यावन्नोत्तरदर्शनं ॥ अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत् ॥ नाषायानुत्तरं यावत्तत्स्यान

रा·म·

॥४६॥

निवेशयेत् ॥ अपर्यं तु लेखयेत्तावद्यावद्वस्तु विवक्षितमिति ॥ एवं पक्षलक्षणोक्तितेन विरुद्धा ॥ पक्षाभासा अप्र
सिद्धाद्युक्ताः ॥ स्मृत्यंतरे ॥ अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनं ॥ असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जये
दिति ॥ अप्रसिद्धं खपुष्पं ममापहृतमिति ॥ निराबाधं मम दीपप्रकाशेनायं व्यवहरतीति ॥ निरर्थकं च टंट
न पं ममापहृतमिति ॥ निःप्रयोजनं मत्प्रातिवेशिकः सुस्वरमधीत इति ॥ असाध्यं सत्त्वनंगहसितोनेनेत्यादि ॥
विरुद्धं मूकेनाहं शप्त इति ॥ पुरराष्ट्रादिविरुद्धं च तथा च स्मर्यते ॥ राज्ञा तु वर्जितो यस्तु यश्च पौरविरोधकृत ॥
राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च ॥ अन्ये वा ये पुरग्रामे महाजनविरोधकाः ॥ अनादेयास्तु ते सर्वे व्यव
हाराः प्रकीर्तिता इति ॥ चानेकप्रतिज्ञत्वामपि पक्षाभासत्वमिति ॥ बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितं ॥
कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति कात्यायनीयेन विरोधापत्तेः ॥ यत्त्वनेकपदसंकीर्णः पूर्व
पक्षो न सिध्यतीति तत्क्रमपक्षासिध्यति क्रमेण तु सिध्यतीति व्याख्येयः ॥ एवं पूर्वपक्षे लिखिते यत्कार्यं तदाह
याज्ञवल्क्यः ॥ श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधाविति ॥ उत्तरं जल्पयति नारदः ॥ पक्षस्याव्यापकं सा

व्य.म.
।।६।।

रमसंदिग्धमनाकुलं। अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति। अस्य चातुर्विध्यमाह कात्यायनः। मिथ्यासं
प्रतिपत्त्या वा प्रत्यवस्कंदनेन वा। प्राङ्न्यायप्रतिसिद्ध्या वा उत्तरं स्याच्चतुर्विधमिति। मिथ्योत्तरं च लक्षय
ति स एव। अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवं मिथ्या तत्तु विजानीयादुत्तरं व्यवहारत इति। तच्च चतु
र्विधमित्याह स एव। मिथ्यैतन्नाभिजानामि तदा मत्र न संनिधिः। अजातश्चास्मि तत्काल मिथ्या चतुर्विधेति
संप्रतिपत्त्युत्तरं तूक्तं स्मृत्यंतरे। साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृतेति। प्रत्यवस्कंदनोत्तरं लक्षयति ना
रदः। अर्थिना लिखितो योऽर्थः प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूयात्प्रत्यवस्कंदनं स्मृतमिति। प्राङ्न्यायो
त्तरं लक्षयति कात्यायनः। आचारेणावसन्नोऽपि पुनर्लेखयते यदि। सोऽभियोज्यो जितः पूर्वं प्राङ्न्यायस्तु स उ
च्यत इति। एवमुत्तरलक्षणोक्त्येतेतरद्धितानामुत्तराभासत्वमर्थसिद्धमपि स्पष्टतस्मृत्यंतरे। संदिग्धम
न्यत्प्रकृताद्वत्यल्पमतिभूरि च। पक्षैकदेशव्याप्यन्न तथा नैवोत्तरं भवेत्। यद्व्यस्तपदमव्यापि निगूढार्थं
तथाकुलं। व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये इति कात्यायनोऽपि। पक्षैकदेशे यत्सत्यमेकदेशे च का

राम:
।४६७।

रणं। मिथ्या चैवैकदेशे च संकरात्तदनुत्तरमिति। अनुत्तरत्वे च कारणमाह स एव। न चैकस्मिन्विवादे तु
क्रियास्याद्वादिनोर्द्वयोः। न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति। अत्रायमर्थः। मिथ्याकारणोत्तरयोः
संकरे द्वयोरपि वादिनोः क्रिया प्राप्नोति मिथ्याक्रिया पूर्ववादे कारणे प्रतिवादिनीति नारदोक्तेः। तच्च न
मेकस्मिन्व्यवहारे विरुद्धं। तथा कारणप्राङ्न्यायसंकरे तु प्रत्यर्थिन एव क्रियाद्वयं प्राङ्न्यायकारणोक्ता
नु प्रत्यर्थी निर्दिशेत्क्रियामिति व्यासोक्तेः। अत्र च प्राङ्न्याये जयपत्रेण प्राड्विवाकादिभिस्त्वेति व्यासोक्तेनैव
जयपत्रेण प्राङ्न्यायदर्शिभिर्वा भावयितव्यं। कारणोत्तरे तु साक्षिलेख्यादिभिरिति नात्रापि विरोधः। एवं त्रि
चतुःसंकरेऽपि द्रष्टव्यं। एषां वानुत्तरत्वेन यौगपद्येन। क्रमेणोत्तरत्वमेव। क्रमश्चार्थिप्रत्यर्थिसमीक्षया भवति
तथा च हारीतः। मिथ्योत्तरं कारणं च स्यातामेकत्र चेदुभे। सत्यं वापि सहान्येन तत्र ग्राह्यं किमुत्तरं। प्रभूत
तार्थविषयं यत्र वा स्यात्क्रियाफलं। उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा। संकीर्णं निवर्ततातिशेषः। अस्या
र्थः। सुवर्णं वर्णवस्त्राभियोगे सुवर्णं न गृहीतं वस्त्रं तु गृहीतं प्रतिदत्तं चेत्यत्रादौ वस्तुवर्णविषये व्यवहारे

स्य वस्त्राद्यस्त्र विषयेव व्यवहर्तव्यं॥ एवं मिथ्याप्राङ्न्याययोः कारणप्राङ्न्याययोश्च संकरे योज्यं॥ तथा तत्रैवाभि
योगेषु वस्त्रं गृहीतं वस्त्रं तु न गृहीतं प्रतिदत्तमिति वा वस्त्रविषये पूर्वं जितइति वाच्यते तत्र वस्त्रविषय एव व्य
वहर्तव्यं न तु वस्त्रविषयान्तरविषयत्वेपि क्रियावात्॥ यत्र त्वियं गोमदीयासु कस्मिन्कालेनष्टास्याद्य गृहे दृ
ष्टेत्यभियोगे मिथ्यैतदेतत्प्रदर्शितिकालात्पूर्वमेवास्मद्गृहे स्थितेति मिथ्याकारणयो॥ कृत्स्नपक्षव्यापि
त्वतत्र नानुत्तरत्वं सकारणमिथ्योत्तरमिदं॥ अत्र च प्रत्यर्थिन एव क्रिया नार्थिनोपि मिथ्याकारणयोर्वापिया
द्य कारणानुत्तरमिति हारीतोक्तेः॥ एवं मिथ्याप्राङ्न्याययोः कारणप्राङ्न्याययोश्च कृत्स्नपक्षव्यापित्वे सति ना
नुत्तरत्वं॥ अत्रोभयत्रापि प्रत्यर्थिन एव क्रियेति न क्वाप्येकस्मिन्व्यवहारे द्वयोः क्रियेत्यलं॥ उत्तरलेखनोत्त
रं साधनोक्तेः क्रममाह याज्ञवल्क्यः॥ ततोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनं॥ तत्सिद्धौ सिद्धिमाप्नो
ति विपरीतमतोन्यथेति॥ इदं च मिथ्योत्तरविषयं॥ उत्तरांतरेषु प्रत्यर्थिन एव साधनोपन्यासः॥ तथा च हारी रामः
तः॥ प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियां॥ मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति एवं व्यव ॥४६६॥

हारस्य चातुष्पात्वमाह याज्ञवल्क्यः॥ चतुष्पाद्व्यवहारोयं विवादेषूपदर्शितइति॥ पादचतुष्टयं तु स्पष्टीकृतं
स्मृत्यंतरे॥ भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः॥ आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयतइति
इदं च संप्रतिपत्त्यतिरिक्तोत्तरविषयं॥ संप्रतिपत्तौ द्विपात्वात्॥ यथाह बृहस्पतिः॥ मिथ्योत्तरे चतुष्पात्स्यात्प्र
त्यवस्कंदने तथा॥ व्यवहारस्त्रि विज्ञेयो द्विपात्संप्रतिपत्तिष्विति याज्ञवल्क्यः॥ अभियोगमनिस्तीर्य नैनं प्रत्य
भियोजयेत्॥ अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत्॥ कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च॥ ना
रदः॥ पूर्ववादं परित्यज्य योन्यमालंबते पुनः॥ वादसंक्रमणात्ज्ञेयो हीनवादी स वै नरः॥ हीनवादी दंड्यो न भवति
न प्रकृतादर्थाद्धीयत इत्यर्थः॥ एतच्चार्थव्यवहारे ज्ञेयं॥ यथाह स एव॥ सर्वेष्वर्थविवादेषु वाक्छलेनावसी
दति॥ परस्त्रीभूम्यृणादाने शास्योप्यर्थान्न हीयतइति॥ याज्ञवल्क्यः॥ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववा
दिनः॥ पूर्वपक्षेधरीभूते भवंत्युत्तरवादिनः॥ पूर्ववादिनः प्रतिज्ञायते इति॥ पूर्वपक्षप्रतिज्ञा अधरीभूते का
रणोत्तरोपन्यासेन प्रत्यर्थि स्वीकारेण साध्ये साक्षिणः प्रमाणांतरस्याप्युपलक्षणार्थं स एवाह नयोः

व्य॰म॰

॥८॥ प्रतिभूर्ग्राह्यःसमर्थःकार्यनिर्णये निर्णयस्य कार्यं कार्यनिर्णय इति॥ प्रतिभूत्वेनाग्राह्यानाह कात्यायनः॥ न
स्वामी न च वैरी तु स्वामिनाधिकृतस्तथा॥ निरुद्धो दंडितश्चैव संशयस्थो न च क्वचित्॥ नैव रिक्थी न रिक्त
श्च न चैवात्यन्तवासित॥ राजकार्यनियुक्तश्च ये च प्रव्रजिता नरः॥ नाशक्तो धनिने दातुं दंडं राज्ञे च तत्समं॥
नाविज्ञातो गृहीतव्यः प्रतिभूस्तत्क्रियां प्रति इति॥ रिक्थी दरिद्रः याज्ञवल्क्यः॥ भ्रातॄणामथ दंपत्योः पितुःपुत्र
स्य चैव हि प्रातिभाव्यमृणं साक्ष्यं अविभक्ते न तु स्मृतं॥ लग्नकाभावे त्वाह कात्यायनः॥ अथ चेत्प्रतिभूर्ना
स्ति कार्ययोग्यस्तु वादिनः॥ स रक्षितो दिनस्यांते दद्याद्भृत्याय वेतनमिति॥ स एव द्विजातिः प्रतिभूहीनो रक्षः
स्याद्बाह्यचारिभिः॥ शूद्रादीन् प्रतिभूहीनान् बंधयेन्निगडेन त्विति॥ हीनवादिलक्षणमाह नारदः॥ सर्ववा
दं परित्यज्य योन्यमालंबते पुनः॥ वादसंक्रमणात् ज्ञेयो हीनवादी स वै नरः॥ दुष्टलक्षणमाह याज्ञवल्क्यः॥ दे
शांतं देशांतरं याति सृक्किणी परिलेढि वा॥ ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च॥ परिशुष्यत्स्ख रामः
लद्वाक्यो विरुद्धं बहु भाषते॥ वाक्चक्षुः पूजयति नो ष्ठौ निर्भुजत्यपि स्वभावाद्विकृतिं गच्छेन्मनोवाक्का ॥धर्म्यं॥

यकर्मभिः॥ अभियोगे च साक्ष्ये वा दुष्टः स परिकीर्तितः॥ सृक्किणी ओष्ठप्रांतौ॥ अथ प्रमाणनिरूपणं॥ याज्ञवल्क्यः
॥ प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं॥ एषामन्यतमाभावे दिव्यान्यतममुच्यते॥ कात्यायनोपि॥ यद्ये
को मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीं॥ मानुषीं तत्र गृह्णीयान्नतु दैवीं क्रियां नृपः॥ यद्येकदेशव्याप्तापि क्रिया
विद्येत मानुषी॥ सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणां॥ क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु॥ ले
ख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः॥ पूगश्रेणिगणादीनां या स्थितिः परिकीर्तिता॥ तस्यास्तु साधनं लेख्यं
न दिव्यं न च साक्षिणः॥ दत्तादत्ते तथा दत्ते स्वामिनो निर्णये सति॥ विक्रयादान संबंधे क्रीत्वा धनमनिच्छति॥ द्यूते स
माह्वये चैव विवादे समुपस्थिते॥ साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकं॥ द्वारमार्गक्रियाभोगजलवाहा
दिके तथा भुक्तिरेव हि गुर्वी स्यान्न लेख्यं न च साक्षिणः॥ क्वचिद्दिव्यप्राबल्यमाह बृहस्पतिः॥ मणिमुक्ताप्रवाला
नां कूटकृन्न्यासहारकः॥ हिंसको न्यांगनासेवी परीक्ष्याः शपथैः सदा॥ महापापाभिशापेषु विद्यमानेषु साक्षि
षु॥ दिव्यमालंबते वादी न पृच्छेत्तत्र साक्षिण इति व्यासः॥ न मयैतत्कृतं लेख्यं कूटमेतेन कारितं॥ अधरीकृत्य तत्पत्रम

र्यदिव्येन निर्णयः॥ अरण्ये विजने रात्रावंतर्वेश्मनि साहसे। न्यासापह्नवने चैव दिव्या संभवति क्रिया॥ बृहस्प
ति। लिखिते साक्षिवादे च संदिग्धं यत्र जायते। अनुमाने च संभ्रांते तत्र दिव्यं विशोधनं॥ क्वचित्साक्षिदिव्ययो
विकल्पमाह स एव॥ पक्षांते साहसे वादे पारुष्ये दंडवाचके। बलोद्भूतेषु कार्येषु साक्षिणो दिव्यमेव च॥ का
णे लेख्यं मा साक्षिणो वा युक्तिलेखादयो पि वा। दैविकीं वा क्रियां ब्रूयान्न प्रजानां हितकाम्यया इति युक्तिलेख्ययोर्युक्तो
कदेशः। वाचिके पारुष्ये ब्रह्महासाद्येवमाद्याक्रोशात्मके इत्पर्थः। यत्तु कात्यायनः। वाक्पारुष्ये न मोच-
दिव्यं न परिकल्पयेदिति॥ तद्वाक्पारुष्यपरं न मिश्रत्वपास्थावरमात्रोपलक्षणं। यथाह पितामहः स्था
वरेषु विवादेषु दिव्यानि परिवर्जयेदिति साक्ष्यादिसत्वेऽयं दिव्यनिषेधः। तथा च स एव। साक्षिभिर्लिखितेना
र्थेतु तथा चैतान्न साधयेदिति स एव॥ लेख्यं यत्र न विद्येत न युक्तिर्न च साक्षिणः। न च दिव्यावतारोस्ति प्रमा
णं तत्र पार्थिवः॥ निश्चेतुं येन शक्याः स्युर्वादाः संदिग्धरूपिणः। तेषां न्यायप्रमाणं तत्र पार्थिवः॥ निश्चेतुं येन
शक्याः स्युर्वादाः संदिग्धरूपिणः। तेषां नृप प्रमाणं स्यात्स सर्वस्य प्रभुर्यतः॥ अथ लेख्यं। बृहस्पतिः राज

लेख्यं स्थानकृतं स्वहस्तलिखितं तथा। लेख्यं तु त्रिविधं प्रोक्तं भिन्नं तद्बहुधा पुनः॥ इति। यत्तु वसिष्ठेन लौकिकं
राजकीयं च लेख्यं विद्याद्विचक्षणः। इति द्वैविध्यमुक्तं तत्स्थानकृतस्य हस्तलिखितयोर्भेदमाश्रित्य लौ
किकं जानपदमिति पर्यायौ। राजकीयं जानपदं लिखितं द्विविधं स्मृतमिति संग्रहोक्तेः॥ बृहस्पतिः॥ भाग
धानसंविद्दासऋणादिभिः सप्तधा लौकिकं लेख्यं त्रिविधं राजशासनं॥ भ्रातरः संविभक्ता ये स्वरुच्या
तु परस्परं। विभागपत्रं कुर्वंति भागलेख्यं तदुच्यते। भूमिं दत्वा तु यत्पत्रं कुर्याच्चंद्रार्कसाक्षिकं। अनाच्छेद्य
मनाहार्यं दानलेख्यं तु तद्विदुः। गृहक्षेत्रादिकं क्रीत्वा तत्तुल्यमूल्याक्षरान्वितं। पत्रं कारयते यत्तु क्रयलेख्यं
तदुच्यते। जंगमं स्थावरं बद्ध्वा लेख्यं करोति यत्। गोप्यभोग्यक्रियायुक्तमाधिलेख्यं तदुच्यते॥ ग्रामो देश
श्च यत्कुर्यात्मतं लेख्यं परस्परं। राजाविरोधिधर्मार्थं संवित्पत्रं वदंति तत्॥ वस्त्रान्नहीनः कांतारे लिखितं कु
रुते तु यत्। कर्माणि ते करिष्यामि दासपत्रं तदुच्यते। धनं वृद्ध्या गृहीत्वा तु स्वयं कुर्याच्च कारयेत्। उद्धा
रपत्रं तत्प्रोक्तं ऋणलेख्यं मनीषिभिः। आदिशब्दाच्छुद्ध्यादिपत्रग्रहणं। विशुद्धिपत्रमाह कात्यायनः॥

आनिवेशयेत्स्वमुद्रां स्थिपाय स्थिते कृते जने । विशुद्धिपत्रकं ज्ञेयं तेभ्यः साक्षिसमन्वितं उत्तमेषु समस्तेषु अभि
शापे समागते । वृत्तानुवादलेख्यं यत्तत् ज्ञेयं संधिपत्रकं । सामाविवादे निर्णीते सीमापत्रं विधीयते इति
अन्वाधियात्रमाह प्रजापतिः । धनाधनेन तेनैव परमाधिनये यदि । कृत्वा तदाधिलिखितं पूर्वं चाप्यसम
र्पयेत् । याज्ञवल्क्योपि । दत्वर्णं पाटयेल्लेख्यं शुद्धै वान्यत्तु कारयेत् । पूर्वोक्तयोः स्वहस्तकृतान्यकृतयो विशे
षमाह नारदः । लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा । असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति
याज्ञवल्क्यः । विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् । तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते । ब
लं बलात्कारं उपधिर्लोभादिविशेषमाह सएव । यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परं । लेख्यं तु साक्षिम
त्कार्यं तस्मिन् धनिकपूर्वकं । समामासतदर्धाहर्नामजातिस्वगोत्रकैः । सब्रह्मचारिकात्मीयपितृनामादिचि
ह्नितमिति । सब्रह्मचारिके बह्वृचादिशाखाप्रयुक्तं गुणनाम बह्वृचः कठ इत्यादि । सएवासमाप्तेर्थे ऋणी ना
मस्वहस्तेन निवेशयेत् । मतमेमुकपुत्रस्य यदत्रोपरिलेखितं । साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकं

अत्राहममुकः साक्षी लिखेयुरिति ते समाः । उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना । लिखितं ह्यमुकेनेति
लेखकोन्ते ततो लिखेत् । समाः संख्याताः गुणतश्च । कचिद्दसमाइत्याकारप्रश्लेषः । नारदः । अलिपिज्ञ
ऋणी यः स्यात् स्वमतं तु स लेखयेत् । साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः । त्रिविधं राजशासनमित्यु
क्तं हर्षयतो याज्ञवल्क्यः । बृहस्पतिः दत्वा भूमिं निबंधं वा कृत्वा लेख्यं तु कारयेत् । आगामिभद्रनृपति
परिज्ञानाय पार्थिवः । यद्वा ताम्रपटे वस्त्रे जे परिचिह्नितं । अभिलेख्यात्मनो वंश्यानात्मानं च महीप
तिः । प्रतिग्रहपरिमाणं दानच्छेदोपवर्णनं । स्वहस्तकालसंपन्नं शासनं कारयेत्स्थिरं । निबंधः आकराद्दे
राजादिर्नियतलब्धं । प्रतिग्रहते यत् प्रतिग्रहो भूम्यादि तस्य राजा लिखितेन यच्छति सेवाशौर्यादि
ना तुष्टः प्रसादलिखितं तु तत् । पूर्वोत्तरक्रियावादनिर्णयांते यदा नृपः । प्रदद्याज्जयिने लेख्यं जयपत्रं त
दुच्यते इति राज्ञोनुकल्पमाह व्यासः । राज्ञा तु स्वयमादिष्टः संधिविग्रहलेखकः । ताम्रपट्टे पटे वापि
प्रलिखेद्राजशासनं । अत्र चराज्ञा स्वयमादिष्टः संधिविग्रहलेखकः । ताम्रपट्टे पटे वापि प्रलिखेद्राज

व्य.म:

॥१२॥

शासनं। अत्र च राज्ञा स्वमतं लेख्यमित्याह स एव। संनिवेशं प्रमाणं च स्वहस्तेन लिखेत्स्वयं। मतं मे मुकपुत्र
स्यामुकस्य महीपतेः। संनिवेशं प्रमाणं चेति पूर्ववाक्येनान्वयः। वसिष्ठस्तु राजलेख्यं चतुर्विधमाह शा
सनं प्रथमं ज्ञेयं जयपत्रं तथापरं। आज्ञाप्रज्ञापनापत्रे राजकीयं चतुर्विधं। सामंतेष्वथ भृत्येषु राष्ट्रपाला
दिकेषु च। कार्यमादिश्यते येन तदाज्ञापत्रमुच्यते। ऋत्विक्पुरोहिताचार्यमान्येष्वभ्यर्हितेषु तु। कार्यं
निवेद्यते येन पत्रं प्रज्ञापनाय तत्॥ शासनजयपत्रे प्रागुक्ते। याज्ञवल्क्यः देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे
तथा हृते। भिन्ने दग्धे तथा छिन्ने लेख्यमन्यत्तु कारयेत्। नारदः लेख्ये देशांतरे न्यस्ते शीर्णे दुर्लिखिते हृते
सतस्तत्कालकरणमसतो दृष्टदर्शनं। द्रष्टारः साक्षिणस्तदभावे दिव्यं। अलेख्यसाक्षिके दैवी व्यवहारे
विनिर्दिशेदिति। कात्यायनोक्तेः याज्ञवल्क्यः संदिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः। युक्तिप्राप्ति
क्रियाचिह्नसंबंधागमहेतुभिः। युक्तिरर्थोपपत्तिः प्राप्तिर्द्वयोरेकत्रावस्थानं क्रिया साक्ष्यादि चिह्नं मुद्रा
दि संबंधोऽनागतः आगमः संभावितः प्राप्त्युपायः हेतुरनुमानं प्रजापते प्रजापतिः। कार्योपलेन राम:

॥४७२॥

महता निरापी राजशासने। राज्ञां स्वहस्ततो मुद्रालेखकाक्षरदर्शनात्। दुष्टलेख्यान्याह बृहस्पतिः मुमूर्षु
त्रास्तु भीतार्तस्त्रीमत्तव्यसनातुरैः। निशोपधिबलात्कारकृतं लेख्यं न सिध्यति। दूषितो यद्धि साक्षी पत्रे
को विनिवेशितः। कूटलेख्यं तु तत्प्रोक्तं लेखको वापि तद्विध इति। अथ भुक्तिः। नारदः। आगमेन विशु
द्धेन भोगो याति प्रमाणतां। अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति। सागमस्त्ववच्छिन्नो पर्णांतरे वै॥ त्रिपु
मप्याह व्यासः सागमो दीर्घकालश्चाविच्छेदोपरवोज्झितः। प्रत्यर्थिसंनिधानश्च पंचांगो भोग इष्यते। भुक्तिमा
त्रेण साध्यामि हि माह नारदः। संभोगं केवलं यस्तु कीर्तयेन्नागमं क्वचित्। भोगच्छलापदेशेन विज्ञेयः स
तु तस्कर इति। इदं चागमस्मरणयोग्ये काले ज्ञेयं। तदयोग्ये तु भुक्तिमात्रमपि प्रमाणमित्याह स एव।
स्मार्तेकाले क्रियाभूमेः सागमा भुक्तिरिष्यते। अस्मार्तेप्यागमाभावस्मरणेनुष्ठत्वावाह स एव। अनाग
मं तु यो भुंक्ते बहून्यब्दशतान्यपि। चौरदंडेन तं पापं दंडयेत्पृथिवीपतिरिति। यत्तु स एव। अन्यायेनापि
यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः। न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतमिति तदागमस्मरणे विनाप्यन्यायेनापि

ब.म.

॥१२॥

पमित्रासद्भूर्वतरैस्त्रिभिर्नुक्तेन ययाद्भुत्तं न ग्राह्यं किंतु नरागमाभावनिश्चयासंभव इति योज्यं। यदपि
हारीतायाः। यद्विनागमम त्यंतं भुक्तं पूर्वैस्त्रिभिर्भवेत्। न च तच्छक्यमपहर्तुं क्रमात्त्रिपुरुषंगमि
तितद्दत्ततोपलभ्यमानागमं विनेति व्याख्येयान्त्वागमस्वरूपं विनेति। यत्तु नर्याज्ञवल्क्यीये। आ
गमस्तु कृतोयेनसोभियुक्तस्तमुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसीति। तदागमक
र्तुरेवागमानुद्धारे दंडो न तत्सुतादीनामपत्येवं परा। न त्वर्थसिद्धिरिति यथा हारीतः। आगमस्तु कृता
येन सं दंडमाप्तमनुद्धरन्। न तत्सुतस्तत्सुतो वा भोगपदनि तयोरपीति। याज्ञवल्क्यः। योभियुक्तः परेत
स्य रिक्थी तमुद्धरेत्। न तत्र कारणं भुक्तिरागमेन विना कृता रिक्थी चेत्तथागमयुक्तामिति मागमं। ननु दीर्घ
काले भोग प्रमाणमिति यदुक्तं तत्कथं। स्वल्पकालोपभोगे माध्यनियोक्ता हानिप्रतीतेः यथाह स एव। पश्य
तोब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी। परेण भुज्यमानाया धनस्य दशवार्षिकी ति उच्यते एतत्तत्र रामः
नृपतौ प्रतिषेध तत्तावत्कालीन भोगेतद्भूम्यादिजमन्यफलहानिर्भवं तीतं वं परंपरं। ननु तद्भूम्यादिव ।४७अ

स्तु हानिरपीति। अनागमं तु या भुंक्ते तु इत्यादि वचनविरोधात्। कात्यायनः। नोपभोगो बलं कार्यमाह
र्तासुतेन वा। पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थितः। नारदः। आधिः सीमा बालधनं निक्षेपोपनि
धिः स्त्रियः। राजस्वं श्रोत्रियस्वं च। नोपभोगेन नश्यति। मनुः। संप्रीत्या भुज्यमानानि न नश्यंति कदाचन। धेनु
रूपो यह। रवो यश्च दम्य प्रयुज्यते। दम्य प्रयुज्यते दमनार्थं यास मर्प्यते। अथ साक्षिणः। टोडरानंदेना
रादः। संदिग्धेषु तु कार्येषु द्वयोर्विवदमानयोः। दृष्टश्रुतानुभूतत्वात्साक्षिभ्यो व्यक्तदर्शनं। तद्भेदानाह
स्मृतिः। लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ। सा दृच्छिकश्चोत्तरश्च कार्यमध्यगतोपरः। नृपोध्यक्ष
:स्तथा ग्रामसाक्षी द्वादशायाः स्मृताः। यत्र निवेशितो लिखितो नाम यथोद्देशेण यानि वेशितो लेखितः।
उ आदिव्यवधानेन श्रावितो गूढः। पुनः पुनः कार्यं स्मार्यमाणः स्मारितः यदृच्छये वागतः साक्षिक्रिय
माणो या दृच्छिकः। श्रवणाच्छ्रावणाद्वा साक्षिणामपृष्ठपरिभाषमाण उत्तरः। अध्यक्षः प्राड्विवाक इदं
च सभ्यादीनामुपलक्षणं। लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः इति कात्यायनवाक्यात्। सए

व्य॰म॰ वजवसमंपं चवास्तुअवतारस्त्रयएववा। उभौवाश्रोत्रियौप्राह्यौ नैकं पृच्छेत्कदाचन लिखितौ द्वौतथा॥द्वौत्रि
॥२३॥ चतुःपंचषड्लिखिता। यदृच्छास्मारिताऽत्युक्त्याप्तयाचोत्तरसाक्षिणः। इतका। खटिकायाह। कार्यमध्यग
तत्त्वपाः एकएवप्रमाणंस्यान्नृपोध्यक्षस्तथैवच॥ लिखितादीनामुभयानुमतत्वेएकस्यापिग्रहणमाह
याज्ञवल्क्यः। उभयानुमतःसाक्षी भवेदेकोपिधर्मवित्। व्यासः। शुचिक्रियाश्चधर्मज्ञःसाक्षियस्त्वनुभूतवा
क्प्रमाणमेकोपिभवेत्साहसेषुविशेषतः। अनुभूतवाक्यायोदृष्टसत्यवचनः निक्षेपादिष्वनाप्रमध्ये
कमाह कात्यायनः। अभ्यंतरस्थनिक्षेपे साक्ष्यमेकोपिवाच्यते अर्थिनाप्रहितःसाक्षी भवेदेकोपियाचितया
चितंविवाह्ययथैनीतंमान्तरणादिकं। कुंडलादिपएपविवादेप्येकमाह स एवासंस्कृतंयेनयत्प्रएपंतत्तेनै
वविभावयेत्। एकएवप्रमाणमविचारेतत्रकानिति। तेषांचस्वरूपमाह व्यासः। धर्मज्ञाःपुत्रिणोमौला
कुलीनाःसत्यवादिनः। श्रौतस्मार्तक्रियायुक्ता विगतद्वेषमत्सराः। श्रोत्रियानपदाधीनास्सरपूर्व्यात्मवा रामः
सिनः युवानःसाक्षिणःकार्याःऋणादिषुविजानता॥ नारदः। श्रेणीषुश्रेणीपुरुषाःस्वेषुवर्गेषुवर्गिणः ॥४७४॥

बहिर्वासिषुबाह्यास्तु स्त्रियस्त्रीषुचसाक्षिणः। वर्गिणआह कात्यायनः। लिंगिनःश्रेणिपूगाश्चवणिग्जातास्त
थापरे। समूहस्थाश्चयेचान्येवर्गास्तानप्रवीज्नुः। दासचारणमल्लानांहस्त्यश्वरथजीविनां। प्रत्येकै
कसमूहानांनायकावर्गिणःस्मृताः। विजातीयानप्याह याज्ञवल्क्यः। अवराःसाक्षिणोज्ञेयाःश्रौतस्मार्तक्रिया
पराः। यथाजातियथावर्णंसर्वेसर्वेषुवास्मृताः। वर्ज्यानप्याह स एव। स्त्रीबालवृद्धकितवमत्तोमत्ताभिशस्तका
रंगावतारिपाखंडिकूटकृद्विकलेंद्रियाः। पतितासार्थसंबंधिसहायरिपुतस्कराः। साहसीदृष्टदोषश्चनि
र्धूतायास्त्वसाक्षिणः। निर्धूतःस्वजनैस्त्यक्ता आदिग्रहणेनदासादयः बृहस्पतिः। मनुः। पितापितृव्यश्चभार्या
याभ्रातृमातुलौ। भ्रातासखाचजामातासर्ववादेष्वसाक्षिणः। नारदः। अनिर्दिष्टस्तुसाक्षित्वेस्वयमेवैत्य
योवदेत्। स्वयमुक्तिःसशास्त्रेषुनससाक्षित्वमर्हति कात्यायनः। साक्षिणांलिखितानांचनिर्दिष्टानांचवा
दिना। तेषामेकोन्यथावादीभवेत्सर्वेऽसाक्षिणः। एतेषामपिक्वचित्साक्षित्वमाह नारदः। असाक्षिणो
येनिर्दिष्टादासनैकृतिकादयः कार्यगौरवमासाद्यभवेयुस्तेपिसाक्षिणः। असंभवेमनुः। स्त्रियाप्यसंभ

व्य॰म॰ वे कार्यबालेन स्थविरेण वा। शिष्येण बंधुना वापि दासेन भृतकेन वा॥ याज्ञवल्क्यः। सर्वः साक्षी संग्रहणे चौर्यपारुष्य
॥२४॥ साहसे। अत्र स्त्रीसंग्रहणादीनां साहसत्वेपि पृथगुपादानं तु प्रतयाक्लिष्टसंग्रहपरं। उशनादासो धोबधी
रः कुष्ठी स्त्रीबालस्थविरादयः। एतेप्यनभिसंबद्धाः साहसे साक्षिणो मताः। अनभिसंबद्धाः अपक्षपातिन
ः। बृहस्पतिः। साक्षिणोर्थसमुद्दिष्टान्दोषैस्तु दूषयेत्। अदुष्टोन्दृपन्यादीन्नत्समदंडमर्हतितं। वा यत्र प्रसर्थो
त्त्समं विवादविषयान्नतत्र व्यसमं। व्यासः। साक्षिदोषाः प्रयोक्तव्याः संसदि प्रतिवादिना। पत्रे विलिखितास्सर्वा
न्वाच्याः प्रत्युत्तरं तु तं। पत्रे लिखितान्साक्षिदोषान्प्रतिलब्धोत्पत्तविषयं परिहरते साक्षिणः साभ्यै वाचनीया इ
त्यर्थः सएव। प्रतिपन्नेन साक्षित्वमर्हतितु कथंचन। अतोन्यथा भावनायाः क्रियया प्रतिवादिना। अभावये
दसंदिग्धमसत्यमी साक्षिणः स्फुटं। भाविता साक्षिणो वर्ज्याः साक्षिधर्मनिराकृताः। अतोन्यथा असंप्रतिपत्तौ
भावनायामंगीकारयितव्या। क्रियया प्रमाणेन स्फुटं यथा स्यात्तथा भावयन्नित्यन्वयः। यत्तु समसदाह राम॰
षणं पश्चात्कामिन्नूमषापि वा। साक्षिणां दूषणं ग्राह्यं न साध्यंदोषवर्जनादिति। तदासत्वे नलोकेव धारितः साक्षि ॥४७५॥

विषयं प्रतिपादिनादोषाज्ञानेसएव। प्रमाणस्य हि ये दोषा वक्तव्यास्ते विवादिना। गूढाश्च प्रकटाः सम्यैः का
ले शास्त्रप्रदर्शनात्। गूढाः शास्त्रप्रदर्शनेन साक्षिवादात्पूर्वकाले वक्तव्या इत्यर्थः। अत्रानंतरं तु वक्तव्या
इत्याह बृहस्पतिः। लेख्यदोषास्तु ये केचित्साक्षिणां चैव ये स्मृताः। तत्काले तु वक्तव्याः पश्चादुक्तान्न दूषये
त्। अत्र दंडमाह कात्यायनः। उक्तेर्थे साक्षिणो यस्तु दूषयेत्साग दूषितान्। न च तत्कारणं ब्रूयात्प्राप्नुयात्सर्व
साहसं। साक्षिणां स्वदूषणपरिहाराशक्तावपि तत्कुर्यादित्याह। बृहस्पतिः। लेख्यं वा साक्षिणो वापि विवादे
यस्य दूषिताः। तस्य कार्यं न सिध्येत यावत्तन्न विशोधयेत्। तल्लेख्यादिकं कूटसाक्षिकं कर्तुं दंडमाह कात्या
यनः। येन कार्यस्य लोभेन निर्दिष्टाः कूटसाक्षिणः। स्वहीनात्तस्य सर्वस्वं कुर्यान्निर्विषयं ततः। निर्विषयं विषयाद
विषयान्नृतार्परहितं उद्धासाक्षि निग्रयो याप्यमह नारदः। नारदः। यस्त्वात्मदोषदुष्टत्वादस्वस्थ इव लक्ष्यते। स्था
नात्स्थानांतरं गच्छेदेकैकं चानुधावति। कासत्यकस्माच्च अश्राम नाद्दो निश्वसत्यपि विलिखत्यवनिं पादा
हू वासश्च धूनयेत्। भिद्यते मुखवर्णोस्य ललाटं स्विद्यते तथा। शोषमागच्छतश्चोष्ठौ ऊर्ध्वं तिर्यक वा द्रते। त्वरमा

स.मु. ण इवावद्दसहसो बहुभाषते। कूटसाक्षिणं विजेयतंतंपापंनयेन्नृपः। साक्षिणांप्रश्नप्रकारमाहकात्यायनः॥
॥२५॥ देवब्राह्मणसान्निध्येसाक्ष्यंपृच्छेदृतंद्विजान्। उदङ्मुखान्प्राङ्मुखान्वापूर्वाह्णेवाशुचिःशुचीन्। समंततःसा
क्षिणःसर्वानधिकृत्यपर्यसन्निधौ। प्राड्विवाकोनुयोयुंजीतविधिनानेनसान्त्वयन्। पद्धयोरनयोर्वेत्थ्यकार्येस्मि-
न्धिष्टितंमिथः। तद्ब्रूतसर्वंसत्येननयुष्माकंह्यत्रसाक्षिता। गवाश्वादिविवादेषुविप्रतिपन्नार्थसान्निध्यम्
प्याहसएव। अर्थिप्रत्यर्थिसन्निधिसाक्ष्यार्थस्यचसन्निधौ। प्रत्यक्षंचोदयेत्साक्ष्यंकथंचन। अर्थस्योपरिकर्त
व्यंतयोरपिविनाक्वचित्। चतुष्पादेषुधर्मोयंद्विपदस्थावरेषुच। तौल्यगणिममेयानांसमावेपिहिवादयेत्।
क्रियाकारेषुसर्वेषुसाक्षिणत्वंनतोन्यथेतितयोर्वादिनोर्विना। पित्र्यर्थसान्निध्यानेक्वचित्तुष्पदादिषि
तमर्थः। तोलंतोल्लनयोग्यंसुवर्णादि। गणिमं। गणनियंनाणकादि। मेयंमानयोग्यंव्रीहिगोधूमादि। अनावे-
पिसाक्ष्यार्थसन्निधानाभावेपिक्रियाकारेषुव्यवहारेषु। वधरूपेविवादपदेसाक्षिनायणंग्रिवसन्निधावित्या
हसएव। वधेचेत्प्राणिनांसाक्ष्यंवादयेच्छिवसन्निधौ। तदभावेतुचिह्नस्यनान्यथैवविवादयेत्। तत्साक्षिन राम:
॥४७६॥

षणंचचिह्नस्याभावेकार्येअन्यथावधाचिह्नसद्भावेसएव। नकालहरणंकार्यंराज्ञासाक्षिप्रभाषणं। महादो
षोभवेत्कालाद्धर्मव्यावृत्तिलक्षणः। नारदः। अरूपमाक्षिणादृष्टेर्नियम्यशपथैर्नृणाम्। समस्तान्विदिताचारा
न्विज्ञातार्थान्पृथक्पृथक्। वसिष्ठः। समवेतैस्तुयद्दृष्टंवक्तव्यंतुतथैवतत्। विभिन्नैनैवतत्कार्यंवक्तव्यंतुपृथ
क्पृथक्। भिन्नकालेतुयत्कार्यंविज्ञातंयत्रसाक्षिभिः। एकैकंवादयेत्तत्रविधिरेषप्रकीर्तितः। मनुः। सत्येनशा
पयेद्विप्रंक्षत्रियंवाहनायुधैः। गोवाजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः। गोरक्षकान्वाणिजकांस्तथाकारुकु
शीलवान्। प्रेष्यान्वार्धुषिकांश्चैवविप्रान्शूद्रवदाचरेत्। येव्यपेताःस्वकर्मभ्यःपरपिंडोपजीविनः। द्विजत्वमा
निकांक्षतितांश्चशूद्रवदाचरेत्। इतिअन्यथाब्रुवन्। सत्यतेनरपतान्येवमादिप्रकारेणेत्यर्थः। साक्षिवचनपरा
क्षोपायमाह। देशकालवयोद्रव्यसंज्ञातिप्रमाणतः। अन्यूनंचेतिगदितंध्यंसाध्यंविनिर्दिशेत्। साक्षिणो
विप्रतिपत्तौनिर्णयमाहयाज्ञवल्क्यः। द्वैधेबहूनांवचनंसमेषुगुणिनांतथा। गुणिद्वैधेतुवचनंग्राह्यंयेगु
णवत्तमाः। साक्ष्यभंगीकृत्यानभिधानेदंडमाहसएव। अब्रुवन्हिब्रुवन्हिनरःसाक्ष्यमृणंसदशबंधकंरा

व्य.म.
॥१६॥ ज्ञः सर्वस्वदाप्यः स्याद्धत्त्वा रिक्थं केहनि। सर्वस्वं द्विसहितं सदशबंधकं दशमांससहितं। दशमांससहितं॥ दश
मांशज्ञाया द्या॥ स वृद्धिकाम्रणमुत्तमर्णेनयाह्यमितिमिताक्षरायां॥ जानतः साक्ष्यानंगीकारे दण्डमाह स एव
यः साक्ष्यं श्रावितोन्येभ्यो निह्नुते तत्तमोवृतः। स दाप्योष्टगुणं दण्डं ब्राह्मणं तु विवासयेत्॥ विवादपराजयेयो
दंडस्सष्टगुणं दाप्यः दण्डदानासमर्थश्चेत् ब्राह्मणो निर्वास्यः। क्षत्रियादिः स्वोचितकर्मकारयितव्य इति मि
ताक्षरायां॥ मनुः। यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः। रोगोग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः॥ या
ज्ञवल्क्यः॥ वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्। तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः॥ शूद्रस्य प्रा
यश्चित्तमाह विष्णुः। उक्तेपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः। द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः
नृतवदनानुज्ञा॥ नारदः। निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्। लिखितं साक्षिणो वापि पूर्वमावे
दितं न चेत्॥ क्वचित्साक्षिणो नृतवदनानुज्ञा प्रायश्चित्तं चाह याज्ञवल्क्यः। वर्णिनां हि वधो यत्र तत्र साक्ष्यनृ राम
तं वदेत्। तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः। शूद्रस्य प्रायश्चित्तमाह विष्णुः। शूद्रस्यैकाह्निकं गोद ॥४३॥

कस्य ग्रासं दद्यादिति। एकाह्निकं एकस्मिन्नह्नि भक्षयितुं पर्याप्तं। अपदिव्यं तत्तु मानुषप्रमाणाभावे निर्णी
तार्थनिर्णायकं तच्च तत्कालकालांतरनिर्णायकतया द्वेधा। तत्राद्यं नवधाह बृहस्पतिः। घटोग्निरुदकं चै
व विषं कोशश्च पंचमं। षष्ठं च तंडुलाः प्रोक्तं सप्तमं तप्तमाषकं। अष्टमं फालमित्युक्तं नवमं धर्मजं स्मृतं। त
न्याद्यानि पंच महाभियोगेन वेत्याह याज्ञवल्क्यः। तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। महाभियो
गेष्वेतानि शीर्षकस्थेभियोक्तरि। शीर्षकस्थे पराजयिकं दण्डभागीति पितामहः। सावष्टंभाभियुक्तानां घटादी
नि दिशेत्। तंडुलाश्चैव कोशश्च शंकास्वेतानि योजयेदिति। तेन कोशादौ शीर्षे नेदं कार्यं न भवति। कालिकापु
राणे। परदाराभिशापे च चौर्यागम्यागमेषु च। महापातकशास्ते च स्याद्दिव्यं नृपसाक्षिके विप्रतिपत्तौ विवा
दे वर्णस्य स्थापने कृते। तत्रैव स्थापयेद्दिव्यं मिरा पूर्वमहीपतिः। परदाराभिशापे च बहवो यत्र वादिनः॥
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात्। अगम्यादाराभिचारासाधारणकेरूपाद्याः शास्त्रे निरास्तेस्मा
हसं बलाद्वन्यायाः अन्नवर्णोनिदापदारहृपं विशेषणमविवक्षितमभिशापस्यानुवाद्यत्वात्। एवं बहवः इ

व्य.म.

॥१७॥

त्वा द्यपि तेनवा द्यभावे पि सर्वान्निशापे पि दिव्यं। न वतिशुद्धिकारणादिति हेतुनिर्देशोप्येवं संगच्छते। विना
पि शीर्षकं कुर्यान्नृपद्रोहे प्यपातक इति सामान्योक्तिः। अथ नारदः। राजभिः शंकितानां च निर्दिष्टानां च द
स्युभिः। आत्मशुद्धिपराणां च दवं दिव्यं शिरो विनेति। कालांतरे निर्णायके दिव्यं शापतञ्चेदाना ह नारदः। स
त्यवाहनशस्त्राणि गोबीजकनकानि च। देवतापितृपादांश्च दत्तानि सुकृतानि च स्पृशेच्छिरांसि पुत्रा
णां दाराणां सुहृदां तथा। अभियोगेषु सर्वेषु कोशपानमथापि वा। इत्येते शपथाः प्रोक्ता मनुना स्वल्प
कारणात्। कोशस्य कालांतरनिर्णायकत्वे पि महाभियोगविषयतया चक्षुयात्। याज्ञवल्क्यः। रुच्या वा
न्यतरः कुर्यादितरो वर्तयेत् शिरः। अयं च विकल्पो नियोज्येच्छायामेव तदानिच्छायां त्वनियोज्यस्यैव दिव्यं
न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्। अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैरिति दिव्यत
त्वे कात्यायनोक्तः। अथाधिकारिव्यवस्था याज्ञवल्क्यः। तुलास्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणां। अग्निर्जलं रामः
वा शूद्रस्य यवाः सप्त विषस्य वा। अत्र जातिवयोवस्थाविशेषो नारदेन षोडशाब्दावधिको बालः। सर्वे ॥४७६॥

जातीयोपि। अशीतिवर्षाधिको वृद्धः। अत्र ब्राह्मणस्य वृद्धामारणासाधारणकारणे तु सैव नियताः॥
अन्यादिकालेतजान्यपि भवंति। अत एव पितामहः। सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते। सर्वाण्ये
तानि सर्वेषां ब्राह्मणस्य विशे विना। कालिकापुराणे। वर्णात्यस्य सदा देयमाषकं तप्तहेमजं। नारदः। स्त्री
वान्नरान्स्तत्वहानान्परितश्चार्दितातरान्। बालवृद्धातुरां स्त्रीश्च परीक्षेत घटे सदा। स्त्रीणां तु न विषं
प्रोक्तं न चापि सलिलं स्मृतं घटकोशादिभिस्तासामंतस्तत्वं विचारयेत्। सद्यो म्रियंते मज्जंतः स्वल्पप्राणा
स्तीनां तेयुशुद्धिः स्यान्न विषपित्तरोगिणां। श्वित्रंधकुनखादीनां नाग्निकर्म विधीयते। मज्जनायाः स्त्रीबा
लाधर्मशास्त्रविदणै। रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः। निःसत्त्वाहान्व्याधिक्लिष्टान्यान्तस्तोपेनि
मज्जयेत्। सद्यो म्रियंते मज्जंतः स्वल्पप्राणा हि ते स्मृताः। साहसेष्वागतानेतानैव तोये निमज्जयेत्। न चैपि हार
येदग्निमविषेणाविशोधयेत्। विष्णुः। न स्त्रीणामकानां जलं। श्वासकामिनां कामातः। न लोहशिल्पिनमग्निः
सलिलं नाबुसे विना मंत्रयोगविदश्चैव विषं दद्यात्तु न क्वचित्। तंडुलैर्न नियुंजीत व्रतिनं मुखरोगिणं। कु

व्य॰म॰

॥२८॥

तापयोव्रतो द्विमान्। पितामहः। मद्यपस्त्रीव्यसनिनां कितवानां तथैव च। कोशः प्राज्ञैर्न दातव्यो ये च नास्ति
कवृत्तयः। नारदः। महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते। नास्तिके दृष्टदोषे च कोशदानं विवर्जयेत्॥
कात्यायनः। अस्पृश्याधमदासानां म्लेच्छानां पापकारिणां। प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि। त
त्प्रसिद्धानि दिव्यानि संभवे तेषु निर्दिशेत्। तत्प्रसिद्धानि घटसर्पादीनि दिव्यकारिणो शक्तौ प्रतिनिधिमा
ह दिव्यतत्त्वे स एव। देशकालाविरोधेन तु यथायुक्तं प्रकल्पयेत्। अन्येन हारयेद्दिव्यं विधिरेष विपर्यये। अन्ते
न हारयेत्प्रतिनिधिना कारयेत् विपर्ययेत् विपर्यये दिव्यकारिणो सामर्थ्ये पूर्वं पित्रादितो मा हृयात् इत्य
ल्पं पापं वा कृतमिति निश्चये कालांतरे वा यंतिरसंदेहे विप्रतिनिधेद्वारैव दिव्यमाह स एव दिव्यप्रकर
णे कात्यायनः। मातापितृद्विजगुरुवृद्धस्त्रीबालघातिनां। महापातकयुक्तानां नास्तिकानां विशेषतः।
लिङ्गिनां प्रमदानां च मंत्रयोगक्रियाविदां। वर्णसंकरजातानां पापाभ्यासप्रवर्तिनां। एतेष्वेवाभियोगेषु
निघ्नेष्वेव प्रयत्नतः। दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः। एतैरेव नियुक्तानां साधूनां दिव्यमर्हति।

राम:

॥५७॥

न संनिधानमाधवीय वृत्तत्रयोध्याः स्वकैर्नरैः। स्वकैः रासैः। अथ कालः पितामहः। चैत्रो मार्गशिरः श्चैव वैशा
खश्च तथैव च। एते साधारणा मासा दिव्यानामविरोधिनः। घटः सर्वर्तुकः प्रोक्तो वातिवाते विवर्जये
त्। अग्निः शिशिरहेमंतवर्षासु परिकीर्तितः। शरद्ग्रीष्मे तु सलिलं हेमंते शिशिरे विषं॥ विशे हेमंतशिशि
रयोः रेवोपादानेकालांतरस्याप्युपलक्षणं। वर्षे चतुर्यवामात्रेत्याद्युपये वक्ष्यमाणत्वात्। नारदः। कोशस्तु
सर्वदा देयः तुलास्यात्सार्वकालिकी॥ पितामहः। पूर्वाह्णे ग्निपरीक्षास्यात् पूर्वाह्णे च घटो भवेत्। मध्याह्ने
तु जलं देयं धर्मतत्त्वमभीप्सता। दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते। रात्रौ तु पश्चिमे यामे विषं देयं सुशी
तलमिति एतानि च दिव्यान्यादित्यवारे कार्याणीति शिष्टाः। अथ देशः। पितामहः। प्राङ्मुखो निश्चलाः का
र्याः शुचौ देशे घटः सदा। इंद्रस्थाने सभायां वा राजद्वारे चतुष्पथे। नारदः। सभाराजकुलद्वारदेवायतनचत्वर
इति। कात्यायनः। इंद्रस्थाने मिशस्तानां महापातकिनां नृणां। नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्। प्राति
लोम्यप्रसूतानां दिव्यं देयं चतुष्पथे। अतोन्येषु तु कार्येषु सभामध्ये विदुर्बुधा इति। नारदः। अदेशका

व्य·प्र·

॥२९॥ स्त्रदत्तानि वह्निर्वा दहन्ति च। विनाचारं सदाधर्षं कुर्वतो ह्यसंशय इति। अथ सर्वदिव्यसाधारणो विधिः पि
तामहः। ततश्चावाहयेद्देवान् विधिनानेन धर्मवित्। प्राङ्मुखः प्रांजलिर्भूत्वा प्राड्विवाकस्ततो वदेत्। ए
ह्येहि भगवान् धर्म अस्मिन् दिव्ये समाविश। सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः। आवाह्य तु घ
टे धर्मं पश्चादंगानि विन्यसेत्। मध्ये च इंद्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा वरुणं पश्चिमे भागे कुबेरं चो
त्तरे तथा। अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत्। इंद्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः।
कुबेरस्तु सुवर्णाभः अग्निश्चापि सुवर्णभः। तथैव नैरृतिः श्यामो वायुर्धूम्रः प्रशस्यते। ईशानस्तु भवेद्रक्त एवं ध्या
येत्क्रमादिमान्। इंद्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः। धरो ध्रुवस्तथा सोमश्चापश्चैवानलः। प्रत्यूषश्च प्र
भासश्च वसवोऽष्टौ प्रकीर्तिताः। देवेशेशानयोर्मध्ये आदित्यानां तथा गणं। धातार्यमा च मित्रश्च वरुणोंऽशो
भगस्तथा। इंद्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः। ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः। इत्येते द्वा रामः
दशादित्या नामभिः परिकीर्तिताः। अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः। वीरभद्रश्च शंभुश्च गिरिशश्च ॥४८७॥

रिशश्च महायशाः। अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः। भुवनाधीश्वरश्चैव कपाली च विशांपतिः। स्था
णुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः। प्रेतेशरक्षोमध्ये च मातृस्थानं प्रकल्पयेत्। ब्राह्मी माहेश्वरी चै
व कौमारी वैष्णवी तथा। वाराही चैव माहेंद्री चामुंडा गणसंयुता। निरृतेरुत्तरे भागे गणेशायतनं विदुः। वरुण
स्योत्तरे भागे मरुतां स्थानमुच्यते। गगनस्पर्शनो वायुरनिलो मारुतस्तथा। प्राणः प्राणेशजीवौ च मरुत
स्सप्त कीर्तिताः। घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः। एतासां देवतानां तु स्वनाम्ना पूजनं विदुः। भावमा
ने धर्माय दत्वा चार्घ्यादिकं क्रमात्। अर्घ्यादि पश्चादंगानां स्वषांतरमुपकल्पयेत्। गंधादिकं निवेद्यांतां
परिचर्यां प्रकल्पयेत्। चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः। आज्येन हविषा चैव समिद्भिर्होमसा
धनैः। सावित्र्या प्रणवेनापि स्वाहान्तैर्वै होमयेत्। हविश्चरुः। आज्यं हविः समिधः संप्रतिपन्नदेवताक
त्वन्मिलितानामेव होमः। सान्नाय्ययोरिवेति दिव्यतत्वे गौडमीमांसकः। तन्न। आज्येस्त्वेवणाव धेतीति स्तव
स्य चरोस्सह उपस्तरणातिमध्यात्पूर्वार्धाच्च द्विर्द्विरवदानं धति। अभिघारयति। हविस्त्वसंचैवदानं धर्म

अ॰म॰
॥२०॥

इत्याश्वलायनादिसूत्रात्तस्य च ॥ समित्तु सामर्थ्याद्धस्तस्येति भिन्नसाधनकत्वान्नैतानुपपन्नं ॥ सान्नाय्यहो
मयोस्तु उक्तानएव साधनत्वाद्युक्तातं नेति ॥ मरवायमर्घमन्नियुक्तः ॥ माह्निरविवातंतु पत्रकैर्मंत्रेणानेन
सहितं तत्र कार्यं च शिरोगतं ॥ मंत्रः ॥ आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च ॥ अहश्च रात्रि
श्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति ॥ नारदः ॥ प्राड्विवाकस्ततो विप्रो वेदवेदांगपारगः ॥ श्रुतवृत्तोपसं
पन्नः शांतिचित्तो विमत्सरः ॥ सत्यसंधः शुचिर्दक्षः सर्वप्राणिहिते रतः ॥ उपोषितश्चार्द्रवासा कृतदंतधावनः ॥
सर्वासां देवतानां च पूजां कृत्वा यथाविधीति ॥ याज्ञवल्क्यः ॥ सचैलस्नातमाहूय सूर्योदय उपोषितं ॥ कार
येत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ पितामहोपि ॥ एकरात्रोपोषिताय पवित्रायोपोषिताय ॥ नित्यं देया
नि दिव्यानि शुचये चार्द्रवाससे ॥ इति ॥ सएवाभ्यधिकपरिरक्षो राजा सुदिनं तां प्रयुज्य येत् ॥ ऋत्विक्पुरोहिताचार्या
न् दक्षिणाभिस्तु तोषयेत् ॥ एवं कारयिता राजा भुक्त्वा भोगान्मनोरमान् ॥ महतीं कीर्तिमाप्नोति ब्रह्मभू
यायकल्पते ॥ अथ घटविधिः ॥ पितामहः ॥ विशालां पुष्टितां सत्राघटशालां तु कारयेत् ॥ पत्रस्थानो

रा॰म॰
॥४८१॥

परस्तंते श्वनिश्चांडालवायसैः ॥ कपाटबाजसंयुक्तां परिचाराकरक्षितां ॥ पानीयादिसमायुक्तामश्वेरैवं कार
येन्नृपः ॥ नारदः ॥ खादिरं कारयेत्तत्र निर्व्रणं शुक्लवर्जितं शुक्लारवादिविवर्जितमित्यर्थः ॥ शोरायं तदभावे वा
स्तो वा कोटरैर्विना ॥ अर्जुनं तिंदुकासारं तिनिशो रक्तचंदनः ॥ माघवस्तु अर्जुनस्तिलको शोकतिनिशौ
रक्तचंदनम् इति पयायाः ॥ एवंविधानि काष्ठानि घटार्थं परिकल्पयेत् ॥ एवंविधानि इत्यादौ नुक्तन्यान्यपि य
ज्ञियानीदं वराहोनिमदन ॥ अतएव पितामह छित्वा तु यज्ञियं वृक्षं मंत्रपूर्वकं ॥ ब्रणम्य लोकपालेभ्यस्त
रलाकार्या मनीषिभिः ॥ मंत्रः सौम्यो वानस्पत्यश्च देने जप एव च ॥ दापदोषन्नेधाप स्वे नमित्यादिमंत्रपूर्वकसै
म्य वानस्पत्ययोर्जपं यत्र त्वेनाद्दष्टार्थतात्समुत्स्या ॥ सौम्याः प्रसिद्धा ॥ वानस्पत्यो वनस्पते त्रातवत् ॥ विरोहे
ति ॥ अस्य रूपं वहितस्देशादे वसिद्धस्यैवानुवादः ॥ पितामह चतुर्हस्ता तुला कार्या पादौ कार्यौ तथा
विधौ ॥ अंतरं तु तयोर्हस्तौ भवेदघ्नौ मेव चाप्यासः ॥ हस्तद्वयं निखेयं तु पादयोरुभयोरपि ॥ पितामह
तैस्तु चतुरस्रा तु रस्रा तुला कार्या दृढा ऋज्वी तथैव च ॥ कटकानि च देयानि त्रिषुस्थानेषु यत्नतः ॥

व्य·प्र·
॥२१॥

तरणवाशिक्यद्वयं समासमासज्य पार्श्वयोरपि। आगयान्तकल्पयेद्दर्भौ स्थिरयोरुभयोरपि। पश्चिमे तोलयेत्तत्र
र्ह तु स्मिन्नस्मिन्नन्यशिक्ये मृत्तिकाः शुभाः। इष्टकाभस्मपाषाणकपालास्थिविवर्जिताः। नारदः। शिक्यद्वयं समासज्य घटक
र्कयोर्दृढं। एकत्र शिक्ये पुरुषमन्यस्मिंस्तुलयेच्छिलां। धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलां। पिटकं पूरयेत्त
स्मिन्निष्टकं पांसुलोष्टकैः। परिक्षाप्रकारमाह स एव। कार्यपरिक्षे नित्यमवलम्बसमो घटः। उदकं च
प्रदातव्यं घटस्योपरि पण्डितैः। यस्मिन्न चलते तोयं स विज्ञेयः समो घटः। साम्प्रायमबलं वावाह पिताम
हः। तोरणे च तथा कार्ये पार्श्वयोरुभयोरपि। घटाय्युत्तरं स्यातां नित्यं दशाङ्गुलैः। अवलम्बौ च क
र्तव्यौ तोरणाभ्यामधोमुखौ। मृन्मयौ सूत्रसंबद्धौ घटमस्तकचुम्बिनौ। पितामह तोलयित्वारं पूर्वं वति
स्मात्त्रमवती वुत्तः। ध्वजं तु कारयेन्नित्यं पताकाध्वजशोभितं। ततश्चावाहयेद्देवान्विधिनानेन मंत्रवि रामः
त्। वदित्रतूर्यनिर्घोषैर्गन्धमाल्यानुलेपनैः। नारदः। रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः। अर्चयेत्तु ॥४६२
घं पूर्वं ततः। शिष्टोक्तं पूजयेत्। याज्ञवल्क्यः। तुलाधारणविद्वद्भिरभियुक्तास्तुलाश्रित। प्रतिमानस

मीभूतो रेखां कृत्वावतारितः। त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता। तत्सत्यं वद कल्याणि संशयान्मां
विमोचय। यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय। शुद्धं चेद्गमयोर्ध्वं तु तुलामित्यभिमन्त्रयेत्।
नारदः। समयैः परिगृह्याथ पुनरारोहयेत्ततः। निवाते तु स्थिरहिते शिरस्यारोप्य पत्रकं समयैः परिगृह्य
समयैर्नियम्य तानाह विष्णुः। ब्रह्मघ्ना ये स्मृता लोका कूटसाक्षिणः। तुलाधारस्य ते लोकास्तुलां धा
रयतो मृषेति। पुनरारोहणकाले निमंत्रणमाह नारदः। त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च। त्वमे
व देव जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोयं मानवस्तोल्यते त्वयि। तदेनं संशयादस्माद्धर्मत
स्त्रातुमर्हसि देवासुरमनुष्याणां सत्ये त्वमतिरिच्यते। सायसंधोऽसि भगवन् शुभाशुभविभावने। आदि
त्यचन्द्रावनिलो नलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य
वृत्तमिति। पितामहः। ज्योतिर्ब्राह्मणाः श्रेष्ठाः कुर्यात्कलपरीक्षणं। विनाड्यः पंच विज्ञेयाः परिक्षाकाल
को विदैः। साक्षिणो ब्राह्मणश्रेष्ठा यथा वादिना। ज्ञानिनः शुचयो लुब्धा नियोक्तव्या नृपेण तु। यं संतिमा शिरा

सर्वेश्रुतमसुदीन्वपेतरः। विनाप्रायः पजानिःस्वगुर्वन्तर। पाणाः षट्ट्र पाणस्याद्भिनाउक्तेतिस्मृतौ। नारदः। तुलितो
यदिवर्द्धितेविशुद्धः स्यान्नसंशयः समोपाहीयमानोवानविशुद्धोभवेन्नरः वृद्धिरूर्ध्वगतिः। हानिरधोगतिः। पि
तामहः। स्वल्पपाप समोज्ञेयो बहुपापस्तु हीयते। स्वल्पत्वंसहृदमतिहतत्वेन यत्रतु शिष्टवचनेनैव
सहृदमिहतत्वनिश्चयपापमात्रेचविप्रतिपत्तादिव्यकृतेसमतातत्रदोषाल्पत्वात्संभवात्पुनःकरणं स्व
तएव वृद्ध्यति। तत्समत्वपुनस्तोल्येवर्द्धितोविजयान्वेदिति। पुनःकरणेकारणांतरमाह कात्यायनः।
शिक्यछेदेतुलाभंगेतथाचापिगुणस्यच। शुद्धेस्यसंशयंचैनपरिशुद्धेतुपुनर्नरः। व्यासः। कछछेदेतुलाभंगे
धरककर्टयोस्तथा। रज्जुछेदेक्षभंगेवादृष्टाछिद्रिपुनर्न्यपाः। दंतुदृष्टकारणकभंगपरं स्वाकाल्पिकभंगा
दौत्वशुद्धएवककछेदेतुलाभंगेघटकर्कटयोस्तथा। रजछेदेक्षयोभागस्तथैवाशुद्धिमादिशद्दितिस्मृत्यं
तरात्। कर्कशिक्यतस्तु। अत्रस्तंभोपरिस्थापितस्तुलाधारः। अत्रदृतिस्तोलानमंत्रिस्पनसोगप्रयोग
स्यैतिषाच्या। एवंतुवैगुणपापपरिहारात्माग॥ प्रयोगस्त्वावर्तनीयइतिमदनः। पितामहः। अथप्रयोगः

॥ कर्तव्यस्तुनेकिपूर्वाह्नेपूर्वोक्तास्थनयहसमापेगत्वानंपघेनायस्त्वेनमितिमंत्रेणवृक्षंछित्वासोमोधेनुरि
तमस्त्रिष्टुप्छंदःयेवियोगः सोमोधेनुं वनस्पतेगाथिनोविश्वामित्रोवनस्पतिस्त्रिष्टुप्जपेविनियोगः। वन
स्पतेशतवल्शोइतिजस्वारं दृढलोकपालास्तृतेकंनत्वाचतुर्हस्तदीर्घांचतुरंगुलांचतुरस्रांमध्येतत
योश्चचतुरंगुलवृत्तांमध्यउपरिभागेनयोर्ध्वयोभागयत्रिभिककंटोकटकेर्वर्तितांतुलांकुर्यात्सप्तहस्तांवाच
तुरंगुलांततावेदिकुर्यादितिकेचित्। ततस्तपरिहस्तस्यांशुचिदेशांतरेवाचतुरस्रंषड्हस्तंपट्टस्तादिधिका
त्वाहतचतुरस्रंवातत्रउयोर्मध्येधोभागेल्वोहकर्कटिककटकचउरिशाघाकारतुलावर्तवनपुनकाष्ठंनिवे
श्यतस्मिन्स्तुलास्तोभरितनकटवउरिणादिनावलंदद्विणोत्तरयोस्तंभद्वयेनिरवायतेवोत्तिपर्युत्तरंगकाष्ठंदद्या
त्। तदेतनोरणंतत्रघटादृशांगलेद्वा। एतादृशंचपश्चिमायामपिकोतोरणा-न्यामध्येवृषलंमानोमन्मयो
त्रनसंबधौगोलकरूपावकलेवैतुलाग्रांतस्हशौकार्येसाम्यज्ञानाय। फलकपोश्चभागयाकुशास्तणायात
ततःकृतोकोपवासेबद्धोगोलकरूषावचलेवैतुलाप्रयोगोवाकृतोपवासस्त्रयंरविवारेसूर्योदयेततरस्वैव

प्र·म:
॥२३॥

स्नानं शैौधं कृतं को पवास: प्राड्विवाक: पश्चिमविकपश्चारोप्य पूर्वं शिवे पाषेणेष्टकाम्लदारोप्य समं तोलयेत्
तत्परीक्षाथुदक प्रक्षेपादिना सत्यवादिनो विक्रमकां राश्च कुर्युः॥ ततस्तोलनकालेयेन संनिवेशेनोपपविष्टं
स्तन्निवेशज्ञानायतादृशं रेखां कृत्वांतमतारयेत्॥ ततः शौधो दैशकाजौसकी त्यात्मष्ट द्विजापनायसुक
दिव्यं करिष्य इतिसंकल्प्य प्राड्विवाकमेकं चतुरोऋत्विजश्च वस्त्रादिना वृणुयात्॥ स्वास्तिवाना धपिकार्यमि।
तिस्मार्तं नराचार्या॥ प्राड्विवाकश्च प्रांजलिःसत्यं नादष्ठ एहोहि भगवान्धर्मस्व्यास्मिन्दिव्ये समाविशा सहितो
लोकपालैश्च वस्वादित्यमरुद्गणैरिति॥ एवं धटे धर्ममावाह्य पश्चादंगदेवता आवाहयेत्॥ इंद्रंविश्व म धछंद
सइंद्रोनुष्टुप्पूइंद्रावाहने विनियोगः एवं सर्वत्र विनियो॥ स्योंइंद्र विश्वा स्पंरहागछइहतिष्ठेति दक्षिणेय
ममावाह्य रूपामं ध्यायेत्॥ त्वंनो वामदेवो वरुणस्त्रिष्टुप्॥ त्वं तोन्ना नेवरुणस्य:वरुणेहागछेहतिष्टेति पश्चिमे
वरुणमावाह्य स्फटिकाभं ध्यायेत्॥ राजाधिराजायेतियंतयजुर्या कुवेरइहागछइहतिष्ठेतिउत्तरे कुवेरमा
वाह्यस्व र्णाभंध्यायेत्॥ अग्निमेधातिपिरग्निर्गायत्री॥ ॐ अग्मिडत अग्ने इहागछेतइहतिष्ठेति॥ इति आग्ने॥

राम:
॥४८४॥

येऽग्निमावाह्यमुवर्णं ध्यायेत्॥ मोषुणेयोरा कएवानिऋतिर्गायत्री॥ ॐ मोषुणइहेत्यादिवाके ह्यस्प मं ध्यायेत्
तववायो वसिष्ठो वायुर्गायत्री॥ ऋतववाय इहतिष्ट पूर्ववत्॥ धूम्रं ध्यायेत्॥ तमीशानंगौतमोईशानो जगती
॥ ॐ तमीशानइहेतस्वैवस्रुन्॥ धरोध्रुवस्तपासोमश्चापश्चैवानिलोनलः॥ प्रत्यूषश्च वसवोष्टप्रकीर्तिता
॥ शावाप्स्वकाइंद्रशावमध्येत्॥ ततुःसामदेमत्स्या द्वादशागायत्री॥ ॐ त्वान्नइन्नियातहेइत्यादिद्वादशादित्या
नावाह्य धातार्यमात्रमित्रमित्रश्च वरुणेशोभगस्तथा॥ इंद्रोविवस्वान्पूपाच पर्जन्यो दशमःस्मृतः॥ ततस्त्व।
ष्टाततो विष्णुर्जघन्योजघन्यजः॥ इत्येते द्वादशादित्या नामभिः परिकीर्तिता॥ अग्नेऽपश्चिमो ब्रारुद्रास॥ शा
वाश्वकाहशारुद्राजगती॥ ॐ त्र्यम्बारुद्रास॥ इहेतिरुद्रानावाह्यवीरभद्रश्च शंभुश्च गिरीशमहाव्याशा॥ अज्यै
कापाद हिर्बुध्न:पिनाकीचापराजित॥ भुवनाधीश्वरश्चैव कपालीचविशांपति॥ स्थाणुर्भगश्च भगवान्
रुद्राएकादशास्मृता॥ यमनिऋतिमध्येगौरीमिमाचदीर्घतमा उमाजगती गौरीर्मिमायइहोत्यामातृशामावा
ह्य॥ ब्राह्मीमाहेश्वरीचैव कौमारीवैष्णवीतथा॥ वाराहीचतथेंद्राणी चामुंडासप्तमातरः॥ निऋते रुद्रस्तःग।

णानां त्वस्समदो गणाधिपतिर्जगतां गणानां त्वा। इत्यादि गणेशं। वरुणाद्युत्तरे मरुतो यस्य राहि गणो मरुतो गा
यत्री ॐ मरुतो यस्य हि क्षये। इत्यादि मरुतः। गगनस्पर्शनो वायुरनिलो मारुतस्तथा प्राणः प्राणेशजीवौ
च मरुतो धैः प्रकीर्तिताः। घटाद्युत्तरे जातवेदसे कश्यपो दुर्गा त्रिष्टुप् ॐ जातवेदसे। इत्यादि दुर्गां एवं सेतादे
वतास्त्वावाह्य पूजयेत् तत्र ॐ धर्माय धर्ध्ये प्रकल्पयामि यम। इत्यादि प्रयोगरत्नोक्तार्घ्यपाद्याचमनीयमधुप
र्काचमनीयस्नानवस्त्रयज्ञोपवीताचमनीयमुकुटकटकादिभूषणांतं धर्माद्यर्थं दत्वा इंद्रादीनां प्रणवा
द्यैः स्वस्वनामभिश्चतुर्थ्यंतैर्नमोतैरर्घ्यादिविधानं पराशर्यतुसमयेन दत्वा धर्माय गंधपुष्पधूपदीपनैवेद्या
नि दद्यात् पाद्यतानि च दत्वा इंद्रादीनां गंधादीनि मधुपर्कवद् दद्यात्। ततस्त्वतुनिरूत्विग्भिश्चतस्त्रषु दिक्षु
लौकिकाग्निस्थापनादि पूर्वहोमः कार्यः। तत्र प्रणवो गायत्र्यामुच्चार्य पुनः स्वाहाकारांतः प्रणवमुच्चार्य त्रा
ज्यचरुसमिधः प्रत्येकमष्टोत्तरशतं सवित्रे जुहुयुः। ततो नियुक्तमर्पयित्रे निरवेदनियुक्तः। आदित्यचंद्रा रामः
वनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नातिनरस्य सत्व ॥ ४६५ ॥

मिति मंत्रैश्चाभिरवेत्। तत्र पत्रे मस्तो ध्या नियुक्ता शिरोगतं कुर्यात्। इदं च धर्मावाहनादि शिरःपत्रदानांतं मेवेदि
व्यसाधारणं तेन प्राड्विवाको घटमभिमंत्रयेत्। त्वं घट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनां। धकारो धर्ममूर्त
स्त्वं टकारः कुटिलं नरं धृतो भावयसे यस्माद् घटस्तेनाभिधीयसे। त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च
त्वमेव सर्वं जानासि न विदुर्यानि मानवाः। व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति। तदेवं संशयादस्मा
द्धर्मतस्त्रातुमर्हसि। इति मंत्रेणाततो नियुक्तः। त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता। तत्सत्यं वद कल्याणि
संशयान्मां विमोचय। यद्यहं पापकृन्मातस्ततो मां त्वमधो नय। शुद्धश्चेद्गमयोर्ध्वं मां इति तुलामभिमंत्रयेत्।
ततः प्राड्विवाकः शिरोगतपत्रकं। अभियुक्तं यथास्थानं कंपयासन्निवेश्य च घटमारोप्य च पलकैः तत्यैव तत्रा
स्थापयेत्। पलं च पश्चिमद्वारोच्चारमितकालं। तुल्यापात्रकांते पलम्पाते पर्याकाशस्थो साक्षीकांतं वकं च
तं पूर्णं चिंतयन्मत्वा वारौत्री चेत्। तुल्यामग्राटनेव रवेटा राक्षा प्राघात् कूरत्त स्माधांते हर्म्यस्यांते प्राच्यैकांतकर्ते
व्या। तस्मिश्च काले शुद्धापराद्धत्तु विनिर्णीतं गौरा ज्ञस म्येन्य श्चनावेदनाये तत्क्षणं च पितामहः मा

क्षिणो ब्रह्मणः। अभिष्टाय पादपार्थवादिता। ज्ञानिनः अवयोः तुष्णा नियोक्ता अन्यपेण तु। शंसं तु साक्षिणः सर्वेषु
द्वान्द्रपैतदेतिष्ठत्यनुडीनिर्गमहेतुश्च तुलितोपदिवञ्चेत। समुद्रस्यान्नसंशय। नयोन्द्रपमानो वानवि
मुद्रो नवेत्वरः वर्द्धतउ यस्मात् हीयमानः अधोगामी इत्यर्थः। तेन मंत्रलिंगाविरोधः। तत्र नमत्वेमरुद्रम
तिष्वर्तिताक्षदोषता। हीनत्वे ब्रह्मन्मृतिपूर्वत्वेन बक्रदोषेतेतिविवेकः। पद्मत्वसतिदृष्टकरणेशिवपतरगुच्छे
दैतुल्लाककर्दपार्षतेनोत्तरंगादीनां गंगश्चतदाप्यनुद्धृता। यदातुदृष्टकारणको ऽयं नगच्छेदीतदा पुनरा
रोपयेत्। ततस्ततोवतार्य प्राङ्मुखाकत्र स्नात्विनोयपाविजवंदक्षिणादिभिस्तोषयेत्। ततोदेवताउत्तिष्ठ ब्रह्म
णस्पते। यांतु देवगणाः सर्वे इति विसृज्य सर्वं प्राङ्विवाकाय समर्पयेत्। अथाग्निविधिः पितामहः। अग्नेर्विधं
प्रवक्ष्यामि यथावृष्ठास्व चोदितं। कारयेन्मंडलान्यष्टौ पुरस्तान्नवसंमंतपा। आग्नेयं मंडलं वा हि द्वितीयं वारुणं
तथा। तृतीयं वायु देवत्यं चतुर्थं यमदैवत। पंचमं त्विंद्रदेवत्यं षष्ठं कौबेरमुच्यते। सप्तमं सोमदेवत्यं सावित्रं
त्वष्टमेतथा। नवमं सर्वदेवत्यमिति वेदविदोविदुः। मदनरत्ने। अष्टमं सर्वदैवतं पुरस्तान्नवमं यत्तुतन्म रामः ॥४८६॥

हस्तायविंविड़अ। गोमयेन कृतानि स्फुरद्भिः पर्युक्षितानि चेति पपाव। मंडलानां परिमाणमेव। द्वात्रिंशदंगु
लं प्राक् मंडलान्मंडलांतरं। अष्टनिर्मंडलैरेवमंडलानां शतद्वयं। षट्पंचाशत्कमधिकं समेक्ष्य परिकल्प
ना। मंडलान्मंडलात् मंडलयोः अंतरालयोः अभिमिलित्वा द्वात्रिंशदंगुलानीत्यर्थः। तत्र षोडशांगुलं मंडलं मंड
लयोरंतरालं च तावदेव। षोडशांगुलकं ज्ञेयं मंडलं तावदंतरमिति याज्ञवल्क्योक्तपदविरोधपदं षोडशांगु
लाधिकतदंतराले षोडशांगुलकं ज्ञेयं न्यूनमेव भवति। यदि शोध्यपदं षोडशांगुलात् दलं तदा षोडशांगु
लमंडलमध्ये यदपस्मिणामंतरमंडलं कार्यं मनुनारदः। शतद्वयमित्यस्याग्नेवारिंशत्कमधिकं समेरंगु
लमानत इति पपाव। तदेष्टमनवं मंडलांतरालं नूनागं विहाय योज्यं। तस्य गमनाना नहित्वात् एवं चतुर्विंश
तिरारव्याता। नेमेस्तु परिकल्पतेति कल्पतरुके पाठे प्राधमवस्थितिमंडलं विहायांगुलपरिमाणं योज्यं
मंडले मंडले दद्यात् कुशाः शास्त्रनचोदिता। विन्यसेच्च पदं तेषु कर्तानित्यमितिस्थितिः। मिताक्षरायां मदन
रत्ने च। यामिसर्प्पंतु ऊर्ध्याद्यो द्दतम सप्तरंशाते। स्वर्पवहेमपावकाय स्वाहेति मंत्रेण कर्यइति विज्ञानेश्वर

॥ नारदः ॥ जात्येव लोहकारो यः कुशलः कर्मणि । दृष्टप्रयोगश्चान्यत्र तेनायोऽग्नौ प्रतापयेत् ॥ अग्निवर्णमयः
पिंडं सस्फुलिंगं सुरक्षितं ॥ पितामहः ॥ अग्निं दीप्तं समं कृत्वा अष्टपलं पयोमयं । पिंडं तु तापयेत्तत्र अग्नौ पं
चशतान्पलिकापुराणे । पिंडतार्कपलिकं दत्वा दशांगुलमायतं लोहमग्निमयं ध्मातं दद्याद्राज्ञा तिश्रा
पिने ॥ शंखलिखितात् । पिंडस्य षोडशापलत्वमाह अथ वाससाश्वत्थपत्रांतरितं षोडशापलमग्निमयं पिंडं
मंजलिना धारयेत्याहिणतत्वाशक्तो । दृनायत्तापेतव्यं नमितिनारदोक्तेस्त्रिवारं पिंडं संतप्य तत्र संताप्य जले
क्षिप्त्वा पुनः संताप्य जले क्षिप्त्वा तु पुनस्ताप्यमाने प्राड्विवाको धर्मावाहनादि शिरःपत्रारोपणांतं कुर्यात् । तत्र
धर्मपूजायां विशेषमाह । पितामहः । तत्र पूजा हुताशस्य कारयेन्मनुजाधिपः रक्तचंदनधूपाद्यै रक्तपुष्पै
स्तथैव च । हारीतः प्राङ्मुखस्तु ततस्तिष्ठेत्समांरिकं तं करं प्रति । आर्द्रवासास्तु विश्वे वशिरस्यारोप्य पत्रकं
शोध्य इति शेषः । पितामहः प्रथमे मंडले तिष्ठेत् प्राङ्मुखः प्रांजलिः शुचिः । नारदः । हस्तक्षतेषु सर्वेषु कुर्या
द्दंसपदानि तु तान्येव पुनरालक्ष्ये हस्तौ विंडुविचित्रतौ ॥ याज्ञवल्क्यः ॥ रवः प्रांजलिः शुचिः नारदः हस्तक्ष

तेषु सर्वेषु कुर्याद्दंसपदानि तु । तान्येव पुनरालक्ष्ये हस्तौ विंडुविचित्रितौ । याज्ञवल्क्यः । करौ विमृदितव्रीहे
रंकयित्वा ततो न्यसेत् । सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् । तावदिति । क्रियाविशेषणं तेन सप्तवारं
वेष्टयेदिति विज्ञानेश्वराः । तावन्मात्राणि समाहारस्तावत्संतंतेन तावत्सूत्रेण सप्तसप्तकासहवेष्टयेदित्य
र्थ इति मदनः । पितामहः । सप्तपिप्पलपत्राणि न सूतानसुमनोदधिहस्तयोर्निक्षिपेत्तत्र सूत्रेण वेष्टनं तथा
अत्र प्राड्विवाकस्य पिंडस्थ एव अभिमंत्रणमंत्रा प्रयोगवर्त्स्यंते । याज्ञवल्क्यं त्वमग्ने सर्वभूतानामंतश्चरसि
पावक साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम । तस्येत्युक्तवतो लोहं पंचाशत्पलिकं समं । अग्निवर्णं
न्यसेत्पिंडं हस्तयोरुभयोरपि । पितामहः ततस्तत्वमुदायादात्परा जाधर्मपरायणः । संदंशेन नियुक्तो वा ह
स्तयोस्तस्य निक्षिपेत् । नारदः । हस्ताभ्यां तं समादाय प्राड्विवाकसमीरितः । स्थित्वैकस्मिंस्ततोऽन्यानि व्रजेत्सप्त
व्रजिस्ततगः । पितामहः त्वरमाणो न गच्छेत्तु स्वस्थो गच्छेच्छनैःशनैः । न मंडलमतिक्रामेन्नांतरा स्थापयेत्पदं । अ
ष्टमं मंडलं गत्वा नवमे निक्षिपेद्बुधः । पिंडस्तु सहितेन नवममंडले शनैःशनैः । न मंडलमतिक्रामेन्नांतरा स्थापयेत्

पदं॥ अष्टमंमंडलंगत्वानवमेनिक्षिपेद्बुधः॥ पिंडस्तुस्तृतयोनवममंडलेनिक्षेप्य॥ मंडलानितथासप्तषोडशां
गुलमानतः॥ तावदंतरतोगच्छेदुत्वानवतयोक्षिपेदितिकालिकापुराणात्॥ पितामहः॥ ततस्तद्विनिर्दिष्टोत
कात्यायनः॥ प्रस्खलन्नभियुक्तश्चेत्स्थानादन्यत्रदह्यते॥ नतंदग्धंविदुर्देवास्तस्यभूयोपिदापयेत्॥ याज्ञ
वल्क्यः॥ अंतरापतितेपिंडेसंदेसंदेहेवापुनर्हरेत्॥ अथप्रयोगः॥ पूर्वेद्युरनुशुद्धिंविधायपरेद्युर्नवमंडला
निकार्याणितत्राद्यंषोडशांगुलंविधायाग्रेद्वात्रिंशदंगुलंन्यूनांगोद्धाविनज्यद्वितीयभागेतत्पदप्रमाणं
द्वितीयेमंडलंकार्यं॥ अवशिष्टमंतरालंभवति॥ एवमेवतृतीयाद्यष्टमपर्यंतमंतरालसहितानितान्यपिषोडशां
गुलमंतरालंमुक्त्वानवममपरिमितांगुलप्रमाणंकार्यं॥ तथाचाष्टानांमंडलानामंतरालानांचमिलि
त्वांगुलानांषट्पंचाशदधिकंशतद्वयंसंपद्यते॥ तिर्यग्यवोदराण्यष्टौऊर्ध्वाव्रीहयस्त्रयः॥ प्रमाणं
मंडलस्यैकेवितस्तिद्वादशांगुलं॥ हस्तोवितस्तिद्वितयंदंडोहस्तचतुष्टयं॥ तत्सहस्रद्वयंक्रोशोयोज
नंतच्चतुष्टयं॥ वितस्त्याद्यंतरंज्ञेयंयुज्यते॥ ततःपश्चिमादिषुनवसुमंडलेष्वधिदेवताःक्रमेणाग्निव

रुणंवायुयममिंद्रकुबेरसोमंसवितारंसर्वदेवताश्चसंपूज्यमंडलन्यूनागाद्दक्षिणप्रदेशेलौकिकमग्निमु
पसमाधायाग्नयेपावकायस्वाहेत्याज्येनाष्टशतंजुहुयात्॥ द्विवोका॥ नतसप्तेतस्तस्मिन्नग्नावत्रिरादि
तंहस्तंसहस्रामष्टांगुलायामंपंचाशत्पलसंमितमयःपिंडंप्रक्षिप्यतस्मिंस्ताप्यमानेधर्मावाहनादि
हवनांतंघटविधुक्तमनुष्टानकांडंकृत्वा तायतापिवर्तमानेऽयःपिंडाद्यमग्निमभिमंत्रयेदभिमंत्रैःप्रा
द्विवाकाः॥ त्वमग्नेवेदाश्चत्वारस्त्वंचयज्ञेषुहूयसे॥ त्वंमुखंसर्वदेवानांत्वंमुखंब्रह्मवादिनां॥ जठरस्थोहिभू
तानांततोवेत्सिशुभाशुभं॥ पापंपुनासिवैयस्मात्तस्मात्पावकउच्यते॥ पापेषुदर्शयात्मानंअर्चि
ष्मान्भवपावक॥ अथवाशुद्धभावेषुशीतोभवहुताशन॥ त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत्
त्वमेवदेवजानीषेनविदुर्यानिमानवाः॥ व्यवहाराभिशस्तोयंमानुषःशुद्धिमिच्छति॥ तदेनंसंशयादस्मा
द्धर्मतस्त्रातुमर्हसीति॥ लोहस्यधर्म्येतुतप्तलोहपिंडमुदकेनिक्षिप्यपुनःसंताप्योदकेनिक्षिप्यपुनःसंता
प्योदकेनिक्षिप्यपुनःसंतापनंतृतीयस्तापः॥ एवमभिमंत्रितंसुतप्तमग्निवर्णमयःपिंडंसंदंशेनगृहीत्वा

व्य.म.
॥२६॥ साक्षिवाक्यउपोषितस्य स्नातस्यार्द्रवाससः। त्रिबद्ध्वतिलापत्रस्य पश्चिमे मंडले तिष्ठतां दिव्यकर्तुः पुरतश्चानीय
त्वमग्ने सर्वभूतानां मंतश्चरसि पावक। साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम। इति दिव्यकर्ताग्निं मंत्रि
तं तस्य कृतसंस्कारयोर्हस्तयोर्निक्षिपेत्। कृतसंस्कारयो व्रीहीन्मर्दयित्वांजलौ कृतयोस्तिलकालव्रणादि
णादिस्थाने ष्टलक्षकरसादीनां कपित्थसमानस्य वृक्षस्य पत्राणि अर्जुनाकपत्राणि सप्त समापत्राणि सप्त
दूर्वापत्राणि। अक्षतान् दध्यक्तान् तान् पुष्पाणि च विन्यस्य समग्रनिः सूत्रतंतुभिः सप्तकृत्वावेष्टितयोः। ततो दि
व्यकर्ता हितीयादीन्यष्टमांतानि मंडलेषु पदं निक्षिपन् सप्तपदानि शनैर्गत्वा ज्वलितमयःपिंडं नवमे
निक्षिपेत्। ततः पुनः कराभ्यां व्रीहिन्संमर्द्य पश्चाद्दग्धहस्तश्चेत् शुद्धो भवति। इत्यग्निदिव्यविधिः। अथ जल
विधिः। पितामहः। तोयस्यातः प्रवक्ष्यामि विधिधर्म्यं सनातनं मंडलं धूपदीपाभ्यां कारयेत विचक्षणः।
। शरान्समजपेत्स्नात्वा वेणुधं तु धनुस्तथा। मंगलैः पुष्पधूपैश्च ततः कर्म समाचरेत्। धूपदीपाभ्यां श राम:
रान्संपूज्य येदित्यन्वयः। प्रजस्य मंडलकार्या धनुःपरिमाणमाह नारदः। क्रूरं धनुः सप्तशतं मध्यमं ष ॥४९६॥

ट्शतं स्मृतं। मंदं पंचशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः। मध्यमेन तु चापेन प्रक्षिपेच्छरास्त्रयं। हस्तानां तु शते
सार्द्धे लक्ष्यं कृत्वा विचक्षणः। सप्तशतं सप्ताधिकशतं गुलं एवं षडशतं पंचदशं च कात्यायनः। शरांश्चानापसं
यांश्च प्रकुर्वीत विशुद्धये। वेणुकांडमयांश्चैव वक्षेत्मातु सुदृढं क्षिपेत्। नारदः। गत्वा तु तज्जलस्थानं तटे तोरण
मंडिते। कुर्वीत कर्ममात्रेण तु भूमिनागे समं शुचौ। गंधमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः। वरुणाय प्रकु
र्वीत पूजामादौ समाहितः। ब्राह्मणः क्षत्रियो वापि रागद्वेषविवर्जितः। नाभिमात्रे जले स्थाप्यः पुरुषः स्थाणु
वद्बली पितामहः। स्थापयेत्प्राङ्मुखं तोये स्तेनं तु ऊरुषं नृपः। आगातं प्राङ्मुखं कृत्वा तोयमध्ये तु कारिणं।
ततस्त्वावाहयेद्देव वा सलिलं चानुमंत्रयेत्। देवा धर्मावाहनादि भिन्ना णिरोपणानां कुर्यात् इत्यादि अनु
मंत्रणमंत्राः प्रयोगे द्रष्टव्याः। व्यासः। सत्येन माभिरक्ष त्वं वरुणेत्यभिशाप्य कौ नाभिदघ्नोदकस्थस्य गृह्णीयो
रुजलं विशेत्। कमुदकमभिशाप्याग्निमेमेत्यर्थः। बृहस्पति। अप्सु प्रवेशपुरुषं प्रक्षिपेत्स्थापकत्रयं।
पितामहः। द्वौ मतु क्षत्रियः कार्यस्तु हतिर्ब्राह्मणो पिवा। अक्रूरहृदयः शांतः सोपवासस्तथा शुचिः। कात्या

व्य·म·
॥२९॥

यत्॥ क्षिप्तेषु मज्जनं कार्यं गमनं समकालिकं। मज्जनसमकालिकमित्यर्थः॥ नारदपितामहौ॥ शरप्रक्षेप
णस्थानाद्युवा जववसमन्वितः। गच्छेत्परमया शक्त्या यत्रासौ मध्यमः शरः॥ मध्यमं शरमादाय पुरुषान्य
स्तथाविधः। प्रत्यागच्छेत्तु रवेगेन पतः स पुरुषो गतः॥ आगतस्तु शरग्राही न पश्यति यदा जले। अंतर्ज
लगतं सम्यक्तदा शुद्धं विनिर्दिशेत्॥ अन्यथा न विशुद्धः स्यादेकांगस्यापि दर्शनात्। स्थानाद्वान्यत्रगम
नाद्यस्मिन्पूर्वं निवेशितः॥ एकांगस्येति कर्णपरं तथा च कात्यायनः॥ शिरोमात्रं तु दृश्येत न कर्णौ नापि नासि
का। अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्॥ पितामहः॥ शरस्य पतनं ग्राह्यं सर्पणं परिवर्जयन्॥ नारदः॥ पं
चाशतं धावकानां योग्या तामधिकौ यवौ॥ तौ च तत्र नियोक्तव्यौ शरानयनकारणात्॥ अथ प्रयोगः॥ जलस्था
नं नदीसागरह्रदे वा खातसरस्तडागादिस्थिरतोयं योज्यं। अल्पमाश्रुतापंत्तणशैवालोर्मिपंकग्राहज
न्तुकमत्स्यादियुक्तं शोधयेत् वेगमित्यादि वर्ज्यं। तत्र नाभिदघ्ने जले यज्ञियवृक्षोद्भवो धर्मस्तंभः कार्यः॥ तत्सन्नि
धौ पश्चिमतीरदेशे शोध्यकर्णाच्छि ततोरणं कार्यं। तत्समीपे षडुत्तरशतांगुलं वैणवं धनुरानीय साप्रावे रामः ॥४९॥

णवा मध्यमः शराश्च स्थाप्याः तोरणात्सर्वत्र शतहस्तमिते तु देशे लक्ष्यं स्थाप्यं ततः स शरं धनुः श्वेतगंधमाल्या
दिभिः संपूज्य जलाशयवरुणावावाह्य पूजयित्वा तत्रैव निधर्मावाहनादि पूर्ववत्कृत्वा तं पूर्वोक्तं निर्वर्त्य शोध्यशिर
सि प्रतिज्ञापत्रमाबध्य प्राड्विवाको जलमभिमंत्रयेत्। देवे तोयत्वं प्राणिनां प्राणसृष्टेः राममनुनिर्मितः शुद्धेश्च
कारणं प्रोक्तं द्रव्याणां देहिनां तथा॥ अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे इति॥ ततः शोध्योपि सत्येन
मा निरक्ष त्वं वरुणेत्यभिमंत्रयेत्॥ क्षत्रियस्तु ह्रतिवा सगुणे धानायसमाबद्ध त्रीन्शरान्लक्ष्यं प्रति क्षि
ष्टं क्षिपेत्। ततः एकस्मिन्नविनिःपुरुषे मध्यमं शरं गृहीत्वा तस्य प्रसर्पणस्थानं विहाय पतनस्थाने स्थितेन्य
नजविना शरमोचनस्थानं नेतारणं तत्र लक्ष्यातवं जवी चयं च ह्याती धावकानां मध्ये जवाधिका ततस्तोरणमूलं
स्थितेन प्राड्विवाकेन करतालिकात्रये दत्ते तत्तृतीयकरतालसमकालमेव शोध्यतोरणमूलस्थजविध्याम
ज्ञेन तु तत्र गमनं कार्यं। मज्जनं चावष्टंभधर्मस्तंभस्यारुहृत्वा कार्यं। ततस्तस्मिन्मध्यमशरपात
स्थानं गते तत्र स्थितः शरग्राही तु ततस्तोरणं गत्वा जलांतर्गतं शोध्यं यदा प्रपश्यति तदा सौ शुद्धः॥ शिरोमात्र

दर्शने विशुद्धो नकर्णो प्रमांतरदर्शने निमज्जनस्नानादनृत्रगते वा॥ इत्युदकविधि॥ अथ विषदिव्यविधि
॥ तत्र नारदः॥ दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ॥ धूपोपहारमंत्रैश्च पूजयित्वा महेश्वरं॥ द्विजा
नां सन्निधावेव दक्षिणाभिमुखे स्थिते॥ उदङ्मुखः प्राङ्मुखो वा दद्याद्विप्रः समाहितः॥ वर्षे चतुर्यवा मात्रा या
ग्रीष्मे पंच यवाः स्मृताः॥ हेमंते सप्तयवा शरद्यल्पा ततो पि हि॥ अल्पात्पिपवा हेमंते शिशिरस्याप्युपलद्वादशः
तयोः समासस्मृते॥ वसंतस्य सर्वदिव्यसारणे नम्राख॥ तत्रापि सप्तयवा मात्रेयि विज्ञानेश्वरः॥ विषं त्रि
शाङ्गुलं षष्ठं नपुंदेयं पूर्वाह्ने शीतले देशे विषं देयं तु देहिनां॥ घृतेन योजितं सम्यक् पिष्टं त्रिंशद्गुणान्वितः॥ मि
तिकात्यायनोक्तः॥ विषाभिमंत्रणमाह याज्ञवल्क्यः॥ विषत्वं ब्रह्मणः पुत्र सत्यधर्मे व्यवस्थित॥ त्रायस्वा
स्मादभिशापात्सत्येन भव मेऽमृतं॥ नारदः॥ छायाविवर्जिते तिष्ठेद्दिनरोषममोजनपि विषवेगक्लमा　राम:
तीतः शुद्धो सौ मनुरब्रवीत्॥ विषपरिमाणबाहुल्येत्वव ध्यतरमाहस एव॥ पंचतालप्रशांतकालं निर्विका
रो भवेद्यदा तदा भवति संशुद्धस्ततः कुर्याच्चिकित्सितमिति विषवेगास्त्वविषतंत्रे॥ वेगो रोमांचो स्वचपति　॥४५१॥

विषजः स्वेदवक्त्रोपशोषौ तस्मौ धूर्त्तस्तृतीयो वपुषि जनयतो वर्णभेदं चतुर्थे॥ यो वेगः पंचमोसौ नयनविव
र्णतां कंठभंगं च हिक्कां षष्ठे निश्वाससंमोहौ विज इति च सप्तमो नष्टा कष्ट॥ अत्र सोपवासेन प्राड्वि
वाकेन महादेवाये विषं संस्थाप्य निमज्जयेदिति॥ अथ कोशविधि॥ पितामहः॥ नक्तो यो यस्य देवस्य पा
पयेत्तस्य तज्जलं॥ समनावे तु देवानां आदित्यं तु पाययेत्॥ दुर्गायाः पाययेच्चौरान्ये च शस्त्रोपजीविनः॥ भास्क
रस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत्॥ बृहस्पतिः यज्ञकः सोभियुक्तोः स्नातः देवाधुधर्मंडलं॥ प्रक्षाल्य पाययेत्तस्मा
ज्जलात्तु प्रसृतित्रयं॥ नारदः॥ तमाहूय निराहारं तु मंडलाभ्यंतरे स्थितं॥ आदित्याभिमुखं कृत्वा पाययेत्प्र
सृतित्रयं पूर्वोक्तेन विधानेन स्नातमार्द्रविवासं शुचि॥ नारदः॥ अर्चयित्वा तु तं देवं प्रक्षाल्य सलिलेन
तु॥ एनश्च श्रावयित्वा तु पाययेत्प्रसृतित्रयं॥ अत्र सोपवासः प्राड्विवाकः सर्वाणे हे देवमभ्यर्च्य तत्स्नानो
दकं गृहीत्वा धर्मावाहनादि शिरःपत्रारोपणांतं कृत्वा जलं दिव्योक्तमंत्रेणाभिमंत्रयेत् शोध्यो
पितदुक्तेनैवाभिमंत्र्य भक्षयेदिति॥ बृहस्पतिः॥ स ग्राह्यो दाडिमग्राह्यश्च स्यादिति नैप्रदर्शते॥ पुत्रदारधना

व्या॰ म॰

॥३२॥

नोचेत्स शुद्धः स्यान्न संशयः॥ अथ तण्डुलविधिः॥ पितामहः॥ तण्डुलानां प्रवक्ष्यामि विधिं ब्राह्मणयोधितं चौर्ये ति
तण्डुला देया नान्यत्रेति विनिश्चयः॥ तण्डुलाः कार्याः शुक्ला नशालेर्नान्यस्य कस्यचित्। मृन्मये भाजने कृत्वा
आदित्यस्याग्रतः शुचिः॥ स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत्। आवाहनादि पूर्ववत्तु कृत्वा रात्रौ विधा
नतः॥ कात्यायनोपि॥ देवतास्नानपानीयदिग्धतण्डुलभक्षणे। शुद्धनिष्ठीवनाच्छुद्धो नियमो शुचिरन्यथा
पितामहः॥ शोणितं दृश्यते यस्य हनुस्तालु च शीर्यति। गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत्॥ अथ तप्त
माषविधिः॥ पि॰ तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभम्। कारयेदायसं पात्रं ताम्रं वा षोडशाङ्गुलम्। चतुरङ्गु
लखातं तु मृन्मयं वापि मण्डलं। पूरयेद्घृततैलाभ्यां विंशत्या तु पलैस्ततः। सुवर्णमाषकं तस्मिन्सुतप्ते
निक्षिपेत्ततः॥ अङ्गुष्ठाङ्गुलियोगेन तप्तमाषकमुद्धरेत्। कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते शु राम॰
द्धो भवति धर्मेण निर्विकारकरांतरः मात्मन्सएवा सौवर्णे राजते ताम्रे आयसे मृन्मयेपि वा॥ गव्यं घृतमु
पादाय तद्वयं तापयेच्छुचिः। सौवर्णे राजते ताम्रे आयसे वा शुभोमितः। सलिलेन सकृद्धौतो प्रक्षिपे ॥४८२॥

त्तत्र मुद्रिकां॥ भ्रमद्वीचितरंगाढ्ये अनखस्पर्शगोचरे। परीक्षेत्ततः पर्णेन चुरुकारं तु घोषकं। ततस्थानेन मं
त्रेण सकृदभिमन्त्रयेत्। परं पवित्रममृतं घृत त्वं यज्ञकर्मणि। दह पावक पापं त्वं हिमशीतं शुचौ भव। उपो
षितं ततो स्नातमार्द्रवाससमागतं। ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा॥ प्रदेशिनीं च तस्यापि परीक्षेयुः
परीक्षकाः। यस्य विस्फोटका न स्युः शुद्धोसावन्यथाशुचिः॥ अथ फालविधिः॥ बृहस्पतिः॥ आयसं द्वादश
पलं घटितं फालमुच्यते। अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तृतं। अग्निवर्णं तु तच्चौरो जिह्वया लेलिहेत्सकृ
त्। न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते॥ अथ धर्मजविधिः॥ पितामहः॥ अधुना संप्रवक्ष्यामि धर्मपरीक्षणं
हेतूनां पापमानानां प्रायश्चित्तार्थिनां नृणां। राजतं कारयेद्धर्ममधर्मं सीसकायसं। लिखेद्भूर्जपटे वापि धर्मा
धर्मौ सितासितौ। अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत्। सितपुष्पस्तु धर्मः स्यादधर्मोसितपुष्पधृक्।
एवं विधाय पलिप्य पिण्डयोस्तौ निधापयेत्। गोमयेन मृदा वापि पिण्डौ कार्यौ समं ततः। मृद्भाण्डके उपहते स्थाप्यौ चा
नुपलक्षितौ। उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ। आवाहयेत्ततो देवान्लोकपालांश्च पूर्ववत्। धर्मावा

अ॰म॰
॥३२॥

हनपूर्वंतुप्रतिज्ञापत्रकंलिखेत्।यदिपापविमुक्तोहंधर्मस्त्वायातुमेकरे।अभियुक्तस्तयोश्चैकंप्रगृह्णीता
वि॰लंबितः।धर्मेगृहीतेशुद्धःस्यादधर्मेतुसहीयते।एवंसमासतःप्रोक्तंधर्माधर्मपरीक्षणं।बृहस्पतिःप
त्रद्वयलेखनीयौधर्माधर्मौसितासितौ।जीवदानादिकैर्मंत्रैर्गायत्र्याद्यैश्चसामभिः।आमंत्र्यपूजयेद्गंधैःकुसु
मैश्चसितासितैः।अभ्युक्ष्यपंचगव्येनमृत्पिंडान्तरितौततः।समौकृत्वातुनिक्षिप्यौचानुपलक्षितौ।ततःकुं
नास्थितमेकंप्रगृह्णीताविलंबितः।धर्मेगृहीतेशुद्धःस्यात्संपूज्यश्चपरीक्षकैः।अथप्रयोगः।पत्रद्वयेशुक्लं
धर्मंकृष्णमधर्मंपुत्तलकरूपंविधायप्रोक्ष्यक्षोंक्षोंदंयंरंलंवंरायसदोसोधर्मस्यप्राणाःपुनरपामंत्रपवि
त्वाधर्मस्याजीवइहस्थितः।पुनरपितमेवपठित्वाधर्मस्यचेंद्रियाणिवाङ्मनोनेत्रश्रोत्रघ्राणप्राणाइहा
गत्यसुखंचिरंतिष्ठंतुस्वाहा।इत्यनेनजीवदानंधर्मप्रतिमायां।कृत्वागायत्र्यादिसामज्ञानेतेनैवनोचेतत्सव्याहृ
तिप्रणवगायत्र्यापठित्वाआवाहनादिकृत्वायथाक्रमंशुक्लकृष्णपुष्पाभ्यांधर्माधर्मौसंपूज्यप्रणवेनपंच राम॰
गव्यमादायाभ्युक्ष्यशुक्लपटेप्युक्तौअधर्मंमृत्पिंडद्वयेकृत्वानवेकुंभेस्थापयेत्प्राड्विवाकः।ततोधर्माव ॥[illegible]॥

हनादिहवनांतंकर्मकृत्वासमंत्रकप्रतिज्ञापत्रंसंशोध्यशिरसिबध्नीयात्।शोध्यश्चयदिपापविमुक्तोहंधर्मस्त्वा
यातुमेकरमित्युच्चार्यकुंभात्तयोरेकंगृह्णीयात्।धर्मेगृहीतेशुद्धइतिततोदक्षिणांदद्यात्।अथशपथाः।
मनुः।सत्येनशापयेद्विप्रंक्षत्रियंवाहनायुधैः।गोबीजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः।बृहस्पतिः।सत्यंवा
हनशस्त्राणिगोबीजकनकानिच।देवब्राह्मणपादांश्चपुत्रदारशिरांसिवा एतेचशपथाःप्रोक्ताःस्वल्पेर्थेतु
कराः।महासाहसेधनिक्षेपेतुदिव्यान्याहुर्विशोधनं।याज्ञवल्क्यः।अर्वाक्चतुर्दशादह्नोयस्यनोराज
दैविकं।व्यसनंजायतेघोरंसशुद्धःस्यान्नसंशयः।घोरंमहत्स्वल्पदेहिनापरिहार्यत्वादितिमिताक्षरायां।कात्याय
नोपि।त्रिचतुर्दशाकादह्नोयस्यनोराजदैविकं।व्यसनंजायघोरंसज्ञेयःशपथैःशुचिः।व्यसननमायत्।घोरमु
तिपीडाकरंस्वल्पस्यशरीरधर्मत्वादितिवाचस्पतिमिश्रस्मार्तभट्टाचार्योपुनःकात्यायनः।अपदैवविसं
वादेदिवसमाहंतुदापयेत्।अभियुक्तंप्रयत्नेनतमर्थंदंडमेवच।तस्यैकस्यनधर्मस्यजातस्यपृरितभवेत्।रागो
त्रिज्ञातिमरणीदात्राणांदाप्याहमेवच।ज्वरातीसारविस्फोटगंडास्थिपरिपीडनं।नेत्ररुग्गलरोगस्तुस्तथोन्मा

व्य·म·
॥२३॥

दः प्रजायते॥ चिरोरुग्णजडोन्मत्तदैविकाव्याधयोऽनृणं॥ दैवविसंवादे ज्ञातिमरणादौ तस्यैकस्येति॥ तेन देशाव्या
पकमर्यादिव्यापकमर्यादिव्यावृत्तिः॥ अत्र तस्येत्यनेन पूर्वोक्तानियुक्तपरामर्शाद् नियुक्तस्यैव रोगादिर्नि
गलितं॥ ननु तत्सुतादेः सोऽपि च महानल्प स्वल्प इति प्रागेवोक्तं॥ एतदभिप्रायेणैवाभिप्रायेणैवा नियुक्तस्यैव सा
धारणरोगादिनगलितमित्यर्थ इति वाचस्पतिमिश्राः॥ अत एव ज्ञातिमरणमित्येवोक्तं न तु ज्ञातिरोगादिरिति
अपरायादिनिर्णयोगिस्वल्पो॥ तत्र क यत्र तिर्यग्हारिजन्यः शक्तिविशेषः॥ तत्कारणता तु कयादानां लोकव्यवहा
राद् एव गम्यते॥ न शास्त्रात्॥ तदनभिज्ञानामपि तद्दर्शनात् शास्त्रकल्पनायोगेरवाच्चा॥ न पवि वेके भवनापाये
वं॥ यत्तु गौतमः॥ स्वामिरिकथक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं विजितं क्षत्रियस्य नि
र्विष्टं वैश्यशूद्रयोरिति तल्लोकसिद्धकारणानुवादको॥ स्वामि स्वत्वधर्मस्मार्तेणपत्वे नवतितस्मिन् रिक्थ
मिति प्रसुंजलोको॥ क्रयप्रतिग्रहादिवारपितुर्मात्रपदं॥ अत्र तादृश मरणवरिकथ पदे शाक्यं॥ कायादिस्वत्वो
पाप्तमजिव्याहारात्॥ नागृहीतविशेषणान्यायाच्च पितरि जीवति तद्द्रव्ये पुत्रादीनां पूर्वमनुत्पन्नमेव स्व

रामः
॥४९॥

त्वं ~~~ इत्येवमादिवचनेन पुसंविभागे न जन्यते इति धारेश्वराचार्य स्मृतिसंग्रहकारश्च तन्न॥ उत्पत्त्यैवार्थ
स्वामित्वं लभेतेत्येवमादिवचनेन पुत्रोत्पत्तेरेव पितृधने पुत्रनिरूपितस्वत्वोत्पादकत्वावबोधनात्॥ न्यूयपि
तामहोत्पात्तानि बन्धोऽयमे वच॥ तत्रस्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोरिति याज्ञवल्क्यवचनाच्च॥ न चेदं पिता
महमरणे तस्यैव स्वत्वोत्पत्तिहेतुत्वं गमयति न पुत्रोत्पत्तेः॥ मरणकालेनुत्पन्ने पौत्रे तदभावप्रसंगात्॥ वस्तुतस्तु
पितामहधनमपि विवक्षितं अन्यथा प्रपितामहाद्युपात्ते सदृशस्वाम्याभावप्रसक्तेः॥ अनुवादविशेषणत्वाच्च
यत्तु देवलः॥ पितर्युपरते पुत्रा विभजेयुर्धनं पितुः॥ अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थित इति तत्र पूर्वार्द्धं
तावद्विभागकालविधायविधिप्रत्ययश्रवणात्॥ उत्तरार्द्धं तु तस्यैव वक्तव्यार्थतयाऽस्वातंत्र्यपरं न तु स्वत्वाभा
वपरं॥ एतेन न जीवति पितरि पुत्रा रिक्थं भजेरन् यद्यपि स्यात् पश्चादधिगतं तैरर्हा एव पुत्रा स्वधर्म
परस्वातंत्र्यादिति शंखवचो पिव्याख्यातं पूर्वनिषेधार्थवादरूपं नतरास्वातंत्र्येक्तिरिति पद्य पितैः पश्चादपि
गतन्वयः ते पुत्रैः॥ पश्चादुत्पन्नैः॥ अधिगतं प्रतिग्रहादिना प्रत्तं पुत्रं दिभिः॥ प्रतिगृहीते स्वत्वाविवाद॥

व्य.म.
।।२४।।

तत्राप्यस्वातंत्र्यं किमुत पित्रर्जित इति प्राप्तं तात्पर्यार्थः ॥ इदं चास्वातंत्र्यं विभागकाम्यधर्मव्यवसायादिविषये । अ
त एव हारीतः । जीवति पितरि पुत्राणामर्थादानविसर्गविभागाक्षेपेष्वस्वातंत्र्यमिति । आदानविसर्गपदेन व्य
वसायो लक्ष्यते । आक्षेपो दास्यादिनिर्भर्त्सनमिति मदनः । यत्तु मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः । स्थाव
रस्य तु सर्वस्य न पिता न पितामहः । इति तत्कुटुंबोपजीव्यकधारणादावेव पितुः स्वातंत्र्यमात्रार्थं न तु दाना
दौ न वा पुत्रोत्पन्ने स्वत्वकारणत्वनिहृत्यर्थं ॥ भोगानामपमणपूहुपादानादप्येष एवार्थः प्रतीयते । अत
एव स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितं । असंभूय सुतान्सर्वान्न दानं न च विक्रय इति दानविक्रयादीनामे
व निषेधो न भोगस्य । अतः पूर्वमपरिछिन्नं संविभागेन व्यवस्थाप्यते । तत्र समुदितद्रव्यगतपूर्वस्वनाशेन
नदेशविलक्षणं तदुत्पद्यत इति केचित् । युक्तं तु पूर्वनाशस्वत्वांतरोत्पत्तिकल्पने गौरवात् पूर्वमेकदेशाश्रि
तमेवोत्पन्नं विभागेन विपदार्थविशेषनिष्ठतया ज्ञाप्यते ॥ प्रकृतमुच्यते । ब्राह्मणस्याधिकं लक्ष्यमिति । अतिय
ह लक्ष्य विप्रस्याधिकं फलजनकमिति केचित् । रिक्थार्थापेक्षया विप्रस्यैवायमधिकल्पायः । एवं द्वित्रिया
रामः
।४९५।

देर्जयादिरिति तु युक्तं जयेपि जितस्य पत्रग्रहे देतुत्न सादौ स्वत्वमामा । तत्रैव जेतुरस्वत्वं यतेजितस्य करंग्राहि
तायां तु जेतुरपि नैव न स्वत्वं । अत एव समर्वं भौमेन संपूर्णो हप्यामां डलिकं न वमंडलं नदेयमित्युक्तं षष्टे । सं
पूर्णपृथिवीमंडलस्य तत्तद्ग्रामक्षेत्रादौ स्वत्वं तु तत्तद्भौमिकादीनामेव । राज्ञां तु करग्रहमात्रं । अत एव इदा
नींतनपारिभाषिकक्षेत्रदानादौ न भूदानसिद्धिः । किंतु वृत्तिकल्पनमात्रमेव । भौमिकेन क्रीते तु गृहक्षेत्रादौ
स्वत्वमप्यस्त्येव । तेन तत्र भूदानस्यापि फलं भवति । निर्विष्टं कुसीदकृषिवाणिज्यपशुपालनलक्षणं सेवालक्षणं
च । निर्वेशो भृतिर्भोग्यो रित्यभिधानात् । भृतिसेवा भोगकुसीदादि । तत्राद्यं वैश्यस्य ॥ द्वितीयं शूद्रस्य । अतो लौ
किकसिद्धैव क्रयादीनां कारणत्वं वस्त्वायगवादिजातस्यादौ स्वत्वव्यवहारासंगच्छते उपायानां शास्त्रगम्यत्वे तु न
स्यात् । स्वायगवादिजनन कृतौ पापस्य शास्त्रेणावबोधनात् । न तु स्वायगवादिजननेव स्वत्वनाशोपायास्तु तस्या कन्या
पुत्रादायपि स्वत्वस्यात् । इष्टापत्तौ विश्वजिति सर्वस्वं ददातीति विहिते सर्वस्वदाने कन्यापुत्रादिदानापत्त्याक
न्यापुत्रादि न देयमिति षष्ठसिद्धांतविरोध इति चेन्न गवादाविव भार्यायां स्वत्वाभावेन तस्याः सुतस्य तु पत्त्येपि

द्भावात्॥ लोके च स्वस्य त्वादीन्द्रतोत्पन्नैरेव स्वत्वकरणत्वेऽशुमं भार्यायामपि प्रतिग्रहेण स्वत्वस्यादेवेति चेन्न
क्षत्रियादीनां प्रतिग्रहाभावेन तज्ज्ञापीसुस्वत्वाभावात् तदयमेव पितद्भाव॥ तेन सजातीयेष्वयं प्रोक्तस्तनयेषु
मया विधिरिति सजातीयस्यैव दत्तकस्य ग्राह्युतात्॥ क्षत्रियादीन्प्रति तावद्दत्तकप्रतिग्रहो गौण एव चन॥
विप्रान्प्रति समुख्यः संभवति तद्विधौ युगपद्वृत्तिद्वयविरोधात्॥ न च पुत्रप्रतिग्रहविधिर्विप्राधिकारिक एव
न क्षत्रिया॥ द्यधिकारिक इति वाच्यं दौहित्रो भागिनेयश्च शूद्रस्यापि च दीयत इत्यादि शौनकादिवचोभिस्तद
धिकारिकत्वस्यापि अवगमात्॥ एवं ब्राह्मणविधिना क्षत्रियादिकन्यया सह विप्रस्योद्वाहे दानप्रतिग्रहयोगेण
त्वमंगीकार्यं अन्यत्र मुख्यत्वमिति वृत्तिद्वयविरोधः॥ क्षत्रियान्प्रति ब्राह्मादिविवाहप्रवृत्तिरुक्ता सर्वेषामपि प्र
तिपत्तैव॥ अतएव पुत्रादीनां दानं गौणमिति तंत्ररत्ने मिश्राः॥ न च स्वभार्यापुत्रकन्या इति शाङ्खः क व्यवहा
रात्स्वत्वकल्पना॥ तस्य खः पिता स्वामातोत्पादाविवज्ञातिवाचकत्वेनाप्युपपत्तेः॥ अस्ति च ज्ञाताविपि स्वश
ब्दस्य शक्तिः॥ स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इति कोशात्॥ मनुस्तु षष्ठे गर्भदानमुक्तं तच्चिंत्यं॥

राम:
॥धर्म ६॥

:तन्मातरि मुख्यदानप्रतिग्रहक्रयविक्रयाद्यभावेन स्वत्वाभावेन तदसंभवेन गर्भदासे सुतरां तदयोगात्॥ इत्यानुष
संगिकं॥ अथ दाय॥ असंसृष्टैर्विभजनीयं धनं दायः॥ तानाह संसृष्टधनव्यावृत्तये असंसृष्टैरिति विशेषणं॥ इतरे
कीकृत्य विभज्यमाने दायभागशब्दप्रयोगात्॥ एवं वक्ष्यमाणपरिभाषिकसंसृष्टित्वेऽपि निवृत्तिः॥ अत
एव स्मृतिसंग्रहे॥ पितृद्वारागतं द्रव्यं मातृद्वारागतं च यत्॥ कथितं दायशब्देन तद्विभागोऽधु
नोच्यत इति॥ विघंटो वा॥ विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिण इति॥ पितृपदं संबंधिमात्रोपलक्षणं॥ अयं
दायो द्विधा सप्रतिबंधोऽप्रतिबंधश्च॥ यत्र धनस्वामिनः पुत्रादेरजीवनं प्रतिबंधकं स सप्रतिबंधः॥ यथा
पितृव्यादिधनं॥ यत्तु स्वामिसंबंधादेव पुत्रादेर्धनार्जनोपायांतरनिरपेक्षात्स्वत्वं भवति सोऽप्रतिबंधो यथा पितृ
धनं इति दायस्वरूपं॥ अथ तद्विभागः॥ तमाह नारदः॥ विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते॥ दायभाग
इति प्रोक्तं तद्विवादपदं बुधैः॥ पुत्रैरिति पुत्रादीनामप्युपलक्षणं॥ पित्र्यस्येति पितामहादीनां॥ मदनरत्ने पित्रा
देरिति च पपाठः॥ इदं च दायभागस्वरूपमुक्तं द्रव्यासाम्याभावे पितृतो द्वैविभक्त इति व्यवस्थामात्रेणापि भव

व्य·म:
॥ ३६॥

त्रैव विभागः। वृद्धिविशेषमात्रमेव बहिर्विभागः। तस्यैवाभिव्यंजिकेयं व्यवस्था। अथ विभागकालः। मनुः। ऊर्ध्वं पितु
श्च मातुश्च समेत्य भ्रातरः समं। भजेरन्पैतृकं रिक्थं अनीशास्ते हि जीवतोः। वृद्धाश्रेयादाने पि मरणमनुद्दीयो
न विभिद्येत। अत एव मदनरत्ने स्मृतिसंग्रहे। पितृद्रव्यविभागः स्याज्जीवतामपि मातरि। न स्वतंत्रतया स्वा
म्यं यस्मान्मातुः पतिं विना। मातृद्रव्यमपि विभागो पितर्य्यजीवति। पुत्त्वपत्न्येषु यस्मान्न स्त्री धनस्य पतिः पतिः। ए
तदप्यवदति बृहस्पतिः। पितुरभावे भ्रातॄणां विभागः संप्रदर्शितः। मातुर्निवृत्ते रजसि जीवतोरपि शस्यते। नार
दः। अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समं। मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च। निवृत्ते वापि रमणे पितर्युप
रतस्पृहे। रमणः कामः उपरतस्पृहो विरक्तः। प्रत्तासु भगिनीषु चेति काकाक्षिवद्रजोरमणनिवृत्त्योर्विशेषणं गौ
तमः। ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन् निवृत्ते रजसि मातुर्जीवति पितरि इच्छतीति। इच्छतीत्यनेन रजोनिवृत्तिं विना
पि पितुरिच्छया विभाग उक्तः। क्वचिन्निर्दिष्टं विनापि विभागमाह बृहस्पतिः। क्रमागते गृहक्षेत्रे पिता पुत्राः समांशि
नः। पैतृके न विभागार्हाः सुताः पितुरनिच्छया। अथ पार्थ्यैतामहार्जिते तदनिच्छयापि विभागार्हा इत्यर्थः। पैतामहे पि राम:
।४९७॥

॥ क्वचित्पितुरिच्छयैव विभागमाह मनुर्विष्णुः। पैतृकं तु पिता द्रव्यमनवाप्यं यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्धमका
मः स्वयमर्जितं। बृहस्पतिः। पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितं। विद्याशौर्यादिना वाप्तं तत्र स्वाम्यं पितुः स्मृ
तं। प्रदानं स्वेच्छया कुर्याद्भोगं चैव ततो धनात्। नारदः। व्याधितः कुपितश्चैव विषयासक्तमानसः। अन्यथाशा
स्त्रकारी च न विभागे पिता प्रभुः। हारीतः। अकामं पितरि रिक्थभागो बहवे विपरीतचेतसि दीर्घरोगिणि चेति अ
कामे विभागेच्छारहित इति मदनरत्ने। विपरीतचेता अधर्म्मवर्ती पितुरिच्छायामपि विभागो भवतीति भा
वः। पितर्यसमर्थे ज्येष्ठपुत्रानुमत्या विभागमाह हारीतः। कामं दीने प्रोषिते व्यार्त्ते निर्गते ज्येष्ठो पर्यश्चितयेदिति
शंखलिखितौ। पितर्यशक्ते कुटुंबस्य व्यवहारं ज्येष्ठः कुर्यादनंतरो वा कार्यज्ञस्तदनुमतेनेति। अनंतरोऽनु
जः। कुटुंबभरणादिसमर्थेषया विभागः। सर्वेषां तयोस्त्वेत्व नियम इति निष्कर्षः। याज्ञवल्क्यः। विभागं चेत्पिता कु
र्यादिच्छया विभजेत्सुतान्। ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः। ऐच्छिकविभाग एव तत्र उत्तरार्द्धेनाइच्छा
यामेव भवति उक्तः पूर्वार्द्धे यालं ननत्वे स्वानंत्रायोगात् वाक्यभेदापत्तेः। एकस्मै तदसं कस्मैचित्किमपि कमन्यस्मै

व्य.म.

॥२७॥

न किमपीत्यव्यवस्थापत्तेश्चान्येष्वविभाज्ये विशेषमाह मनुः। ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं। ततोऽर्द्धं मध्यम
स्य स्यात्तदर्द्धं तु कनीयसः॥ उद्धारेषु एतेषामियं स्याद्देशकल्पना॥ एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽपरः। अन्ये
मंशं समवाप्नुयुरिति धर्मो व्यवस्थितः। यमलयोर्मध्ये प्रथमप्रसूतस्य ज्यैष्ठ्यमनुराह। जन्म ज्येष्ठेन चाह्वानं सुब्र
ह्मण्यास्वपि स्मृतं। यमयोश्चैव संज्ञासु जन्मतो ज्येष्ठता मता॥ यस्य जातस्य यमयोः पश्यंति प्रथमं मुखं। संतानः पित
रश्चैव तस्मिन् ज्येष्ठ्यं प्रतिष्ठितमिति। यत्तु पिंडसिद्ध्यादिवैदिककार्येष्वनंतरप्रसूतस्य ज्यैष्ठ्यमुक्तं। तदनेन कार्यां
शो बाध्यते तस्याकृतिमृजत्वात्। मासेनस्तु द्वौ न बुनातिवत्। यत्तु। द्वौ तदा नवतो गर्भौ स्मृतिर्वेशो विपर्ययादित्यादि
ना। भागवते पश्चाज्जातस्य ज्यैष्ठ्यमुक्तं तदप्यनेन बाध्यते। पुराणेषु स्मृतिविरुद्धाचाराणां बहुशो दर्शनात्
देशाचारतो व्यवस्था ज्ञेयेति केचित्। युक्तं तु पूर्वोक्तमेवायं चोद्धारविभागः कलौ निषिद्धः कलिवर्ज्येषु
पाठात्। निर्णीते चेदं समयमद्यसर्वस्मान्निः। पितुरंशाद्यमाह नारदः। द्वावंशौ प्रतिपद्येत विभजन्नात्मनः
पिता॥ इदं चैकपुत्रपरं। सपद्यैकपुत्रः स्याद् द्वौ भागावात्मनः कुर्यादिति शंखलिखितोक्तेरिति मदनरत्ने। ए

रामः

॥धरणी॥

कपदं श्रेष्ठपरं। एकमुख्यान्यकेवलाहत्यमरोक्तेः॥ गुणवृत्तुत्र इति पापदिति पारिजाते पितामहार्जिते चैक
पुत्रेणापि समं स्वाम्यमाह बृहस्पतिः। द्रव्ये पितामहोपात्ते स्थावरे जंगमे तथा। सममंशित्वमाख्यात
पितुः पुत्रस्य चैव हि। याज्ञवल्क्यः। भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा। तत्र स्यात्सदृशं स्वाम्यं पितुः पु
त्रस्य चोभयोः। कात्यायनः। सकलं द्रव्यजातं पज्ञागंर्भ्यं तिनस्तमैः। पितरो त्वाम नरश्चैव विभागो धर्मतो
च्यते। यत्तु याज्ञवल्क्यः। न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृत इति। तत्रापि पितृकृतो धर्म्यः श्रुत्युक्तेन
प्रकारेणेति य इति मदनविज्ञानेश्वरादयः। यदपि नारदः। पितृवत्तु विभक्ता ये सममन्यूनाधिकैर्धनैः। तेषां स
एव धर्मः स्यात्सर्वस्य हि पिता प्रभुरिति तद्गुणांतरपरं। स्वस्य पुत्राणां च समांशपक्षे पत्न्यश्च पुत्रसमांशहया
ज्ञवल्क्यः। यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिकाः। न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वेति
दत्ते त्वर्द्धं देयं। दत्ते त्वर्द्धं प्रकल्पयेदिति वचनात्। अर्द्धं पूर्वदत्तस्त्रीधनं यावता पुत्रांशसमं भवति तावद्वि
त्यर्थः। अंशाधिकधनायास्तु नांशः। अर्जनसमर्थस्य पुत्रस्य दापनिच्छा नावेच्छा हस्त एवांशकस्यानीह

मानस्यकिंचिद्दत्वापृथक्क्रियाकिंचिद्दानंचतत्पुत्राणांदायजिघृक्षार्थमितिमिताक्षरायां।पितृमरणानंत
रसमविभागउक्तौनैव।विभजेरन्सुता।पित्रोरूर्ध्वंरिक्थमृणंसमं।हारीतःसमानोंशोन्तेपितरिरिक्थ
भागइतियाज्ञवल्क्य।पितुरूर्ध्वंविभजतांमाताप्यंशंसमंहरेत्।विष्णुः।मातरःपुत्रभागानुसारिभागहारि
ण्यः।स्मृत्यंतरे।जननीत्वधनापत्नैविभागेंशंसमंहरेत्।सधनातुयावतात्वधनस्यपुत्रांशसमंभाग
तान्भवतितावतीतावदेवहरेदित्यर्थः।स्वंशाधिकधनायास्तुनांशः।सपत्न्मातु।पितामह्यश्चांशमाह
व्यासः।असुतोस्यापितुःपत्न्यःसमानांशाःप्रकीर्तिताः।पितामह्यश्चताःसर्वामातृतुल्याःप्रकीर्तिता।पु
र्वाइत्यनेनपितामहीसपत्न्यपिगृह्यते।अनेकभ्रातृपुत्राणांविभागप्रकारमाहयाज्ञवल्क्यः।अनेकपि
तृकाणांतुपितृतोभागकल्पना।एकस्यैकःपुत्रोपरस्यद्वावन्यस्यत्रयस्तेषांपितृसंख्ययैवविभागोनवि
भाजकसंख्ययेत्यर्थः।कात्यायनः।अविभक्तेनुजेप्रेतेतत्सुतंरिक्थभागिनंयेनलब्धंनैवपितामहान्।
लभेतांशंसपित्र्यंतुपितृव्यात्तस्यवासुतात्।सएवांशस्तुसर्वेषांभ्रातॄणांन्यायतोभवेत्।लभेततत्सुतो

राम:
।।४९९०

वापिनिवृत्तिःपरतोभवेत्।अनुजपदंज्यायसोप्युपलक्षणं।परंतु।प्रपौत्रात्प्रपौत्रपुत्रादिःपितृपितामहप्र
पितामहेषुमृतेष्वनंतरंवृद्धप्रपितामहेमृतेऽन्यस्मिंश्चतत्पुत्रादिकेजीवतितद्धनंनलभते।पुत्रपौत्रसा
मान्याभावेसोपिलभेतएवेत्यर्थः।इदंचनाविभक्तपरंकिंतुसंसृष्टपरं।अविभक्तविभक्तानांकुल्यानांवसतांस
हान्योन्यंदायविभागःस्यात्।आचतुर्थादितिस्थितिरितिदेवलोक्तेः।अविभक्तविभक्तानांवृद्धप्रपितामहतत्पुत्रा
णांचसंसृष्टिनामित्यर्थः।इदंचसमदेशस्थितपरं।देशांतरस्थस्तुपंचमादिरपिलभतएव।वृक्षणंजेरव्यागृहक्षे
त्रंयस्यपैतामहंभवेत्।चिरकालप्रोषितोपिविभागभागागतः।गोत्रसाधारणंत्यक्त्वायोन्यदेशंसमाश्रितः
तद्वंशस्यागतस्यांशःप्रदातव्योनसंशयः।तृतीयःपंचमश्चैवसप्तमश्चापियोभवेत्।जन्मनामापरिज्ञानेलभेतां
शंक्रमागतमितिदेशांतरप्रक्रमेपाठाद्बृहस्पतिःस्मृतेः।कश्चिन्मातृतोविभागमाहबृहस्पतिः।यद्येकजात
:बहवःसमानाजातिसंख्यया।सापत्न्यास्तैर्विभक्तव्यंमातृभागेनधर्मतः।व्यासः।समानजातिसंख्यायोजाताः
स्त्वेकेनसूतव।विभिन्नमातृकास्तेषांमातृभागःप्रशस्यते।एतत्सुदाहरणमाहबृहस्पतिः।सवर्णाभिन्नसं

रव्याये पुंभागस्ते पुत्रास्पते। विजातीयविभागमाह याज्ञवल्क्यः। चतुस्त्रिद्व्येकभागास्युः क्रमशो ब्राह्मणात्मजा
। क्षत्रजास्त्रिद्व्येकभागा विट्जास्तु द्व्येकभागिनः। ब्राह्मणात्मजा ब्राह्मणीक्षत्रियावैश्याशूद्रासुताः। क्षत्र
जाः क्षत्रियावैश्याशूद्रासुतास्तु विट्जा विट्शूद्रयोः। बृहस्पतिः। न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषां
पिता दद्यान्मृते विप्रासुतो हरेत्॥ देवलः। शूद्र्यां द्विजातिनिर्जातो न भूमेर्भागमर्हति॥ सजातावाप्नुयात्स
र्वमिति धर्मो व्यवस्थितः॥ भूमेरित्यादि प्राप्तायाः अपि द्रव्यस्य तुल्यमतएव अपरिणीतशूद्रापुत्रस्तु द्व्यां
शमपि न लभते। तथा च मनुः। ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्। यदेवास्य पिता दद्यात्तदेवास्य
धनं भवेत्॥ पितृमरणोत्तरं विशेषमाह बृहस्पतिः। अनपत्यस्य शुश्रूषागुणवान् शूद्रयोनिजः॥ लभेत जीवनं
शेषं सपिण्डाः समवाप्नुयुः॥ गौतमः। शूद्रापुत्रोऽप्यनपत्यस्य शुश्रूषुश्चेल्लभते वृत्तिमूलं। वृत्तिमूलं जीवनकारणं
स एव। शूद्रापुत्रवत्प्रतिलोमास्विति। प्रतिलोमास्त्वुत्पादकापेक्षयोत्कृष्टवर्णस्त्रीप्रसूतेष्वित्यर्थः॥ शूद्रेण
परिणीतायामुत्पन्ने विशेषमाह याज्ञवल्क्यः। जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत्। मृते पितरि

कुर्युस्ते भ्रातरोऽर्द्धभागिकं कामम्॥ पितुरिच्छया शूद्रेणेति पदात् द्विजातिनिर्दास्यामुत्पन्नस्य पितुरिच्छयापि नांशभा
क्। नापि पितृमरणोत्तरं अर्द्धभागपि पुत्राद्यभावे सर्वमिति मदनरत्नादिषु। विभागानन्तरोत्पन्नपुत्रे विशेषमा
ह बृहस्पतिः। पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः। यथा धने
तथर्णे च दानाधानक्रयेषु च। परस्परमनीशास्ते मुक्त्वाशौचोदकक्रियां। करणमत्र सत्वे तु पूर्वविभक्तेभ्यो
विभागग्रहणं विना तेन ऋणं नैव देयं रिक्थग्राहकऋणं दाप्य इति वचनप्रमाणत्वात्। कस्यचित्संसृष्टत्वे तु तेन सह
विभागः। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं। संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह इति मनूक्तेः। पितृमरणो
त्तरं विभागकालेऽस्पष्टगर्भायां मातरि तत्सपत्न्यां भ्रातृपत्न्यां वानन्तरमुत्पन्ने विशेषमाह याज्ञवल्क्यः। विभ
क्तेषु सुतो जातः सवर्णायां विभागभाक्। विभागश्चास्य वै भ्रात्रादिभिः स्वस्वांशतः किंचित्किंचिदुद्धृत्य य-
थास्वांशसमो भवति तथा कार्यः। विष्णुः। पितृविभागानन्तरोत्पन्नस्य विभागं दद्यात्। इदं च तदंशेषु रकसेवक
सहितेषु ज्ञेयं। तदसत्त्वे तु स एवाह दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात्। दृश्याद्विद्यमानत

व्य.म.

॥५०॥

तु भ्रातॄणां विभागकाले विशेषमाह वसिष्ठः अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासमापुत्रला
भादिति। एतच्छाकायेतिशेषमाह वसिष्ठः। अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासमापुत्र
लाभादिति। एतच्छाकायेतिशेष। पितृमरणोत्तरविभागे विशेषमाह बृहस्पतिः। असंस्कृता भ्रातरस्तु ये स्युस्त
त्र यवीयसः। संस्कार्याः पूर्वजेनैव पैतृकान्मध्यकाद्धनात्। यवीयं इति तु मदीयो भावश्छांदसः। भ्रातॄ
णां भगिनीनामप्युपनयनं तथा च नारदः। असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात्। संस्कार्या भ्रातृ
भिर्ज्येष्ठैः कन्यकाश्च यथाविधि। भगिनीसंस्कारे विशेषमाह याज्ञवल्क्यः। असंस्कृतास्तु संस्कार्या भ्रा
तृभिः पूर्वसंस्कृतैः भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकं। यज्जातीया कन्या तज्जातीयपुत्रस्य यावान्भाग
स्तस्य चतुर्थं चतुर्थमंशं प्रति भगिनि दत्वा ताः संस्कर्तव्या इत्यर्थः। दायग्रहणे च तुल्यत्वयोगितया मुख्य
गौणपुत्रव्यवस्थामाह याज्ञवल्क्यः। औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरे रामः
ण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतो मतः। क्षतायामक्षतायां ॥५०२॥

वा जातः पौनर्भवः स्मृतः। दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्व
यंकृतः। दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः। सवर्णायां धर्मप
त्न्यामुत्पन्न औरसः पुत्रो मुख्यः। पुत्रिकासुतो द्वेधा। तत्राद्यमाह वसिष्ठः। अभ्रातृकां प्रदास्यामि तुभ्यं क
न्यामलंकृतां। अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यतीति। अन्यमाह स एव। तृतीयः पुत्रिकैवेति। अस्मि
न्पक्षे कन्यैव पितुरौर्ध्वदेहिकं कार्यं। क्षेत्रजः अपुत्रपत्न्यां गुर्वाज्ञया देवरादेः सगोत्रेणोत्पन्नः। अक्षताया पू
र्ववोढ्रा तु कार्यां हतायां तेन तु क्षतायां वा वोढ्रन्तरेणोत्पन्नः पौनर्भवः। अत्र दत्तकभिन्ना गौणाः पुत्राः कलौ वर्ज्या
ः। दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रह इति तन्निषेधस्मृतेः। अथ दत्तकविधिः। मनुः। माता पिता वा दद्यातां
यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः। वसिष्ठः। मातृनाथे पितैव दद्यात्। पितृभावे मा
तैव। भयं सत्वे तु नैव पतिमरणे। आपद्ग्रहणादनापदि न देयः। अयं निषेधो दातुरेव पुरुपापोनेकवर्षति
ज्ञानेश्वरः। तन्न। अस्य वाक्यात् दृष्टार्थतयाकर्तृत्वावगमात्। यो चिद्दृष्टार्थत्वेनापि वा नियमादृष्टस्य चा

वत्पकत्वान्नदतिक्रमेकार्यविशेषप्रयोजकादृष्टमिद्धि। केचित्तापत्यछद्मस्यत्वापत्यागाद्यापत्तेरनापत्यरिसंरख्या
यकत्वाभावेननिषेधार्थकत्वं। किंत्वापद्देनिमित्तमात्रबोधकत्वमेव। नचनिमित्तकत्वेआपद्दिपुत्राद
नेप्रत्यवायापत्ति। एतद्वाक्यस्यसंज्ञासंज्ञिसंबंधनमात्रबोधकत्वात्। आपद्दिनिमित्तेदानविधायकत्वाभा
वात्। यदपि विवाहप्रकरणेतेनैवोक्तं। रोगिण्यादिनिषेधातिक्रमेदृष्टविरोधवाभार्यात्वंतत्स्यधतएवेति
तदप्युनेनैवायास्तं। सदृशंऊस्त्पन्नण्णदिभिर्नजात्या अतःक्षत्रियादिपिविप्रादेर्दत्तकोभवतीतिमेभातिपि
मद्दशंजातेतिउक्त्वान्नरःपुत्रश्चेदं। याज्ञवल्क्येन। औरसोधर्मपत्नीजइतिद्वादशापिपुत्राननुक्रम्यसजा
तीयेष्वयंप्रोक्तास्तनयेषुमयाविधिरित्युपसंहारत्। स्पष्टीकरिष्यतेचेदंवक्ष्यमाणशौनकत्वचोम्या। विज्ञा
नेश्वरोप्येवं। ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवइतिज्येष्ठस्यैवपुत्रकार्यकरणेमुख्यत्वात्सनदेयइत्ययम
पिनिषेधोदातुरेवनप्रतिग्रहीतुरित्यपिसमस्य। स्यादयंप्रतिषेधोदातुरेवपद्ये तम्यज्येष्ठदाननिषेधकतासा
न्ननुमास्तिमानाभावात्। पुत्रीभवतीत्यनेनपुत्रित्वमात्रोक्तावकरणायकरणेक्तिमात्रपरत्वाच्च अतएवपि

दृण्णामन्तरणश्चैवसतस्मात्सर्वमर्हतीत्यत्तर। र्दसंगछते। सर्वेद्रव्यंदत्तकस्यसुमानेवभवतिकन्यासज्ञे
योदन्निमासुतइतिसंज्ञासंबंधकवाक्यगतेनसइतिसर्वनाम्नामातापितृकर्तृकप्रीतिजन्यगुणकापत्तिमिस्क
दानकर्मान्नतसजातीयपुंसएवास्वर्षब्रासणासुपनीयततमध्यापयातेतितछ्छेनाष्टवर्षब्रास्णपुंस्तो
पनादिसंस्कृतस्पेवपरापुत्रतागतेनक्रममन्निम्मितिसमंतोदन्निमराष्टेदाननिर्वर्तकमर्त्वाविशेषाद
रायान्यस्मेवादत्तांकन्यामप्यभिधत्तइतिकेचिड्डकिःपरास्ता। पुत्रप्रतिग्रहप्रतिग्रहमाशौनकः। शौन
कोतंप्रवक्षामिपुत्रसंग्रहमुत्तमं अपुत्रोमृतपुत्रोवापुत्रार्थंसमुपोष्यवासमाकुंडलेदत्वाउस्नाषंचांगुली
यकं। आचार्यधर्मसंयुक्तंवैष्णवंवेदपारगं बार्हिकुशासनंचैवपालाशंचेध्ममेवचा। एतानाहृत्यबंधव
ज्ञातीनाहूयसत्तमः। बंधूनन्नेसंभोज्यब्राह्मणांविशेषतः। अग्न्याधानादियत्त्वंहुत्वाज्योत्सवनादिकं दातु
समक्षंगत्वाशंशुत्वेदेहीतियाचयेत्। दानेसमर्थोदातासौयेपज्ञेनेतिपंचभिः। देवस्यत्वेतिमंत्रेणहस्ताभ्यांप्र
तिगृह्यच। अंगादंगेत्यचंजस्वाचाघायशिशुमूर्धनिवस्त्रादिभिरलंकृत्यपुत्रछायावहं अन्तरागीतेश्वनाद्यैश्चसह

ब·म·
॥४२॥

स्त्रिशाखे स्वसंपुटे । गृहीत्वा गृहमध्येन मादाय चरुं कृत्वा विधानतः । यस्त्वा हृदेत्यृचा चैव तुभ्यमग्र ऋचैकया । सो
मो ददद् इत्येताभिः प्रत्यृचं च ऋचस्तथा । स्विष्टकृदादिहोमं च कृत्वा शेषं समापयेत् । ब्राह्मणानां सपिंडेषु क
र्तव्यः पुत्रसंग्रहः । तदभावे सपिंडो वा अन्यत्र तु न कारयेत् । क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमोऽपि वा । वैश्यानां
वैश्यजातेषु शूद्राणां शूद्रजातिषु । सर्वेषां चैव वर्णानां जातिष्वेव च नान्यतः । दौहित्रो भागिनेयश्च शूद्रस्यापि च
दीयते । नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचन । बहुपुत्रेण कर्तव्यं पुत्रदानं प्रयत्नतः । दक्षिणां गुरवे दत्वा यथाश
क्ति द्विजोत्तमान्न पोराह्लादमेवापि वैश्यो वित्तशात्न्यं मृड । सर्वस्वमेवापि स्वरात्तरः ष्यैव यावद्बलं । छायावद्दे
सदृशः । दौहित्रो भागिनेयश्चेति यथा मृत नास्य पयोगित्वेन उस्पमेत्रा वृकारणाय दउप्रयच्छती मत्रसंभवत्यपि
नायत्वे च तुर्प्यादं उपैषानन्त्वाहि प्रैवानुवचनकर्तृत्वेन मानुपयोगिनो मंत्रावृत्तस्ये वनाव्यत्वमुक्तं तय
द्वाप्यनया क्षतएत्वि नचलु तुर्प्यं पंपद्या स्वस्यैव दौहित्रभागिनेयाव पिप्रतिशेषितया भाव्यत्वं । स्वतत्त्व
योरेव विधेयत्वेन दौहित्रभागिनेयावेव शूद्रस्येति नियमविधिविषयता मुक्ता । शूद्रस्य तु विधेयत्वे राम:

॥५०२॥

न तद्विषयत्वायोगात् शूद्रस्यैवेति विवचन मुक्तौ विप्रादिशेषं तरपरिसंख्यापत्ते । तस्मात् दौहित्रभागिनेया
वेव शूद्रस्य पुत्रौ । तदभावे तन्योपि सजातीयः शूद्राणां शूद्रजातिष्वेवोक्त । न चेदं जातिपदं दौहित्रभागिनेय
योरेव पसं हिक्रियते दौहित्रत्व भागिनेयत्वयोः सजातीयत्वस्यैव परस्पराभिचारत्वात् एकस्मात् तौस्मा
मान्यवाक्य वैयर्थ्यापत्तेश्च । विद्वत्तेवेत द्वैतनिर्णयेत ता तच रणे । शिष्टाचारोऽप्येवं । एवं च निषादस्थपतिवत्
स्याधिकारे सिद्धे विवेक उक्तं । वैदिकमंत्रसाध्यहोमं भवति उत्र प्रतिपद्ये शूद्रस्यानधिकार इति तदयुक्तं । समं
महोमस्तु तेन विप्रद्वारा कार्यः । उपवासो व्रतं होमं तीर्थस्नानं जपादिकं । विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति
पराशरोक्तेः । स्मार्तहरिनाथाचार्यैरेवमेव । अपरार्कारेण एव दक्षिणापथे तु यो विप्राः शूद्रस्य तु उक्तं याद्वि । ब्राह्म
णस्य भवेच्छूद्र शूद्रस्य ब्राह्मणो भवेदिति न तु शूद्रस्य कर्मसाङ्गुण्यं विप्रस्य च दोषं प्रतिपादयंतीति माधवः ।
क्षत्रियाद्यपि शूद्रवदेवाधिकारः । स्त्रीशूद्राश्च सधर्माण इति वाक्यात् । वसिष्ठः । शुक्रशोणितसंभवः पुरुषो मा
तापितृनिमित्तकः तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः । न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीया

व्य.म.
॥४२॥

त्र समहिलायते पुरुषं न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः। पुत्रं प्रतिग्रहीष्यन्बंधूनाहूय
राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वादूरेबांधवं संनिकृष्टमेव प्रतिगृह्णीयात्। संदेहे चोत्पन्ने
दूरेबांधवं शूद्रमिव स्थापयेत्। विज्ञायते ह्येकेन बहूंस्त्रायत इति। तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत च
तुर्थभागभागी स्याद्दत्तक इति। भर्त्रनुज्ञा तु सधवाया एव दृष्टार्थत्वात्। विधवायास्तु तां विना पितृतदभावे ज्ञाती
नामाज्ञया भवति। अत एव रत्नेत्कान्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क
चित्स्त्रिया इति याज्ञवल्क्येनावस्थाविशेषे भर्तुः पारतंत्र्यमुक्तं। तदभावे वार्द्धकादिना तस्याक्षमतायां वा पु
त्रादीनामपि। कात्यायनेनापि नारी स्वल्पमनुज्ञाना पित्रा भर्त्रा सुतेन वा। विकल्पं तद्भवेत्तस्या यत्करोत्यौर्ध्व
देहिकमिति अवस्थाविशेष एव पित्राद्यनुज्ञोक्ता। और्ध्वदेहिकं पारलौकिकं। अतो यस्यामवस्था
यां भर्तुरनुज्ञा तस्यां सैवात्रापेक्षते। न त्वपूर्वा विधीयते। अतो विधवाया भर्तुराज्ञां विनाप्यधिकारः। अदूरेबां
धवो यथाप्यर्थसंहितत्वान्नि सपिंडः। संनिहिते ह्यपि भ्रातृपुत्रो मुख्यः। भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् ॥५०४॥

रा.म.

भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति मन्वुक्तेरिति मिताक्षरायां। इदमेव चैतद्वचसः प्रयोजनं पुत्रम
न्यासंभवात्। दूरेबांधवं विजातीयं दत्तकस्तु पराणीतत्स्य न पुत्रोपि च भवतीति तातचरणाः। युक्तं चैतद्बा
धकाभावात्। यत्तु कालिकापुराणे। पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते। आचूडांतं न पुत्रः स पुत्रतां याति
चान्यतः। चूडोपनयसंस्कारा निजगोत्रेण वै कृताः। दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते। ऊर्ध्वं तु पंच
माद्वर्षान्न दत्ताद्याः सुता नृप। गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथमं चरेदिति। तत्सगोत्रपरं। आचूडांतमित्या
द्युक्तिभ्यामगोत्रे मियादार्ढ्यत्वे चूडोपनयसंस्कारा इत्यनेन विरोधापत्तेः। इदं तु वचो न तथा विस्तेनगणायं। कालि
कापुराणपुस्तकेष्वदर्शनात्। अयं च दत्तको द्विविधः। केवलो द्व्यामुष्यायणश्च। संविदं विना दत्त आद्यः। आवयो
रयमिति संविदा दत्तस्त्वंत्यः। तत्राद्यः प्रतिग्रहीतुरेवौर्ध्वदेहिकश्राद्धादि कुर्यात्। तथा हि पुत्रप्रतिग्रहस्य भावा
कांक्षायां पुत्रं प्रतिग्रहीष्यन्नित्यादिकं तद्धि धीः पुत्रमिति द्वितीयांतेन पुत्रस्य भाव्यत्वमुक्तं। न च सपुत्रत्वाख्यपु
त्रत्वं भावयितुं शक्यं तेन पुत्रः। अन्यस्य न सर्वपुत्रकार्यं लक्षयितव्यं तत्प्रयोजकमदृष्टं भाव्यमंगीकर्तव्यं। अतः प्र

व॰म॰

॥ ४५॥

तिग्रहात् तत्कुले पुत्रपित्रादिसंबंधविशेषप्रयुक्तानि कार्याणि प्रवर्त्तंते। अत एवाह मनुः। गोत्ररिक्थे जनयितुर्न
नभवेद्दत्रिमः सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा। गोत्ररिक्थे अनुगच्छतीति गोत्ररिक्थानुगः प्रायत्त
त्समनियत इति यावत्। दत्रिमः केवलः द्व्यामुष्यायणगोत्रानुवर्त्तिर्वक्ष्यमाणत्वात्। पिंडः श्राद्धमौर्ध्वदैहि
कादाविति मेधातिथिकुल्लूकभट्टादयः। पिंडः सापिंड्यं स्वधौर्ध्वदैहिकश्राद्धादीत्यपरे। वस्तुतस्तु यथा जातपु
त्रः कृष्णकेशोऽग्निमादधीतेत्यत्र वयोवस्थाविशेषो यथा वार्द्धमतवैदिमिनोत्यइ चवैदोत्यनेन देशविशेषो विषा
स्यते तथात्र गोत्ररिक्थपिंडस्वधापदैर्जनकादीनां संबंधप्रयुक्तकार्यमात्रं लक्ष्यपित्वात् निवृत्तिरुच्यते
तेन सोदरपित्र्यादिसंबंधनिवृत्तिरपि सिद्धा भवति। अत एव केवलदत्तकजन्यपुत्रोपि पितृसापिंडीकरणपा
र्वणश्राद्धादि प्रतिग्रहीत्रैव सह कुर्यात्। एवं तत्पुत्रोपि यत्तु अथ वे दत्तकक्रीतपुत्रिवतपुत्राः परपरिग्रहेण
नार्षेयास्ते द्व्यामुष्यायणा भवंतीत्यादिना द्व्यामुष्यायणानुपक्रम्य कात्यायनः। अथ यदेषां स्वानुमाव्यो मुख्य
पत्नं स्यादिक्थहरेषु पिंडं वै भवित्रिपुरुषं दद्युरयपञ्चनयोर्न स्याद्ध्नान्नाद्युरे कस्मिन् श्राद्धे द्वयमुद्दिश्य रामः

॥ ५०५॥

वानुकीर्तयेत्। प्रतिग्रहीतारं चोत्पादयितारं चांततृतीयात्पुरुषादिति। तत्र द्व्यामुष्यायणापरं द्व्यामुष्यायणा
नवंनात्कपक्रमात्। तेन द्व्यामुष्यायणो जनकस्य प्रतिग्रहीतुर्वा पुत्रांतराभावे तस्मै पिंडं दद्यात्। रिक्थं चाहरे
यात्। न तत्सत्त्वे। यदा तु तयोरप्यौरसाः पुत्राः संति तदा कस्मात्त्रापि न दद्यात् प्रतिग्रहीतौरसांशस्य चतुर्थभागं
च हरेत्। तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी स्यादिति वसिष्ठोक्तेः। उत्पन्ने त्वौरसे पुत्रे चतुर्थां
शहराः सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभाजना इति कात्यायनोक्तेश्च। तृतीयांशहरा इति तु कल्पत
रौ याहा सवर्णाश्च जनकात् यः दत्तविज्ञानेश्वरः। यदा तु तयोः पुत्राभावस्तदा एकस्मिन् श्राद्धे द्व्युद्देशप्र
कारेणोभयोरप्येकमेव श्राद्धं कुर्यात्। न द्विपिंडे मासिकाजिनि। यावंतः पितृवर्गाः स्युः तावद्भिर्दत्तकादयः
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह। द्व्यामुष्यायणत्वे सुताः पुत्रात्वे के न तत्र समा चतुर्थपुरुषे छंदस
स्मादेषां वियोजषा साधारणेषु कालेषु विशेषो नास्ति वर्गेण मृताहे त्वेकमुद्दिश्य पकुर्युः श्राद्धं यथाविधि
तदपि कात्यायनीय समानार्थसमेव। अयमर्थः। द्व्यामुष्यायणो दत्तकादयो जनकप्रतिग्रहीत्रोः कुले मृता

नांस्ववर्गैस्तत्पित्रादिभिः सहसपिंडीकरणं कुर्युः दत्तकादिपुत्रास्तु तेषां जनकप्रतिग्रहीत्रोर्व्यासमं कुर्युः। तस्मै
त्वाऽत्रपि स्वपितरं दत्तकेन पितामहेन तज्जनकेन प्रपितामहेन च चतुर्थपुरुषेत स्यो त्रैच्छं दद्यात्। प्रतिग्रही
तारमुद्धारयेच्चवेति। जनकं तु द्वारयेदेवसा धारणे षण्मासाब्दिकादेपु जनकप्रतिग्रहीत्रर्वर्गेणैव श्रा
द्धं कार्यं। न तावदेवैकमेवोद्दिश्यैकोद्दिष्टं श्राद्धं कुर्यादिति केचित्तु। केवलदत्तकस्याभिधानात्मनास्तेव॥
अत्रावुयोरसमावितिसंविदश्च विधानाभावात् विनागृहीतोपि द्व्यामुष्यायण एव। तेनैव जनकप्रतिग्रहीत्रो
रुद्देशेनामावास्यादिषु श्राद्धयमेकं वा श्राद्धं कार्यं। तस्य त्रेषणातु दत्तकस्य तज्जनकप्रतिग्रहीतुर्ग्यां वास्यां वा
न्यामपि सहपिंडीकरणपार्वणश्राद्धादिकार्यं। एवं तत्सुतादिभिरपि त्याज्यत्वं चितं। यद्यपि केवलदत्तक
स्यापि शौद्रदत्तोनोक्तस्तथापि पूर्वोक्तमनुवचनेन जनकादानोसेवं धर्मान्त्रनिवृत्तिरुक्तत्वात्। द्व्यामुष्यायणोत
द्भावोदयासिद्धेरेव। किंचाद्धासमासाद्विरंबंधुभ्यो जाविनश्चमातृवंधुभ्यः पंचमादिति गौतमाद्येनवी
जिकुलेसप्तपुरुषं यावद्विवाहो निषिद्धः स्याद्द्व्यामुष्यायणो व्यर्थः स्यात्। तस्मिन्नसापिंड्यसत्वात्। अतो वन्नपुमेत

त्सार्थपार्थकेवलदत्तको वाच्यः। तत्र सापिंड्यनिवृत्तेरुक्तत्वात्। अपि चात्र वराभावो द्व्यामुष्यायणकार्ये
स्तु दत्तकक्रीतकादयः गोत्रद्वयेप्यनुद्वाह शौंगशैशिरयोर्यथेतिसत्वेन गोत्रद्वयमपि द्व्यामुष्यायणस्योक्तं
मातुर्यार्थेन च जनका गोत्रनिवृत्तिरुक्तेति निरोधः केवल द्व्यामुष्यायणानेदेनैव परिहरणायत्तेनमिथ्यत्वे
व केवलोपि दत्तकः। अत एव सुरेणकुंति भोजयद्दत्रिमत्वेन दत्ताय कुंत्याः सुतस्यार्जुनस्य — रसुत्रवसुदेवदु
हितुसुभद्रायाः सापिंड्यानिवृत्तिमनुवचनेनोक्तस्य गोतयायेस्य बीजसंतानाजाया। अपि निषेधमात्रपरत्व
मेव चोक्ता च्चर्जुनेन सुभद्रापरिणये सौत्रांकवार्तिकोक्तं संबंधव्यवधानकल्पनारव्यसमाधानमाहेन दसो मे
स्वराप्य तुक श्चित्तो मेस्य रेण गौतमवचनात्कृत्वाः पूरकुरकुलेपि साप्तपौरुषं सापिंड्यमुक्तमित्याद तद्ग्रंथा
नध्ययननिबंधनं तेन हि सापिंड्यनिवृत्तिपूर्वमुक्ता गौतमोपस्य जनककुले निषेधपरत्वमुक्तं न तु सापिंड्य बो
धकत्वं। एवं सिद्धे केवले द्व्यामुष्यायणे। च च्चावयोरसमावितिसंविति संविदपि सिध्यति प्रतिग्रहीतु द्व्यामुष्यायण
ज्ञानार्थत्वेन। द्वष्टार्थत्वात्। अत्र केवलदत्तकस्य पालकापि तृकुले साप्तपौरुषं मातृकुले च पांचपौरुषं सापिं

स.म.
॥५६॥

र्थं मस्तु हृद्गोत्रमः स्वगोत्रेण कृता येस्तु दत्तक्रीतादयः सुताः। विधिना गोत्रमायांति न सापिंड्यं विधीयते। ब्रु
हन्मनुः। दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिंडता। पंचमी सप्तमी चैव गोत्रित्वं पालकस्य वा। यदपि नारदः। धर्मा
र्थं विहिताः पुत्रास्तत्र ज्ञेया गुणपुत्रवत्। अत्रापिंडविभागित्वं तेषु केवलमिष्यते। इति तान्यन्यनाकराणि। साक
रत्ने पितामुष्यायणस्य प्रतिग्रहीतृकुले साप्तपौरुषेण सापिंड्यभावप्रतिपादनार्थं। केवलदत्तके त्वेके गोत्र
मायेन पालककुले साप्तपौरुषस्य सापिंड्यस्योक्तत्वात्। मातावा येन च जनककुले सापिंड्यनिवृत्तेरनुक्तत्वात्। य
त्तु सापिंड्यनिर्णये केषांचिन्मात्स्येनो लेखः। जनकगोत्रेणोपनयनादिसंस्कृतस्य जनककुले पितृतो मातृतश्च
पांचपौरुषं साप्तपौरुषं च सापिंड्यं। प्रतिग्रहीतुः। कुले तु त्रिपुरुषं प्रतिग्रहीतुः। कुले तु त्रिपुरुषं प्रतिग्रहीतुः
कुले तु त्रिपुरुषं प्रतिग्रहीतृगोत्रेण पितृत्वप्रयोजकस्योत्पादकत्वस्योपनेतृत्वस्य चाभावात्। जनकगोत्रेण
संस्कृतस्य तु प्रतिग्रहीत्रादिभिरेव साप्तपौरुषं पांचपौरुषं चेति तत्र मूलं न विद्मः। किंच यदि प्रतिग्रहीतु
र्यत्पादकत्वोपनेतृत्वे न भावात् न पितृत्वं कथं तर्हि त्रिपुरुषं सापिंड्यं प्रतिग्रहीत्रादिभिरादिकर्तृत्वाद्दकस्या

सम:
॥५७॥

न च पितृत्वव्याप्यं सापिंड्यं पूर्वमुक्तमेवेति दिक्। प्रकृतमनुसरामः। ऋणविभागे विशेषमाह कात्यायनः
पित्र्यं पित्र्यर्णसंबद्धं त्वात्मा पंचात्मनाकृतं। ऋणमेव कृतं शोध्यं विभागे बंधुभिः सह। पित्र्यर्णसंबद्धं पितृ
ऋणापाकरणार्थं कृतं। आत्मार्थं स्वकुटुंबभरणार्थं मन्येन कृतं स एव। अत्रापि पितृव्यमाह व्यासः कुटुंबा
र्थमृणं कृतं। विभागकाले देयं तद्रिक्थिभिः सर्वमेव तु। रिक्थादसमर्पणविषयेऽपि स एव। ऋणं प्रीतिप्रदत्तं तु
दत्त्वा शेषं विभाजयेत्। प्रदत्तं प्रतिश्रुतं। नारदः। यच्छिष्टं पितृदायेभ्यो दत्त्वर्णं पैतृकं च यत्। भ्रातृभिस्तद्वि
भक्तव्यमृणी स्यान्न यथा पिता। पितृदायः पित्रा प्रतिश्रुतं स एव धर्मार्थं प्रीतिदत्तं च पृथग्रणत्वेन योजितं
तद्दृश्यमानं विभजेरन् दानं पैतृकाद्धनात्। धर्मार्थं प्रीत्या च प्रदत्तं प्रतिश्रुतं पित्रा। स्वेन योजितं स्वयं कृ
तं। तद्धनं दृश्यमानं च द्रव्यं विभजेत्। एतद्धनातिरिक्तस्य पैतृकाद्धनाद्दानं नास्तीत्यर्थः। अदृश्यमानं यत्का
याम पि स एव। दृश्यमानं विभज्येत गृहक्षेत्रे चतुष्पदं। गूढद्रव्याभिशंकायां प्रत्ययस्तत्र कीर्तितः। गृहोपस्का
रवाह्यदोह्याभरणकर्मिणः। दृश्यमाना विभज्यंते कोशं गूढे ब्रवीन्मनुः। कर्मिणो दासादयः। अत एव दि

अपृथक्करणेऽस्मिन्विषये कोऽयमत्र नियमस्तत्रैवैवाशंकाविश्वाससंधाने विभागे रिक्थिनां सदा क्रियासमूह-
कर्त्तृत्वे कोशमेव प्रदापयेदिति॥ अथ विभाज्यं मनुः॥ विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत्॥ मैत्रमौद्वा-
हिकं चैव माधुपर्किकमेव च॥ व्यासः॥ विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत्॥ विभागकाले तत्तस्य
नान्वेष्टव्यं स्वरिक्थिभिः॥ सौदायिकं वक्ष्यते॥ एवं तत्र पितृद्रव्याविरोधेनार्जितं ज्ञेयं तथा च॥ याज्ञवल्क्यः॥
पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं॥ मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत्॥ क्रमादभ्यागतं द्रव्यं हृत-
मप्युद्धरेत्तु यः॥ दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च॥ क्रमागतायां मुद्धृतायां तु विविशेषमाह शंखः॥
पूर्वं नष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात्॥ यथाभागं लभंतेऽन्ये दत्वांशं तु तुरीयकं॥ उद्धृतायां चतुर्थमंशमु-
द्धर्त्रे दत्वावशिष्टमुद्धर्त्रा सह विभजेयुः॥ मनुः॥ अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत्॥ दायादेभ्यो न तद्द-
द्यामश्वं च यद्धनं॥ विद्यालब्धं विभागि न हि॥ कात्यायनः॥ परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या॥ तया लब्धं
धनं यत्तु विद्याप्राप्तं तदुच्यते॥ एतदेव विशदयति स एव॥ उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्वकं॥ विद्याधनं

तु तद्विद्याद्विभागेन विभज्यते॥ शिष्यादाचार्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात्॥ स्वज्ञानशंसनाद्वादात्लब्धं
प्राध्ययनाच्च यत्॥ विद्याधनं तु तत्प्राहुर्विभागेन विभज्यते॥ शिल्पिष्वपि हि धर्मोऽयं मूल्याद्यच्चाधिकं भवे-
त्॥ विद्यालब्धं कृतं चैव यथाऽऽप्ततः शिष्यतस्तथा॥ एतद्विधनं प्राहुः सामान्यं यदतोऽन्यथा॥ परं निरस्य यल्लब्धं वि-
द्यया पणपूर्वकं॥ विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः॥ विद्याप्रतिज्ञया लब्धं शिष्याद्वा पूर्वयज्ञवे-
त्॥ ऋत्विज्यायेन यल्लब्धं एतद्विद्याधनं भृगुः॥ उपन्यासः क्रमजटादीनां संकलितानां पाठ इति मदनरत्ने
सभायां गूढप्रमेयविवृत्तिरिति केचित्॥ पणपूर्वमुपन्यस्तमित्यन्वयः॥ शंसनं प्रख्यानं॥ प्राध्याय प्रकृष्टा-
ध्ययनं॥ शिल्पिष्वपीति॥ अयं विद्याधर्मः शिल्पिष्वपि ज्ञेयस्तथा च मूल्याधिकं पारितोषिकं॥ ऋत्विङ्न्याय उ-
पदर्शितं॥ अत्र सर्वत्रापि विद्याधिगमे तया धनार्जने च पितृद्रव्याविरोधिमत्येवाविभाज्यत्वं विरोधे तु विभा-
ज्यमेव अत एव कात्यायनः॥ कुले विनीतविद्यानां भ्रातृणां पितृतोऽपि वा॥ शौर्यप्राप्तं तु यद्वित्तं विभाज्यं तद्बृहस्पतिः॥ पि-
तृद्रव्याविरोधेऽप्यर्जकस्यांशद्वयमस्त्येव॥ येन चैषां स्वयमुपार्जितं स्यात्स द्व्यंशमेव हरेदिति वाशिष्ठोक्तेः का-

स्मिद्विद्याधने विशेषमाह नारदः॥ कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः भागं विद्याधनात्तस्मात्स लभे
ताश्रुतोपि सन्॥ अश्रुतोऽविध इति मदनरत्ने॥ भागं दास्यामीत्यप्रतिश्रुत इति॰ तु युक्तं पित्र्याविरो
धार्जितेपि विशेषमाह गौतमः स्वयमर्जितं च वैद्येभ्यः कामं दद्यादिति॥ विद्यां वेत्तीति वैद्य इच्छया विद्वद्भ्यो
धात्स्यो दद्यादित्यर्थः॥ कात्यायनः॥ नावेद्यानां तु वैद्येन देयं विद्याधनं क्वचित्॥ समविद्याधिकानां तु देयं वै
द्येन तद्भवेत्॥ वैद्यो वैद्याद्दशांशं तु धनात्॥ पितृद्रव्यं समाश्रित्य न चेत्तेन तदाहृते॥ अयं च निषेधो विषम
हणं धनान्तरसत्वे॥ धनान्तराभावे तु तेभ्योपि देयमेवेति मदनः॥ पित्रादिदत्तस्याविभाज्यत्वमाह बृहस्पतिः॥
पितामहपितृभ्यां च दत्तं मात्रापि यद्भवेत्॥ तस्य तन्नापहर्तव्यं शौर्ये भार्याधने तथा॥ नारदः॥ शौर्यभार्याध
ने चोभे यच्च विद्याधनं भवेत्॥ त्रीण्येतान्यविभाज्यानि प्रसादो यश्च वै पितुः॥ कात्यायनः॥ ध्वजाहृतं भवेद्य
त्तु विभाज्यं नैव तत्स्मृतं॥ संग्रामादाहृतं यच्च विद्राव्य द्विषतां बलं॥ स्वाम्यर्थं जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्य
ते॥ स एव॥ आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते कस्मिन्कर्मणि तुष्टेन प्रसादात्स्वामिना कृतं॥ तत्र ल

राम: ॥४९॥

ब्धं तु यत्किंचिद्धनं शौर्येण तद्भवेत्॥ अत्र विशेषमाह व्यासः॥ साधारणं समाश्रित्य यत्किंचिद्वाहनादिकं॥ शौ
र्यादिना प्राप्नोति धनं भ्रातरस्तत्र भागिनः॥ तस्य भागद्वयं देयं शेषास्तु समभागिनः॥ सौदायिकस्वरूपमाह व्यासः॥
ऊढया कन्यया वापि पत्युः पितृगृहाद्वापि॥ भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतं॥ कात्यायनः॥ यत्तु
संलालनकाले तु स्वजात्या कन्यया सह॥ कन्यागतं तु तद्वित्तं शुद्धं वृद्धिकरं स्मृतं॥ वैवाहिकं तु तद्विद्या
द्भार्यया यत्सहागतं॥ धनमेवंविधं सर्वं विज्ञेयं धर्मसाधनं॥ आदायार्षं तु गोद्वयमिति प्रकारेण लब्धं क
न्यागतं॥ अत्रापि विद्याधनवदेव पितृद्रव्याविरोधे तदपि भाज्यत्वं विद्यादिव्यतिरिक्तप्रकारेण तु लब्धं वि
भाज्यमेव॥ तथा च मनुः॥ अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत्॥ समस्तत्र विभागः स्यादपित्र्य इति धा
रणा॥ ईहा कृष्यादिचेष्टा अपित्र्ये पितृद्रव्यानाश्रयणे॥ अन्यदप्यविभाज्यमाह मनुः॥ वस्त्रं पत्रमलंका
रं कृतान्नमुदकं स्त्रियः॥ योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते॥ पत्रं वाहनं॥ वस्त्रपत्रालंकाराये येन धृ
तास्ते तस्यैव समस्त्याश्चेत्॥ न्यूनाधिकमूल्यास्तु विभाज्या एव॥ पितृधृतं तु वस्त्रादि तु श्राद्धभो

व्य.म.
॥धर्म॥

क्षेदयं॥ वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकं॥ गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेदिति वृद्धस्मृत्यु
क्तेः॥ विषमेषु गवादिषु विशेषमाह मनुः॥ अजाविकं सैकशफं न जातु विषमं भजेत्॥ अजाविकं सैकशफं ज्ये
ष्ठस्यैव विधीयते॥ कृतान्नोदके यथासंभवमुपयोज्ये॥ स्त्रियो दास्यो विषमा यथासंभवं कर्मकारणीया
॥ समास्तु विभाज्याः॥ पित्रवरुद्धास्तु तस्मास्तु पितृवद्विभाज्या॥ स्त्रीषु च संसक्तास्वविभाग इति गौतमो
क्तेः॥ योगक्षेमवाक्षत्रेन मंत्रिपुरोहितादय उच्यंत इति कल्पतरौ॥ लोगाक्षिस्तु क्षेमं पूर्तं योगमिष्टमि
त्याहुस्तत्वदर्शिनः॥ अविभाज्ये तु ते प्रोक्ते शयनासनमेव च॥ सा ह॥ तत्र पूर्तं जडागारामादि इष्टं याग
विप्रभोजनादि॥ तदर्थमविभागदशायां सर्वत्तु मत्या पृथक्स्वयं येन तस्य रज्ये ष्टं यत्कृत्वा पितितें तेन तद्व्य
ण सधर्मस्तेनैव कार्यो नान्येन नवा संभूय सर्वैरित्यर्थः॥ प्रचारो गृहादिमार्गः॥ गवादि प्रचाराय भस्व
यत्तु शंखलिखितौ॥ नवास्तु विभागो नोदपात्रालंकारा प्रयुक्तं वा समामिति॥ यच्च व्यासोशनसौ॥ अवि
भाज्यं सगोत्राणामासहस्रकुलादपि॥ याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः इति वाक्ये क्षेत्रयोरवि ॥५२०॥

भाज्यत्वमाहतुः॥ तद्धर्मवास्तु गोप्रचारक्षेत्रादिपरं॥ प्रतिग्रहो याज्ययोस्तु योक्षत्रियादि विभागनिषेधप
रं पूर्वोक्तनिषेधात्॥ अल्पमूल्यपात्रस्येन विभागो नास्त रूपतः इत्येवं परं वा॥ वस्त्रादिषु विशेषमाह बृह
स्पतिः॥ वस्त्रादयो विभाज्या यैरुक्तं तेन विचारितं॥ धनं भवेत्समृद्धानां वस्त्रालंकारसंश्रितं॥ मध्यस्थितम
नाजीव्यं दातुं तस्य शक्यते॥ युक्त्या विनिजनीयं तदन्यथा कं भवेत्॥ विक्रीय वस्त्राभरणमुद्धाहलेखि
तं कृतान्नं चाकृतान्नेन परिवर्त्य विभज्यते॥ उद्धृतरूपवाप्यंतः स्वानुसारेण भुज्यते॥ एकां स्त्रीं कार्ये
त्कर्षयांशेन गृहे गृहे॥ बहूनसमांशेनादेयास्तासानामप्ययं विधिः॥ यथाभागानुसारेण सेव्या॥ क्षेत्रं वि
भज्यते॥ न चारघट्टयांशेन कर्तव्यो रिक्थिभिः सदेति॥ अधमर्णाद् धृत्येत्यर्थः॥ कात्यायनः॥ धनपत्र
निविष्टं तु धर्मार्थं प्रतिरूपितं उदकं चैव दासश्च निबंधो यः क्रमागत॥ घृतवस्त्रमलंकारो नानुरूपं
तु यद्भवेत्॥ यथा काले प्रयुक्तानि तथा योज्यानि बंधुभिरिति॥ धनमिति धर्मोद्देशेनोन्तर्ज्य पत्रे लिखि
तमित्यर्थः॥ उदकं कूपवापीगतं॥ निबंधो वृत्तिः॥ नानुरूपं विभागायोग्यं॥ धात्रादिवचनं च नयास्त्वपि

तद्व्यस्य विभागमाह । याज्ञवल्क्यः । अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते । तत्पुनस्ते समैरंशैर्विभजेर
न्निति स्थितिः । अन्योऽपहृतं ज्येष्ठकनिष्ठाद्यपहृतं । मनुः । यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीय
सः सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिरिति तत्रापि ज्येष्ठपदं दंडापूपिकन्यायाद्यावन्मात्रोपलक्ष
कं । ज्येष्ठस्यापि दोषः किमुत यवीयसामित्यर्थः । अत एव गौतमः । यो वै भागिनं भागान्नुदते च्यवत एवैनं
न च्यावयते ऽथ पुत्रमथ पौत्रं च्यावयतीति । भागिनं भागार्हं भागान्नुदतेऽपि सन्तं न ददाति च्यावयते नाशय
ति पश्चात्तं नाशयति तत्पुत्रं पौत्रं वा नाशयतीत्यर्थः । नारदः । विभक्तेनैव यत्प्राप्तं तत्तस्यैव धनं भवेत् ॥
हृतं नष्टं च यल्लब्धं प्रागुक्तं च पुनर्भवेदिति । प्रागुक्तदायादसंबंधे केनचित्प्रच्छादितं तु न भवेत् । विभाग इ
ति शेषः । मनुः । विभागे तु कृते किंचित्सामान्यं यत्र दृश्यते । नासौ विभागो विज्ञेयः कर्तव्यः पुनरेव त्विति केन
चिद्विभागस्यापलापे निर्णायकान्याह याज्ञवल्क्यः । विभागनिह्नवे ज्ञातिबंधुसाक्ष्यभिलेखितैः । विभा
गवता ज्ञेयो गृहक्षेत्रैश्च यौतकैः । यौतकः पृथक्कृते गृहक्षेत्रैरिति विशेषणं विशेष्यभावः । नारदः

राम:
॥५११॥

विभागधर्मसंदेहे दायादानां विनिर्णयः । ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात् । स एव । भ्रातृणामवि
भक्तानामेको धर्मः प्रवर्तते । विभागे सति धर्मोऽपि भवेत्तेषां पृथक्पृथक् । अत्राविभक्तानामित्येवोद्देश्यस
मर्पकं । भ्रातृणामिति तु तद्विशेषणत्वादविवक्षितं । तेन पितृपितामहपुत्रपौत्रपितृव्यभ्रातृपुत्रादिष्वप
विभक्तेष्वेक एव धर्मः । अत्र देशकालकर्त्रादीनामैक्येऽनेकप्रयोगविषयिणां कर्मणां न्यायेन तंत्रता प्राप्ता । पितेत्र तो
विभक्तकर्तृभेदेऽपि वचनेन बोध्यते । तेन श्रौतस्मार्ताग्निसाध्यानां च धर्माणां विभक्तानां पृथगेव । अह
वनीयत्वावसथ्यत्वादीनां संबंधिकत्वेन भेदात् । एवं श्राद्धमपि पितृव्यभ्रातृपुत्रादीनाममावास्या
दौ देवताभेदात्पृथगेव । आरंभणां तु निरग्निकानां तंत्रेणैव देवतैक्यात् । पूर्वमासादिनान्देन भेदे तु पृथगेव ।
साग्निकानामग्निसाध्यानि तु पृथगेव । गृहस्थदेवतापूजावैश्वदेवादि तु तंत्रेणैव । अत एव शाकलः । एकपा
केन वसतां पितृदेवार्चनं गृहे । वैश्वदेवं तथैवैकं विभक्तानां गृहे गृहे इति । प्रयोगपारिजाते आश्वलायनः । एक
नेव मतां विभक्तानामपि त्रयः । एकस्तु चतुरो यज्ञान्कुर्यादाग्रयणपूर्वकान् । अविभक्ता विभक्ताश्च पृथ

कपालकादिजातयः॥ कुर्युः पृथक्पृथक्पञ्चयज्ञान्भोजनानां पाकं दिने दिन इति। तत्संसृष्टिपरं। अविभक्तानामप्ये
कपाकेन वसतां मिलितेनेन विभक्ता अप्येतेन चतत्प्रतिपादनात्। अतसंसृष्टिनां कदाचित्पृथक्पाके पृथ
आत्मयज्ञाः॥ वाग्यज्ञो ब्रह्मयज्ञः। तत्पूर्वकानित्यतर्पणसंविज्ञानम्। तर्पणसंविज्ञाने तु वाग्यज्ञेत्या घन
र्पकं। प्रथमत्यागे कारणाभावादिति न्यायदेति न्यायः देवचतुरंगिपातित्सिंभवात्। अतो ब्रह्मयज्ञः॥ पृथ
गेव कार्यः। इदं तु वचनद्वयं शिष्टैस्त्यानादियते यानि तु धर्मप्रवृत्तेः वचांसि। अविभक्ताः सुताः पित्रोरेके
कुर्युर्मृताहिकं देशांतरे पृथक्कुर्युर्दर्शश्राद्धनुमासिकं। यामांतरे जंतुपुष्पेद विभक्तो मृते वहि दर्शं च
मासिकं श्राद्धं कुर्युः। पित्रो पृथक्पृथक्। अविभक्ताः पृथक्श्राद्धो मातृस्वार्जितधनाविन। कुर्युस्ते भ्रातरः श्राद्धं
पार्वणं च पृथक्पृथगिति। यत्तु स्मरति समुच्चये वैश्वदेवः स्याहस्मि महालयविधिस्तथा देशांतरे
पृथक्कार्ये दर्शश्राद्धं तथैव च। चैति तान्यपि देशांतरसंसृष्टविषयाणीति केचित्। वस्तुतस्त्वेतानि नि रामः
र्मूलान्येव। अथवा देशकालकर्तादीनमैक्ये न्यायेन प्राप्तं तंत्रता कर्तृभेदे तु वाचनिकी। देशभेदे तु व ॥५२॥

चनस्य न्यायस्य चाभावात्पृथगेव श्राद्धादीतीति युक्तिमूलकानि केनचित्कृतानि। अन्यान्यपि विभागलिंगा
न्याह नारदः। साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च। विभक्ताः भ्रातरः कुर्युर्नाविभक्ताः परस्परं। दानग्रहणप
शुक्षेत्र गृहक्षेत्रप्रतिग्रहः। विभक्तानां पृथक् ज्ञेयाः दानं धर्मागमस्य या। यषामेताः क्रिया लोके प्रवर्तते स्व
रिक्थिषु। विभक्तान् अवगच्छेयुर्लेख्यमप्यंतरेण तानिति। दानग्रहणेकृणविषयाः। तेएव दानग्रहणे द्विताय
श्लोके नृहोते स्पष्टतार्थं। पश्वादिप्रति यद्दा विभक्तानां पृथक्पृथगनुष्ठिता एव स्वत्वोत्पादकाः। अविभ
क्तानां त्वेकेन कृता परस्परा रिपि स्वत्वजनका इत्यर्थः। दानधर्मेत्यादि आगमो मूलकलाप्रवेशोदि। गृह
स्पति। पृथगायव्ययाधनं कुसीदं च परस्परं। वणिक्पथं च ये कुर्युर्विभक्तास्ते न संशयः। वणिक्पथं वाणि
ज्यं। याज्ञवल्क्यः। भ्राभ्रातृहरणमथ दंपत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तस्मृ
तं। एतल्लिंगभावे तु दिव्यं। एषामन्यतमाभावे हि व्यातमुच्यत इति नैवोक्तत्वात्। मनुबृहस्पतियाज्ञवल्क्याः। विभा
गधर्मसंदेहे बंधुसाक्ष्यभिलेखितैः। विभागभावना कार्या न स्याद्दैविकी क्रियेति। तल्लिंगांतरसद्भावप

व्य.म.
॥५२॥ रोकपंक्ति दृपि विभागसंदेहे दान पगमे पुनर्विभागमाह मनुः। विभागेऽथत्वसंदेहे दायादानां परस्परं। पुनर्विभा
गः कर्तव्यः पृथक्स्थानस्थितैरपि। विभक्तकृत्यमाह नारदः। एकजाता बहवः पृथग्धर्माः पृथक्क्रियाः। पृथ
क्कर्मगुणोपेता न चेत्कार्येषु संगताः। स्वभागान्यदि दद्युस्ते विक्रीणीयुरथापि वा। कुर्युर्यथेष्टं तत्सर्वमीशा
स्ते स्वधनस्य वै इति धर्मा वैधाः पंचयज्ञाय। क्रियावाग्निसाध्या लौकिक्यः। कर्मगुणाः कर्मसाधनानि गृहो
पस्करादीनि। एतेषां पार्थक्येन विभागेऽप्येते विभक्ताः। परस्परानुमतिं विनापि दाने क्रियादिकं कुर्युरिति त
थः। यत्तु बृहस्पतिः। अविभक्ता विभक्ता वा सपिंडाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमन
विक्रये इति। न तद्द्वयोर्विभक्तानामप्यविभक्तेनाधुत्पन्नस्य तादि दानादावनुमितिं विनाधिकारप्रतिषे
धार्थमिति मदनः। विभक्ताविभक्तसंदेहे निरासार्थे विभागोपायः। उक्तानुज्ञया व्यवहारसौकर्याय मितिवि
ज्ञानेश्वरादयः। स्वेच्छया विभक्तं पुनश्च विवदमानं यस्मात्तस्मए वास्वेच्छाकृत विभागोपायः पुनरेव विसंवदेत्। राम:
सराजा शास्त्र केस्थाप्य शासनीयो नुबंधकृत अनुबंधो निर्बंधः अथ सप्रतिबंधदायक्रमः। विभक्ते ॥५२३॥

ष्वसंसृष्टिनोऽप्रजस्य हरणे क्रममाह याज्ञवल्क्यः। पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता गोत्रजा बंधु
शिष्यसब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिरिति
पत्नी पतिव्रतैव धनेन युक्ता दिशिन व्यभिचारिणी। पत्नी पत्युर्धनहरा या स्यादव्यभिचारिणीति कात्यायनोक्ते
। विधवा यौवनस्था चेन्नारी भवति कर्कशा। आयुषः क्षपणार्थं तु दातव्यं जीवनं तदेति हारीतोक्तेः। प्रजाप
तिः। पूर्वं मृता त्वग्निहोत्रं मृते भर्तरि तद्धनं। लभेत्पतिव्रता नारी धर्म एष सनातनः। अग्निहोत्रमग्नीन् स
र्वस्थावरं जंगमं हेमं कुप्यं हेमरसांबरं। आदाय दापयेच्छ्राद्धं मासषाण्मासिकाब्दिकं। पितृव्यगुरुदौहित्रा
न्भर्तुः स्वस्त्रीयमातुलान्। पूरयेत्कव्यपूर्ताभ्यां वृद्धानाप्यतिथीन् स्त्रियः इति। कुप्यं त्रपुसीसादि। यत्तु बृह
स्पतिः। यद्विभक्ते धनं किंचिदाध्यादि विविधं स्मृतं। तज्जाया स्थावरं मुक्त्वा लभेत मृतभर्तृका। वृत्तस्थापि कृ
तेऽप्यंशे न स्त्री स्थावरमर्हतीति तत्र दुहितृरहितपत्नीपरं दुहितृमत्यास्तु स्थावरमपि लभत इति स्मृतिचंद्रि
का। दायादानुमतिं विनास्थावरविक्रयादिपरमिति माधवः। यत्तु कात्यायनः। मृते भर्तरि भर्त्रंशं लभेत

व्य.म.
॥५३॥

कुलपालिका यावज्जीवं न हि स्वाम्यं दानाधमविक्रय इति। तदृद्विचारणागर्भ्यदानादिनिषेधपरं। अदृष्टा
र्थदानतदुपयोग्याधमनादि तु भवत्येव। स्थावरजंगमं चेत्यादिपूर्वोक्तवाक्यात्। व्रतोपवासनिरता ब्रह्मच
र्ये व्यवस्थिता। दमदाननरता नित्यमपुत्रापि दिवं व्रजेदिति कात्यायनवचनादपि स एव। अदायकं राजगामि यो
षिद्भृत्यौर्ध्वदेहिकं। अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्तदर्पयेदिति। यदपि नारदः। अन्यत्र ब्राह्मणात्किं
त्विराजा धर्मपरायणः। तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृत इति तदनूढस्त्रीपरं। पत्नीपदश्रवणा
त्। मनुनारदः। भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा। विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं विना। भर
णं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्। रक्षंति शय्यां भर्तुश्चेदाच्छिंद्युरितरासु च। तद्विभक्तसंसृष्टपरं तत्स्त्री
परं तत्सु क्रमे पाठादिति मदनः। स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी। अविभक्ते धनांशे तु प्राप्नोत्याम
रणांतिकं। अविभक्तपदं संसृष्टस्याप्युपलक्षकं तु शब्दो वाशब्दार्थे तेन पक्षद्वयं। तत्संतः पत्नीपरं। आद्यो राम:
वरुद्धापर इति मदनः। तत्तद्व्यवस्थामूलं तु चिंत्यं। तात्विका तु व्यवस्था मादस एव। नोक्तुमर्हति कृपांशं पुरस्कृ ॥५२४॥

पणेरता। न कुर्याद्यदि शुश्रूषा चैलपिंडं नियोजयेदिति मराव। अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिनी। व्यभि
चाररता या च स्त्रीधनं नैव सार्हति। नारदः। भरणं चास्य कुर्वीरन्स्त्रीणामाजीवनक्षयात्। रक्षंति शय्यां भर्तु
श्चेदाच्छिंद्युरितरासु चेति। पत्नु एवमेव विधिं कुर्याद्योषित्सु पतितास्वपि। वित्रान्नपानं देयं तु वसेयुश्च गृहां
तिक इति। तद्गर्भपरमिति यच्च कृतः एवं विधि परिति नत्यागरूपं। शंकितव्यभिचारायामपि भरणमात्रं मे
व। विधवा यौवनस्था चेन्नारी भवति कर्कशा। आयुषः क्षपणार्थं तु दातव्यं जीवनं तदेति हारीतोक्तेः। कर्कशांकि
तव्यभिचारेति मिताक्षरा। हेया तस्यै धनं संपत्ता यत्नी धनं च हरिणीति। अनेकास्तु ता विभज्य गृह्णीयु। तस्माच्च
भावे दुहिता। अत एव मनुः। यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठंत्यां कथमन्यो धनं
हरेत्। दुहितरो नेकाश्चेद्विभज्य गृह्णीयुः। तत्रापि कादिविदूढाऽपरान्दूढा चेदनूढा चेदनूढैव। पत्नी भर्तुर्ध
नहरी या स्यादव्यभिचारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदेति कात्यायनात्। ऊढासु काचित्सधना
ऽपरा निर्धना चेत्सैव लभेत। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति गौतमोक्तेः। अप्रतिष्ठिता निर्धना

व्य.म:
।।५४।। अत्र पदं पत्न्युपलक्षकमिति सांप्रदायिकाः। दुहित्रभावे दौहित्राः। अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मता इति विष्णूक्तेः। दौहित्राभावे पिता। तदभावे माता। तथा च कात्यायनः।
अपुत्रस्यास्य कुलजा पत्नी दुहितरोपि वा। तदभावे पिता माता भ्राता पुत्राः प्रकीर्तिताः। विष्णुश्च। अपुत्रधन
पत्न्यभिगामि तदभावे दुहितृगामि तदभावे दौहित्रगामि तदभावे पितृगामि तदभावे मातृगामि तदभावे
भ्रातृगामि तदभावे भ्रातृपुत्रगामि तदभावे सकुल्यगामीति। यत्तु विज्ञानेश्वरः। द्वंद्वापवादके पितरावि
त्येकशेषे क्रमाप्रतीतावपि तदर्थबोधके विग्रहवाक्ये मातुरभ्यर्हस्य पूर्वनिपातात् आपवाद्युर्य्यवत्क्रमानु
सानात् पितुः पुत्रांतरसाधारणत्वात् मातुस्त्वसाधारण्याच्चादौ मातुस्तदभावे पितुर्धनग्रहणमाह। तदेतच्च
विरोधादुपास्यं विग्रहवाक्ये मातृशब्दस्य पूर्वनिपाते एकशेषस्य द्वंद्वे वैकल्पिकत्वेन तदपवादत्वे साधारण्या
साधारण्ययोः क्रमनियामकत्वे मानाभावाच्च। मातुरभावे भ्रातरः सोदराः। तदभावे तत्सुताः। यत्तु विज्ञानेश्व
रेण सोदराभावे भिन्नोदरास्तदभावे सोदरसुता इत्युक्तं। तत्र भ्रातृपदस्य सोदरेष्वेव शक्तेः भिन्नोदरेषु गौण्या
रामः
।।५२५।।

वृत्तिर्वयविरोधाच्च। किंचित्तु भ्रातर इत्यत्र भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति सूत्रेणासननात् भ्रातरश्च स्वसारश्च
भ्रातर इति विरूपैकशेषेण भ्रात्रभावे भगिन्य इत्याहुः तन्न। विरूपैकशेषे मानाभावात्। भ्रातृपुत्रा अपि पि
तृव्यमरणकाले जातत्विष्टकतयासंज्ञा धनसंबंधाच्च दत्तकपितृका एव तु पितृतो भागकल्पनेति न्यायेन
पित्र्यमंशं पितृव्यांतरैः सह विभज्य गृह्णीयुः। भ्रातृपुत्राभावे गोत्रजाः सपिंडाः। तत्रादौ पितामही। मातर्यपि
च वृत्तायां पितुर्माता हरेद्धनमिति मनूक्तेः। यद्यप्ययं मातुरनंतरं श्रुतस्तथापि बहुक्रमं भ्रातृपुत्राणां मध्ये
निवेशायोगादागंतव्यामंतनिवेशः इतिवत् भ्रातृपुत्रांते निवेशः। तदभावे भगिनी। अनंतरसपिंडाद्यस्तस्य
तस्य धनं भवेदिति मनूक्तेः। बहवो ज्ञातयो यत्र सकुल्या बांधवास्तथा। यस्त्वासन्नतरस्तेषां सोनपत्यधनं ह
रेदिति बृहस्पत्युक्तेः। तस्याश्च पितृगोत्रोत्पन्नत्वेन गोत्रजत्वाविशेषाच्च। सगोत्रान्तरं नास्ति न चात्र धन
ग्रहणप्रयोजकत्वेनोक्ता। तदभावे पितामहः सपत्नभ्रातरौ विभज्य गृह्णीयुः तत्र जनकजन्यत्वेन च सामा
न प्रत्यासत्तेः प्रत्यासत्तिसाम्ये पाठक्रमाद्यत्तु विशेषांतराभावे चान्यत्राप्येवमेव। तेन तयोरभावे प्रपितामह

व्य·म·
॥५५॥

पितृव्यभिन्नोदरभ्रातृपुत्राविभक्तन्यस्तक्लीपु॥ सर्वसपिंडासमानोदकाश्चप्रत्यासत्तिक्रमेण। तांश्चाह मनुः। स
पिंडता तु पुरुषे सप्तमे विनिवर्तते। समानोदकभावस्तु जन्मनाम्नोरवेदने इति सप्तमेनात इत्यर्थः॥ सोदका
भावे बंधवः। तेष्वप्यंतरा आत्मपितृष्वसुः सुता आत्ममातुलपुत्राश्च विज्ञेया आत्मबांधवाः॥ पितुः पितृष्व
सुः पुत्राः पितुर्मातृष्वसुः सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः। मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सु
ताः मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः॥ अत्र क्रमः पाठिक एव। ननु पत्न्यादीनां सर्वेषां स्मृतानि रूपि
तानामेव धनभाक्त्वं बांधवानामपि तथैवास्तु अतः कथं पितुश्च बांधवानां धनसंबंधः॥ पितुः पितृष्वसुः
पुत्रा इत्यादिसंज्ञासंज्ञितसंबंधमात्रार्थत्वेन धनसंबंधार्थमिति चेत्। उच्यते। विनाप्येतद्वचनं पितृपितृमातुल
पितृव्यादिष्विव पितृमातृबंधुष्वपि योगेनैव तच्छब्दप्रवृत्तिसिद्धेर्न वैसंज्ञासंज्ञिसंबंधबोधनानर्थक्यापत्तिः॥ रामः
तेन बंधूनुद्दिश्य धनसंबंधविधौ पितृमातृबंधवः प्रापणेनैव वचोऽर्थवत्ता। बंधुशब्दे नात्रोभयविधा अप्येवमे
वेति दिक्॥ बंधूनामभावे आचार्यस्तदभावे शिष्यः। पुत्राभावे प्रत्यासन्नः सपिंडस्तदभावे आचार्यस्तदभावेंतेवा ॥५६॥

सीत्यापस्तंबोक्तेः। शिष्याभावे सहाध्यायी। तदभावे श्रोत्रियः श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्निति
गौतमोक्तेः। तदभावे ब्राह्मणाः सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः। त्रैविद्याः शुचयो दांतास्तथा धर्मो
न हीयत इति कात्यायनात्। नारदश्च। सर्वत्रादायकं राजा हरेद्ब्रह्मस्ववर्जितं। अदायिकं तु ब्रह्मस्वं श्रोत्रियेभ्य
प्रदापयेत्। बृहस्पतिः। ये पुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्जिताः। तेषां धनहरो राजा सर्वस्याधिपतिर्हि स
॥ इत्यादि। रिक्थे विशेषमाह याज्ञवल्क्यः। वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः। क्रमेणाचार्यसच्छिष्य
धर्मभ्रात्रेकतीर्थिनः। ब्रह्मचारी नैष्ठिकः। उपकुर्वाणस्य तु पित्रादय एव। धर्मभ्राता प्रतिभ्राता एकतीर्थः एका
स्वमा धर्मभ्राता वा सवेकतीर्थ्यश्चेति कर्मधारयः। आचार्यादीनां प्रतिलोम्येनेति मदनः। स्तेयस्य रिक्थग्रा
हिणा येन केनापि राजपर्यंतेनौर्ध्वदेहिकं दग्राहंते कार्यं तथा च विष्णुः। यश्चार्थहरः स पिंडदायी स्मृत इ
ति। निरूपितं चेदं श्राद्धमयूखेऽधिकाराधिकारिनिर्णये मया। अथ संसृष्टिनिर्णयः। तत्र संसर्गमाह बृह
स्पतिः। विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते। अत्र पितृभ्रा

व्य.म.
॥५६॥ त्वपरे वसत्संसृष्टतान्येव वचनेनुपादानात् इति मिताक्षरादिषु । विभागकर्तॄणामानाधिकरण्येनैव से
तिवं पुत्रपित्रादिपदानि तु विभागकर्तृमात्रलक्षकाणि स्वरूपमंतव्वेदिमिनोन्न द्वयं द्विवेदा तिवत् । अन्य
थावाक्यभेदात् । तेन पत्नीपितामहभ्रातृपौत्रपितृव्यपुत्रादिभिरपि सहसंसृष्टता भवति विभक्तोय
एकत्र स्थितः संसृष्ट इति सामानाधिकरण्यपधिकरण्यविभक्तभ्रात्रोः पुत्रादीनां न संसर्गः । विद्यमाने भ्रा
विवाधुनमावयोः पुनर्विभागाविधिः साधारणमित्याकारिकाबुद्धिरिच्छा वा संसर्गः । तत्र संसृष्टिनां पुनर्वि
भागे विशेषमाह मनुः । संसृष्टाः सहजीवंतो विभजेरन्पुनर्यदि । समस्तत्र विभागः स्याज्ज्यैष्ठ्यं तत्र न विद्य
ते । अत्र समस्तत्र विभागः स्यादिति नेनैवृषस्येनिरस्ते पुनर्ज्यैष्ठ्यं च तिषेधो ज्येष्ठकृतमुद्धवैषम्यं नास्ति
संसर्गकालीनव्यवहाराधिकारकृतं तु विभागवैषम्यमस्त्येवेति ज्ञापनार्थ इति केचित् । ज्यैष्ठ्यमित्यादेरथ
वादमात्रत्वात् व्यवहाराधिकेपि सम एव भागः । आचारोप्येवं । तेनाचारमूलकत्वेप्यंतु च समः संभवति त
द्वित्त्वक्ष्यति कल्पनमन्यानमस्माय्यं व्यवहारस्यास्वस्यव्याकरणवत् प्रायेणाचारमूलकत्वाद्वेति राम: ॥५६२॥

त्वपरो बृहस्पतिः । संसृष्टिनां तु यः कश्चिद्विद्याशौर्यादिनार्जितं । अस्मोति तस्य दातव्यो द्वंशाः शेषाः समांशि
नः । अर्जकस्य द्वौ भागौ वित्यनेनैव भागद्वयसिद्धावसंसृष्टविभागे विपित्र्यद्रव्याविरोधेनार्जने भागद्वयं सं
सृष्टिभागे तु संसृष्टधनविरोधेनाप्यर्जने भागद्वयमित्यर्थवदेतद्वचनमिति मदनः । संसृष्टिधनहरणाधि
कारिणमाह याज्ञवल्क्यः । संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः । पत्न्याद्युक्तिरस्यापवादोयं तेना
यमर्थः संसृष्टधनहरणाधिकारितावच्छेदकं न पत्नीत्वादिकं तु संसृष्टित्वमिति । यत्तु विज्ञानेश्वरमदना
दयो यवादस्योत्सर्गसमानविषयत्वनियमात्स्वोक्तस्वर्यातस्यापुत्रस्येत्येतत्सवानुषंगाद्वेतद्यपि पुत्रद्वी
नविषये । अतस्त्याहशमृतसंसृष्टिसंनिहितपत्न्यादिसद्भावेप्यन्यः संसृष्टी वगृह्णीयात् इति चित्यं
तेन विनापि गतौ संनवेत्यामनुषंगे मानाभावात् । समानविषयत्वं तु न वांशोऽपेक्षितं किंतु यथा कथंचित्
न्नतमपि द्वंद्विषयतया । अपुत्रस्येति पदस्यानुषंगाभावे स्वर्यातस्येति स्याप्यनुषंगाभावे न मृतस्येति नलभ
ते । तच्चेत्तन हीयेतांशप्रदानतः । अन्येतान्यतरोवापीति वस्यमाणमनन्तपातित्वाभावात् । अनुषंगे तु पित्रा

व्य.म. सहसंसृष्टिनोःपुत्रपौत्रयोर्वातुल्यांशापत्तिः।तत्रचव्यवहारशास्त्रप्रामाण्यनिदानव्यवहारविरोधः।नत्वत्तु
॥५७॥ षंगाभावेसपुत्रेपत्न्यपेतरवचनप्रवृत्तेरसंसृष्टिपुत्रसंसृष्टिभ्रात्रादीनांसमवायेपत्न्यादेरेवलाभेनतत्पुत्रादि
रितिचेत्तन्न।उत्तरार्द्धव्याख्यापरिहरिष्यमाणत्वात्।अमुंप्रथमपादार्थमपवदति।सोदर्यस्येति संसृष्टि
नःसंसृष्टिस्यतुपद्यते।मृतसंसृष्टिनोधनोधनंसंसृष्टिनःसोदरासोदरयोःसमवायेसोदरएवसं
सृष्टीगृह्णीयादित्यर्थः।उत्तरार्द्धे।दद्याच्चाहरयेच्चांशंजातस्यचमृतस्यचेति मृतसंसृष्टिनोऽप्य
विभागकालेतत्पत्न्यामगर्भायांपश्चादुत्पन्नस्यपुत्रस्यांशंतस्मैसंसृष्टपितृव्यादिर्दद्यात्।तदसत्त्वेतु
स्वयमेवांशंहरेदित्यर्थः।अत्रपुत्रपदमात्रेपित्र्यंशग्रहणाधिकारितावच्छेदकं।नविभागोत्तरोत्पन्नत्व
मप्रयोजकत्वाज्जौरवादेशांतरेविभागात्प्रागुत्पन्नेऽज्ञातेचांशानधिकारितापत्तेः।अतःपूर्वोक्तन्याया
संसृष्टिनेपिपुत्रसंसृष्टपितृव्यादिस्तदंशंदद्यादेव।असंसृष्टिसोदरसंसृष्टिभिन्नोदरयोर्विभज्यध राम.
नग्रहणमाहस एव।अन्योदर्यस्तुसंसृष्टिनान्योदर्योधनंहरेत्।असंसृष्टपिचादद्यात्संसृष्टोनान्यमात ॥५८॥

जइति।अत्रान्योदर्यान्यमातृजादिपदैर्नसपदैर्नसपत्नैवभ्रातोच्यते।किंतुपितृव्यादिरपियोगाविशेषात्
असंसृष्टपातिदेहलीदीपवत्पूर्वोत्तरपदाभ्यामन्वेति।संसृष्टपदंचावृत्त्याऽव्यसंसर्गवत्सोदरसं
सर्गवतश्चसोदरस्यबोधकं।अद्येपेपिशाचेपितृनंतरबोध्यार्थे।श्लोकान्तेएवकारोध्याहार्यः
तद्देतेवाक्यार्थः।अन्योदर्यौन्नोदरः।पत्नीपितृपितामहसपत्नभ्रातृपितृव्यादिःसंसृष्टिचेद्धनंहरेत्।अ
संसृष्ट्यप्यन्योदर्येनेति।तेनासोदरस्यान्वयव्यतिरिकाभ्यांसंसर्गोधनग्रहणेकारणमुक्तं।असंसृष्ट
पिसंसृष्टस्येऽसोदरोगृह्णीयात्।अनेनसोदरत्वमात्रमेवकारणमुक्तं।संसृष्टोऽव्यसंसर्गवान्यमातृ
जएवकेवलंनगृह्णीयादिति।तेनैकसंसृष्टत्वेनपरःसोदरत्वेनेतिद्वावपिविभज्यगृह्णीयातामितिनि
गर्वः।एतमेवार्थसंसृष्ट्यधिकारेस्पष्टयतिमनुः।येषांज्येष्ठःकनिष्ठोवाहीयेतांशप्रदानतः।म्रियेतान्यत
रोवापितस्यभागोनलुप्यते।सोदर्याविभजेयुस्तंसमेत्यसहिताःसमं।भ्रातरोयेचसंसृष्टाभगिन्यश्च
सनाभयइति।हीयेतांश्रमोत्तरगतियातीत्यादिना।सोदर्याभ्रातरइत्यन्वयः।येचसंसृष्टाःपत्नीपितामह

हस पत्न्याः भ्रातृपितृव्यादयः। अत्र विशेषमाह प्रजापतिः। अंतर्धनं तु यद्द्रव्यं संसृष्टानां तु तद्भवेत्। न्यूनसिद्धं
त्वसंसृष्टाः गृह्णीयुर्यथांशतः। अंतर्धनं च निक्षेपादिना गोपितं अत्र कोशः सुवर्णरूप्यादि संसृष्टे भिन्नोद
रा गृह्णीयात्। सुवर्णं तु सोदर भ्रातृ भगिन्यो विभज्य गवाश्वादि तु सोदरासोदरं भ्रातरो भगिन्यश्चेत्यर्थः। भिन्नो
दरसंसृष्टे वगवाश्वादि यातीति मदनः। तत्वतद्वचनानारूढं। अन्यतरमात्रसत्वे त्वसंसृष्टोपि सोदर एवेति
स्मृतिचंद्रिकायां। तत्रमानं चिंत्यं। सोदरे द्वयोपि केचित्संसृष्टिनः परे तु न तत्रापि संसृष्टिन एव गृह्णीयुः। सो
दरत्वसंसृष्टित्वकारणद्वयसद्भावात्। अत एव गौतमः। संसृष्टिनि प्रेते संसृष्टो रिक्थभागिति बृह
स्पतिः संसृष्टो यो पुनः प्रीत्या तौ परस्परभागिनाविति। अत्रायं निर्गलितोर्थः पुत्रपित्रा संसृष्टोऽसंसृष्टो
बा हृत्स्नपितृधनं अंशं गृह्णीयात्। पुत्रत्वे सेपि वोत्रा ग्रहणाधिकारितात् विच्छेदकत्वात्। पुत्रेष्वप्येकः संसृ
ष्टः परो न चेत् संसृष्ट एव संसृष्टिनस्तु संसृष्टा पुत्रो संसृष्टपुत्रापुत्रे समवायेपि पुत्र एव। दायाद्वापहरेद्भा
गं मिति तन्व्याख्यातत्वात् पुत्रभिन्नसंसृष्टेपि भ्रातृपितृव्यादीनां समवायेपि न एव। तत्राप्याद्येषु

ता ततः पितेति वक्ष्यते। भ्रातृपितृव्यादपत्न्याः पितृव्यैव गृह्णीयुः सर्वेषु संसृष्टत्वरूपग्रहणाधिकारिता
विच्छेदकसद्भावात्। संसृष्टपितृव्यसपत्न्यात्रादीनां समवायेपि विभज्यैव। सोदरस्य तु सोदर इत्युक्ते
ः केवलायाः पत्न्या एव संसृष्टत्वेसैव गृह्णीयात्। संसृष्टिनस्तु संसृष्टश्शुक्तं संसृष्टश्यापि तयास्तदा
न्येषां संसृष्टिनां समवायेत एव नास्ति। तथा च संसृष्टिप्रक्रमे शंखनारदौ। भ्रातृणामप्रजाः प्रेयात्कश्चि
च्चेत्प्रव्रजेत वा विभजेरन्धनं तस्य शेषास्ते स्त्रीधनं विना। भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात्
रक्षंति शय्यां भर्तुश्चेदाच्छिंद्युरितरासु यातस्य दुहितुस्तस्याः पित्र्यांशाद्भरणं मतं। आसंस्काराद्भरेद्भागं
परतो बिभृयात्पतिः। अत्र यथा यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्स त्रेधा तंडुलान्विभजेदित्यत्र ह
विरभ्युदियादित्यनेनैव हविः प्रकृत्य वगमान्निर्वापो विवक्षा। तथा प्रक्रमादिवा मरणप्रजत्वाविनाग
दि संसृष्टिना कर्तृत्वावगमाद्भ्रातृणामित्यविवक्षितं यत्तु संसृष्टिप्रक्रमे शंखः स्वर्यातस्य ह्यपुत्रस्य
ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नीति। तत्र येन पितृव्यभ्रातृपुत्रसमवाये

व्य.म.
॥५९॥

आचारः सहसंसर्गस्तस्मात्तरस्य स्त्रियमरणे तदीयासंसृष्टिभ्रात्रादीनां क्रमनियमार्थमिति मदनः। प
त्न्याद्यभावे मातातत। पिता सपिमरा वा ज्येष्ठासंयता पत्न्यभावे भगिनी। ना याच बृहस्पतिः। पातस्याभ
गिनीसुतस्ततो ज्ञेयः षडेते इति। अनपत्यस्य धर्मे पं... आर्यापितृकस्य चांके चित्सुयात् स्वर्दुहितेति
पियेदुः दुहितृभागिन्यारभावेनंतरसपिंडा अपुत्रा धनं मनुः अध्यमध्याहवानिकं दत्तं च प्राति
कर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं। षडिति न्यूनसंख्याविच्छेदार्थं। तेन पितृमातृपति
भ्रातृदत्तमध्यग्न्युपागतं। अधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितमिति याज्ञवल्क्योपयसंग्रहते
विष्णुश्चाधिकमाह पितृमातृसुतभ्रातृदत्तमध्यग्न्युपाहृतं आधिवेदनिकं बंधुदत्तं शुल्कान्वा
धेयकमिति। अध्यग्न्यादीनाह कात्यायनः। विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्यग्निकृतं
सद्भिः स्त्रीधनं परिकीर्तितं यत्पुनर्लभते नारी नीयमाना पितुर्गृहात्। अध्यावहनिकं स्त्रीणां तदुदाहृतं॥ राम:
प्रीत्या दत्तं तु यत्किंचित् श्वश्र्वा वा श्वशुरेण वा। पादवंदनिकं चैव प्रीतिदत्तं तदुच्यते। विवाहात्परतो यत्तु ॥५२०॥

लब्धं भर्तृकुलात् स्त्रिया। अन्वाधेयं तु तद्द्रव्यं लब्धं बंधुकुलात्तथा। गृहोपस्करवाह्यानां दोह्याभरणक
र्मिणां। मूल्यं लब्धं तु यत्किंचिच्छुल्कं तत्परिकीर्तितं। गृहोपस्करादेर्जनेतन्नरलेकन्यादानकाले कन्यार्थे यत्
शुल्कमित्यर्थः। अधिवेदनिकं विवृणोति याज्ञवल्क्यः। अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समानं दत्ते स्त्री
धनं यासां दत्ते त्वर्धं प्रकल्पयेत्। अर्धमिति यावताधिवेदनिकद्रव्यसमं भवति तावदित्यर्थः। देवलः। भर्त्रा
प्रतिश्रुतं देयमृणवत्स्त्रीधनं स्मृतमिति स्मृतेः। प्रधि निश्रुतं देयमृणं ऋण पतस्त्रीधनमुक्तं। प्रतिश्रुतांत्र
स्त्रियै। स्त्रीभ्यो धनदाने विशेषमाह कात्यायनः। पितृमातृपितृभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै। यथाशक्त्या
द्विसाहस्राद्दातव्यं स्थावरादृते। स्थावरातिरिक्तं सहस्रद्वयपणावधि देयमिति मदनः। व्यासोऽपि द्वि
सहस्रपरो दायः स्त्रियै देयो धनस्य च। इदं च द्विसाहस्रावधिकं दानं प्रतिवर्षं। अनेकवर्षेषु ततोऽधिकमपि
के स्थावरमपि देयमित्यपि मदनः। यद्यादवं चैन्वदत्तेद्ध्यधारणमात्रार्थं देशे च भूषणादौ स्त्रीत्वं नास्ती
त्याह कात्यायनः। तत्रसोपधिपदत्तं यच्च योगवशेन वा। पित्रा भ्रात्राथ पत्या वा तत्स्त्रीधनमुच्यते। शिल्पप्राप्ते

पित्रा भ्रात्रा सखादिवा भ्रात्रा पित्र्या धनत्वं नास्तीत्याह स एव। भ्रातृभिर्यैस्सुयत्किंचित्स्वात्मा चैव यदन्यत। भर्तुस्वा
म्यं तदा तत्र शेषं तु शेषं तु स्त्रीधनं स्मृतं पत्नी नार्यपुत्रस्य दासस्य निर्धना: वैसेएते। यत्ते समधिगच्छंति यस्मै
ते तस्य तद्धनं। नंन वेदितितद पित्रोस्त्याद्युपार्जित धनपरं भ्रात्राधिवेदनिर्धना: सर्व एव ते। आधिवेदनिकादि
षपस्त्वातंत्र्यपरमितित्तु युक्तो। अत एव मनु:। न निर्हारं स्त्रिय: कुर्युः कुटुंबाद्बहुमध्यका। तत्स्वकादपि वि
त्ताद्धि स्वस्य भर्तुरनाज्ञयेति। निर्हारो व्यय: कस्मिन्निधने स्वातंत्र्यमाह कात्यायन:। ऊढया कन्यया वापि
र्प्पत्युः पितृगृहेऽथवा। भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतं। सौदायिकं धनं प्राप्य स्त्रीणां स्वातं
त्र्यमिष्यते। यस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनं। सौदायिके सदा स्त्रीणां स्वातंत्र्यं परिकीर्तितं। विक्रये चैव
दाने च यथेष्टं स्थावरेष्वपि। भर्तृदत्ते स्थावरे तु न स्यात्तंत्र्यं न वेत्तदा। भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्
सा यथाकाममश्नीयाद्दद्याद्वा स्थावराद्दृते इति नारदोक्तेः। भर्त्रादीनां स्त्रीधने स्वातंत्र्याभावमाह स एव। न भर्ता नैव च
सुतो न पिता भ्रातरो न च। आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णव:। यद्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बला

त्। सवृद्धिकं स दाप्य: स्याद्दंडं चैवाप्नुयात्। तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकं। मूल्यमेव स दाप्य: स्याद्यदा
स धनवान्भवेत्। मनु:। जीवंतीनां तु तासां ये तद्धरेयुः स्वबांधवा:। तान् शिष्याच्चौरदंडेन धार्मिकः पृथिवीपतिः। पत्यौ
जीवति य: स्त्रीभिरलंकारो धृतो भवेत्। न तं भजेरन्दायादा भजमाना: पतंति ते इति। धृतो भर्त्रादिना तस्यै दत्त: स
तया धृत इत्यर्थ:। देवल:। वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्। भोक्त्री चा स्वयमेवेदं पतिर्नार्हत्यनापदि। वृ
थामोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकं। पुत्रार्त्तिहरणे वापि स्त्रीधनं भोक्तुमर्हति। वृत्तिर्जीवनार्थं पित्रादिदत्तं ध
नं लाभो वृद्धि:। मोक्षस्त्यागो दानमिति यावत्। पुत्रपदं कुटुंबोपलक्षकं। याज्ञवल्क्य:। दुर्भिक्षे धर्मकार्ये व्या
धौ संप्रतिरोधके। गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हति। अत्र भर्तृग्रहणात्तद्भिन्नेन दुर्भिक्षाद्यापद्यपि स्त्री
धनं न ग्राह्यमित्युक्तं। धर्मकार्यमावश्यकं। संप्रतिरोधके बंधने। कांचित्कामो दद्यादित्याह देवल:। अप
चेत्स्त्रीहिनार्थस्या न च तां भजते पुन:। प्राप्तानिष्टमपि च पतिर्दाप्यश्च तद्बलात्। ग्रासाच्छादनवासानामे
च्छेदो यत्र यो पितत्स्वमाददीत स्त्री विभागं रिक्थिनस्तदा। रिक्थिन: सकाशादित्यर्थ:। इदं च माधीपरं

ह्यातु न पितृव्यागमर्हति। तथा च स एव। अप्रकारक्रियायुक्ता निर्मर्यादार्थनाशिका। व्यभिचाररता या च स्त्रीध
नं न च सार्हति। स एव यज्ञार्थं द्रव्यमत्यन्तं तस्माद्द्रव्यं मुत्यन्तं नियोजयेत्। स्थानेषु धर्मयुक्तेषु धर्मयुक्तेषु न स्त्रीमू
र्खविधर्मिषु। स्त्रीमरणानन्तरं मन्वाधेयाख्यतद्धनग्रहणेऽधिकारिण्य वक्ष्यामाह मनुः। अन्वाधेये च यद्दत्तं पत्या
प्रीतेन चैव यत्। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत्। प्रजानां विहीन हि स एव। जनन्यां संस्थितायां तु स
मं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः। यत्तु दुहितॄणां भावे न पुत्राणामेव साहित्येनाधि
कारः। अतस्तत्र तत्साहित्यं यत्र तु कन्यानामेवाधिकारः। या सत्त्वात्साहितमरूप्यते तत्र तु कन्यापुत्रयोः परस्प
र संघातसंसाहित्यं विधीयत इति मिताक्षराशयः। परे तु अन्वाधेयमदृष्टप्रीतिदत्तविषये कन्यापुत्रयोः परस्प
र संघातसंसाहित्यं विधीयत इत्याहुः। भगिनीषु विशेषमाह मनुः। स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी
अप्रत्ता चेत्समूढा तु लभते मानमात्रकं। तदंशिनी पुत्रसमांशिनी। अप्रत्ता अविवाहिता। तस्याः सर्वे कुडाम
नमात्रं किंचिन्मात्रं लभेत। उढामात्रं कां तत तदंशिनी पुत्रसमांशिनी। अप्रत्ता अविवाहिता। तस्याः सर्वे जिडा

मानमात्रं किंचिन्मात्रं लभेत इत्यर्थः। अप्रत्तानां वे सधवानां प्रत्तसमोंऽशो भगिन्यो बांधवैः सार्धं विभजेरन्न
न रिक्था इति कात्यायनोक्तेः। दौहित्र्योपि किंचिद्देयाः। तासां मातृदुहितॄणामपि यथार्हतः। तामामघा
द्यनां किंचित्प्रदेयं प्रीतिपूर्वकमिति मनूक्तेः। यौतकं तु नूढानामेव न पुत्राणां। तथा च स एव। मातुस्तु यौ
तकं यत्स्यात्कुमारीभाग एव सः। यौतकं विवाहादिकाले येत्लो सहैकासनं प्राप्तयुतयोर्येतिकामिति नि
घंटोक्तेः। इति मदनः। अन्वाधेयमदृष्टप्रीतिदत्तमित्र पूर्वोक्तपरिभाषिके स्त्रीधने तु विशेषमाह गौतमः। स्त्रीधे
नं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च। ब्राह्मणीकन्या तु समयतस्य वा भवेत्। वाकारस्यार्थे तेन विभ
ज्येति लभ्यते। ब्राह्मणीपदं समानजातिकन्योपलक्षकमिति केचित्। मातुस्तु तत्र चिंसं दुहितॄणामभा
वे दुहितृसंततिः। मातुर्दुहितरोऽभावे दुहितॄणां तदन्वय इति नारदोक्तेः। भिन्नमातृकाणां दुहितॄणां दौहित्रा
णां दौहित्राणां च अनेकपितृकाणां तु पितृतो भागकल्पनेति न्यायेनात्रकल्पनं यत्तु याज्ञवल्क्यः। मा
तुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वय इति। तत्राप्यन्वयपदं कन्यासंततिपरमिति केचित्। परे तु दुहि

नभावेतुपुत्राएवगृह्णीयुः। नारदीयेतद्दामातुरेवपरामर्शादित्याहुः॥ आचारसंवादोऽप्यपेक्षः। विषमलिंगादि
ति॥ ऋणसमन्यूनंवापुत्राएवगृह्णीयुरितिसांप्रदायिकाः। दुहित्रादीनामभावेपुत्रपौत्राद्यागृह्णीयुः। दुहि
तॄणामभावेतुरिक्थंपुत्रेषुतद्धनमितिकात्यायनोक्तेः। अपेदुहित्रादीनांमातृधनेऽधिकारोक्तः। अध्यग्न्यध्यावाहनि
कमित्यादिपूर्वोक्तपारिभाषिकस्त्रीधनएवमातृस्वामिकधनमात्रेपरिभाषावैयर्थ्यात्तेनस्त्रीधनंस्यापेदं
स्यानां। स्त्रीधनंदुहितॄणामित्यादीनिपूर्वोक्तानिस्त्रीधनपदवंतिबृहस्पति। गौतमादिवचनानिपारिभाषि
कपराण्येवाथानितुस्त्रीधनपदाभावेयेकार्यकानिभजेरन्सुताः। पित्रोरूर्ध्वंरिक्थमित्यादीनितान्य
पेतत्पराण्येव। एकमूलकल्पनालाघवात्। यत्तुविभजेरन्सुताः। पित्रोरूर्ध्वंरिक्थमृणंसममितियाज्ञ
वल्क्योक्तंतत्पारिभाषिकातिरिक्तविभागेकर्तव्येनादिलसपरेतेनपारिभाषिकातिरिक्तमातृधनेदुहितृस
त्वेपुत्राद्यएवलभेरन्तदभावविधसंतापभावेतुपारिभाषिकस्त्रीधनेप्रकृत्यविशेषमाहयाज्ञवल्क्यः। अतीता
यामप्रजसिबांधवास्तदवाप्नुयुः। विवाहभेदेनबांधवव्यवस्थामाहसएव। अप्रजःस्त्रीधनंभर्तुर्ब्राह्मादिषु राम:
॥५२३॥

वेष्वपि। दुहितॄणांप्रसूताचेच्छेषेषुपितृगामितत्। भर्तुरभावेतत्कुलेतस्याःप्रत्यासन्नोलभतेपित्रभावे
पितृकुलेतस्याःप्रत्यासन्नः। अनंतरःसपिंडाद्यस्तस्यधनंभवेदितिमनुनाऽभिहितानिरूपितार्थएवप्रत्यास
त्तेर्धनाधिकारितावच्छेदकत्वेनाभिधानात्। यत्तुमिताक्षरायांभर्त्रभावेतत्प्रत्यासन्नानांसपिंडानामपि
त्रभावेचतत्प्रत्यासन्नानांसपिंडानामितितत्रापितेतस्याःप्रत्यासन्नास्तत्प्रत्यासन्नास्तदारानकुलेप्रत्या
सन्नाइतिर्योवादिसेवादिसेवक्षारध्येयं। ब्राह्मादिषुचतुरेवतथाचमनुः। ब्राह्मदैवार्षगांधर्वप्राजापत्येषु
यद्धनं। अतीतायामप्रजसिभर्तुरेवतदिष्यते। यत्त्वस्यैस्याद्धनंदत्तंविवाहेष्वासुरादिषु। अतीतायामप्रजसि
मातापित्रोस्तदिष्यते। ब्राह्मादिविवाहेषुभर्तुरभावेआसुरादिषुचपित्रोरभावेपारिभाषिकस्त्रीधनेऽ
धिकारिणोबृहस्पतिः। मातृष्वसामातुलानीपितृव्यस्त्रीपितृष्वसाश्वश्रूः। पूर्वजपत्नीचमातृतुल्याःप्रकीर्ति
ताः। यदासामौरसोनस्यात्सुतोदौहित्रएववा। तत्सुतोवाधनंतासांस्वस्त्रीयाद्याःसमाप्नुयुः। दुहितृदौहित्री
रप्यभावेऽत्रयोध्यः। तदभावएवौरसदौहित्रपौत्राधिकारात्। आसुरादिविवाहेषुबंधुदत्तेषुकात्यायनः

बंधुदत्तंतुबंधूनामभावेपुत्रगामितत्॥ शुल्कविषयेतुगौतमः॥ भगिनीशुल्कंसोदर्याणामूर्ध्वंमातुरिति
पूर्वंचेत्॥ शुल्कंनववधूवरेतितद्विवाहात्प्राक्मृतायांबोध्यं॥ अत्रविशेषमाहकात्यायनः॥ मृतायांदत्तमादद्या
त्परिशोध्योपयुक्तं॥ पूर्वंदत्तंशुल्कंमृतायांकन्यायांस्वस्यतस्याःपितुश्चान्यथाहरविशिष्टंभर्तृगृहस्त्रीयादिस
र्व॥ क्वचिद्विशेषमाहबौधायनः॥ रिक्थंमृतायांकन्यायांगृह्णीयुःसोदराःसमं॥ तदभावेतुमातुःस्याद्वेदिति॥ इदंतुविवा
हात्प्राक्मृतायांवाग्दानकामानमातामहादिदत्तालंकारादिविषयमितिसांप्रदायिकाः॥ अथयानंशाः॥ याज्ञव
ल्क्यः॥ क्लीबोथपतितस्तज्जःपंगुरुन्मत्तकोजडः॥ अंधोचिकित्स्यरोगाद्याभर्तव्यास्तुनिरंशकाः॥ तज्जः॥ पतितो
त्पन्नः॥ विज्ञानेश्वरमोक्षादिनापुंक्लीबानुक्तौ॥ ततएवावाहितक्लीबोत्पन्नवत्॥ मनुः॥ अनंशौक्लीबपतितौजात्यंधे
बधिरौतथा॥ उन्मत्तजडमूकाश्चयेचकेचिन्निरिंद्रियाः॥ निरिंद्रियाप्राणादिरहिताः॥ नारदः॥ पितृद्विट्पतित
षंढोयश्चस्यादौपपातिकः॥ औरसाअपिनैतेंशंलभेरन्क्षेत्रजाःकुतः॥ दीर्घतीव्रामयग्रस्ताजडोन्मत्तांधपंग
वः॥ भर्तव्याःस्युःकुलस्यैतेतत्पुत्रास्त्वंशभागिनः॥ औपपातिकः॥ राजद्रोहायपराधेनबंधनिर्घटफोटे राम:
॥५२४॥

दिनावद्धितइतिमदनः॥ व्यावसायार्थंनावासमुद्रमध्येद्वीपांतरंगतेतिशुल्कं॥ द्विजस्याब्धौतुनौयातुःशोधित
स्यापिसंग्रहः इतितस्यकलौसंसर्गनिषेधात्॥ राजद्रोहादेर्घटवृद्धिकारयोरविधानाच्च॥ शंखलिखितौ
अपपात्रितेरिक्थपिंडोदकानिम्याःनिवर्तंतइति॥ वसिष्ठः॥ अनंशास्त्वाश्रमांतरगताइति॥ नैष्ठिकब्रह्मचारिवा
नप्रस्थयतयइत्यर्थः॥ कात्यायनः॥ अक्रमोढासुतश्चैवसगोत्राद्यश्चजायते॥ प्रव्रज्यावसितश्चैवनरिक्थंतेषु
कर्हिचित्॥ सगोत्रादिति सगोत्रोढायांतस्माज्जातइत्यर्थः॥ अक्रमोढासुतः ज्ञात्रजकानीनादिरितिकेचि
त्॥ ज्येष्ठायांकन्यायामपरिणीतायांकनिष्ठाकृतविवाहाचेत्तदातेद्वेअपित्वक्रमोढाशब्देनोच्यतेइतितुयु
क्तं॥ तत्रपितृसवर्णत्वेशंग्राह्यतांनाक्रमाहसएवाक्रमोढासुतस्तस्यवक्ष्योसवर्णश्चपदापितु॥ असवर्णप्रसू
जश्चक्रमोढायांचयोभवेत्॥ प्रतिलोमप्रसूतायांभर्तासुत्पत्र्यापुत्रोनांशभाक्॥ तथाचसएव॥ प्रतिलोमप्र
सूतायास्तस्याःपुत्रोनरिक्थभाक्॥ ग्रासाच्छादनमत्यंतंदेयंतद्बंधुभिर्मतमिति॥ गुणवत्सुत्रांतरसत्वेदृष्टं
स्यांशानार्हतामाहमनुः॥ सर्वएवविकर्मस्थानार्हंतिभ्रातरोधनमिति॥ बृहस्पतिः॥ सवर्णानोपगुणान्नार्ह

स्यात्पित्र्यकैधनैः॥ मनुरपि॥ उद्वाहः श्रीक्रियायेतेषां तत्तु विधीयते। उन्मार्गो धर्मतोन्मः पितरं त्रायते सुत॥ अनंशस्तु विप
रीतेन जनना क्लिप्रपोतं। एते चानंशा रिक्थस्य। हि निर्यावज्ञा वयोषणाया॥ सर्वेषामपि तु न्याय्यं दातुं शक्त्या म
नीषिणा। ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेदिति मनूक्तेः। अत्यन्तं यावज्जीवं नत्वग्रयाज्यो निरंशकाः इति पूर्वोक्त
याज्ञवल्क्याद्या। आश्रमान्तरगतपतिततत्सुताश्च नेतव्या। तथा च वसिष्ठः। अनंशास्त्वाश्रमान्तरगताः। क्लीबो
न्मत्तपतिताश्च भरणं क्लीबोन्मत्तजडांधकाः। पतितस्तदपत्यं च लिंगादारा पांशु भागिनः। तेषां पतितवर्ज्येभ्यो
भक्तवस्त्रं प्रदीयते। लिंगानि लिंगधारा। बौधायनः। अतीतव्यवहारान् ग्रासाच्छादनैर्बिभृयुरन्धजडक्ली
बव्यसनिव्याधितांश्चाकर्मिणः पतिततज्जवर्जमिति। अन्याय्यस्तु ततत्सुत्रवपि भरणोपगा इति मदनादयः॥
अंशं च पुत्रास्तु निर्दोषा भागं लभेरन् बातेषामेवौरसाः पुत्रा भागहारिणो न तु पतितस्य पुत्रा नायेकर्मणि
कृतेन रोत्पन्नाः प्रतिलोमासु स्त्रीसुत नाद्या भागिनस्तत्सुताः। पैतामहेष्वर्थे इति विज्ञानेश्वरोक्तेः। औरसाः क्षेत्रजा रामः
स्तेषां निर्दोषा भागहारिण इति याज्ञवल्क्योक्तेश्च। तत्कन्यास्तु पत्नीषु च विशेषमाह स एव। सुताश्चैषां प्रभर्त ॥५२५॥

व्या यावदेते स्युरसंस्कृताः। अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव
च। व्यभिचारे वह्निर्निष्कासनमपोषणं च प्रतिकूल्येन हिंस्रासनेव। भरणं तु कार्यमेवेति मदनादयः॥ इति
श्रीमीमांसकश्रीशंकरभट्टात्मजभट्टनीलकंठकृते भगवद्भास्करे व्यवहारमयूखे दायभागनिरूपणं प
मं॥ ७॥ अथ ऋणादानं। तत्र धनिकस्य प्रयोगप्रकारमाह बृहस्पतिः। परिपूर्णं गृहीत्वाधिं बंधं वा साधु
लग्नकं। लेख्यारूढं साक्षिमद्वा ऋणं दद्याद्धनी सदा। यावत्तावत्कमन्यानशो भ्यते तावदेतऋद्धे त्रादेदान
न विक्रेयाधाकरणाघन्यहं न करिष्यामीति निर्बंधो बंधः लग्नकः प्रतिभूः। स एव। कुसीदात्मा दातश्चै
व निर्दिशकैः प्रगृह्यते। चतुर्गुणं वाष्टगुणं कुसीदाख्यमतः स्मृतं। ऋणिकेन तु या वृद्धिरधिका संप्रक
ल्पिता। आपत्कालकृता नित्यं दातव्या कारिता तु सा। प्रतिकालं ददात्येकवीरवा वृद्धिस्तु सा स्मृतेति। प्रतिकालं
प्रतिदिनं प्रतिमासं प्रतिवर्षं वेत्यर्थः। याज्ञवल्क्यः। अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके। वर्णक्रमाच्छ
तं द्वित्रिचतुःपंचकमन्यथा। अन्यथा बंधके वा समं संबंधे भागाशीतितः षष्टो भागः सप्तमको निराधाने

व॰मु॰
॥६५॥

द्विकशतं मासत्वान उदाहृतः॥ याज्ञवल्क्यः॥ कारकाशुदत्तकं सम्यग्विप्राकं व्रातं॥ दधुरिमुनरवाकास्तस्यानु
बंधः द्दद्युर्वोस्विकृतां वृद्धिं सर्वेसिवासुजातेषिति॥ विष्णुः॥ योगृहीत्वाऋणं सर्वत्वाद्रास्यामीतिमान्नकं नददा॥
दर्शो नततः त्रिनाद्वृद्धिमवाप्नुयात्॥ याचितेवृद्धिमाहकात्यायनः॥ योचितकमादायतमदत्वा दिशं व्रजेत्॥ ऊ
र्ध्वं संवत्सरात्तस्यातद्धनं वृद्धिमाप्नुयात्॥ कृत्वोद्धारमदत्वा योयाचितस्तु दिशं व्रजेत्॥ ऊर्ध्वं मासत्रयात्तस्मा
त्तद्धनं वृद्धिमाप्नुयात्॥ स्वदेशेवस्थितोयस्तु नददद्याचितः क्वचित्॥ तेनाकारितावृद्धिं अनिच्छतिचदा
पयेत्॥ नारदः॥ न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्॥ अनाकारितमप्यूर्ध्वं वत्सरार्धाद्विवर्धते॥ कात्याय
नः॥ प्रीतिदत्तं न वर्धेत यावन्न प्रतियाचितं॥ याच्यमानमदत्तं चे वर्धते पंचकं शतं॥ पण्यं गृहीत्वा योमूल्यम
दत्वैव दिशं व्रजेत्॥ ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्॥ निक्षिप्तं वृद्धिशेषं च क्रयं विक्रयमेव च
याच्यमानमदत्तं चेवर्धते पंचकं शतं॥ नारदः॥ पण्यमूल्यं भृतिर्न्यासो दंडो यश्च प्रकल्पितः॥ बृहस्पतिः॥
हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके॥ धान्ये चतुर्गुणा प्रोक्ता शदवाह्यलवेषु वा॥ शदः पुष्पमूलफल

राम॰
॥५२६॥

दि॥ वाह्यं बलीवर्दादि॥ लवो मेषोर्णचमरीकेशादि॥ यत्तु मनुः॥ धान्येशदसवाह्येनातिक्रामतिपंचतामिति॥ तत्
पक्षुणादिनिषेधपरं॥ कात्यायनः॥ मणिमुक्ताप्रवालानां सुवर्णरजतस्य च॥ तिष्ठति द्विगुणा वृद्धिः फलकैटाविक
स्य तु॥ कैटकीटप्रजनवपट्टकूलतसरावस्त्रादि॥ वसिष्ठः॥ ताम्रयःकांस्यरीतीनां त्रिगुणा सीसकस्य च॥ त्रिगुणाति
ष्टतोवृद्धिः फलानिचिरकृतस्य तु व्यासः॥ शाककार्पासबीजेषु षड्गुणा परिकीर्तिता॥ कात्यायनः॥ तैलानां चैव सर्वेषां
मद्यानामथ सर्पिषां॥ वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य तु॥ विष्णुः॥ हिरण्यस्य द्विगुणा वृद्धिस्त्रिगुणा वस्त्रस्य धा
न्यस्य चतुर्गुणा रसस्याष्टगुणा संततिः स्त्रीपशूनामिति॥ पुष्पमूलफलानि चतुर्गुणा धृतमष्टगुणामिति॥ नार
दः॥ ऋणानां सर्वभौमोयं विधिकरः स्मृतः॥ देशाचारस्थितस्त्वन्यो यत्रर्णमवतिष्ठते॥ सार्वभौमासार्वत्रिकः॥
द्वैगुण्यादिसकृत्प्रयोगएव॥ कालांतरेण पुरुषांतरेण तत्रैवरेकेसेकोदितावा प्रयोगांतरेतु परमद्वैगु
ण्याधिका भवति॥ तथा च मनुः॥ कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहिता॥ एकप्रयोगमध्ये तरांतरा गृहामा
णोपिपरमद्वैगुण्याधिकामिति सांप्रदायिका विज्ञानेश्वरादयः॥ अपापविधिः॥ बृहस्पतिः॥ आधिर्वधास

व्य·म·
॥६६॥

माख्यातः स च प्रोक्तश्चतुर्विधः। जंगमस्थावरश्चैव गोप्यो भोग्यस्तथैव च। नारदः। आधिः क्रियत इत्याधिः स विज्ञेयो द्विल
क्षणः। कृतकालोपनेयश्च यावद्देयो द्यतस्तथा। हारीतः। बंधं यथा स्थापितं स्यात्तथैव परिपालयेत्। अन्यथा
न नश्यते लाभो यद्वद्देयो द्यतस्तथा। हारीतः। बंधस्य यथांशः। याज्ञवल्क्यः। गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते
इति। हापिते उपकाराक्षमनीते इत्यर्थः। कात्यायनः। अकामममन्यं तु ज्ञातामाधियः कर्म कारयेत्। भोक्ता कर्म
फलं दद्यादद्धिवान लभेत सः। कर्म कारयेत तत्पर्युंजीत कर्मफलं नाटकं। याज्ञवल्क्यः। नष्टो देयो विनष्टश्च दै
वराजकृतादृते। नष्टो विकृतिं गतः। पूर्ववत्कृत्वा देयः। बृहस्पतिः। भुक्तं तु मान्यं प्रामे मत्त हानिः प्रजायते। आ
धेर्विनाशेनकस्य दातव्यमित्याह सर्वमः। यदीष्टदोषोऽन्यदृष्टेद्धीदेमादिकाभवेत्। द्यौ ऋणस्त्वाभेसंशो
ध्यो न स्यात्तदापयेद्धनी। नारदः। विनष्टमल्लनाशस्यादैवराजकृतादृते। मनुः। स्येन तौ ष येद्वेन माधिस्ते
नोन्यथा भवेत्। बृहस्पतिः। दैवराजोपघातेन यत्राधिर्नाशमाप्नुयात्। तत्राधिर्दापयेद्द्यात्सधनं ऋणी। व्या
सः। दैवराजोपघाते तु न दोषो धनिनः क्वचित्। इति। कात्यायनः। न चेद्धनिकदोषेण नष्टं तं दापयेत्तदा। आ रामः
॥५२७॥

धिमन्यं सदाप्यः स्याद्धनान्मुच्यते नर्णिकः। याज्ञवल्क्योऽपि। आधेः स्वीकरणात्सिद्धिः रक्ष्यमाणोऽप्यसारतां। यातश्चे
दन्य आधेयो धनभाग्वा धनी भवेत्। नारदः। आधिस्तु द्विविधः प्रोक्तो जंगमस्थावरस्तथा। सिद्धिरस्योभयस्या
पि भोगो यद्यस्ति नान्यथा। वसिष्ठोऽपि। तुल्यकाले निसृष्टानां लेख्यानामाभिकर्मणि। येन भुक्तं भवेत्पूर्वं तस्या
धिर्बलवत्तरः। स एव यद्येकदिवसे तौ तु नेतुकामावुपागतौ। विभज्याधिः समस्तत्र भोक्तव्य इति निश्चय
॥ कात्यायनः। आधिमेकं द्वयोर्यस्तु कुर्यान्न प्रतिपद्भवेत्। तयोः पूर्वकृतं ग्राह्यं तत्कर्ता चौरदंडभाक्। याज्ञवल्क्य
॥ आधिः प्रणश्येद्द्विगुणे धने यदि न मोच्यते। काले कालकृतो नश्येत्फलभोग्यो न नश्यति। बृहस्पतिः। हिरण्ये
द्विगुणीभूते पूर्णे काले कृतावधौ। बंधकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य तु। व्यासः। गोप्याधिर्द्विगुणीभूतः कृतका
लः कृतावधेः। अवेदयित्वा धनिकस्त्वेनोक्त्या तदनंतरं। बृहस्पतिः। हिरण्ये द्विगुणीभूते मृते नष्टे धमर्णिके। द्रव्यं
तदीयं संगृह्य विक्रीणीत समाक्षिकं। याज्ञवल्क्यः। चरित्रबंधककृतं सवृद्ध्या दापयेद्धनं। सत्यंकारकृतं द्रव्यं
द्विगुणं प्रतिदापयेत्। धनिकविश्वासेनाल्पद्रव्यार्पणमतिबहुमूल्यस्थापितस्य धनिकविश्वासेन वाल्पस्य

व्य.म.
॥६७॥

स्योपकृद्यार्थं स्थापितं स्वचरित्रबंधकं। अथवा चरित्रे गंगास्नानादिपुण्यमाधीकृतं चरित्रबंधकं। एतद्द्वय
विधमपि चरित्रबंधकं द्विगुणं कृते पि न्युनेन नश्यति। द्विगुणीकृतमपि द्रव्यमेव देयं नाधिनाश इति सत्यंकार
कृतं तदपि द्विगुणीकृते ऽन्येन नश्यतीत्यर्थः। स एव। उपस्थितस्य मोक्तव्य आधिः स्तेनोन्यथा भवेत्। प्रयोज
के सति निंकुलेऽन्यस्याधिमाप्नुयात्। तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः। उत्तमर्णे ऽसंनिहिते तस्य कुलेन्य
स्य हस्ते सवृद्धिके धनं दत्वाधिर्ग्राह्यः। आधिविक्रयेण तु धनदित्सायां तत्कालं मूल्यं कृत्वा वृद्धिरहितः स्थाप्य इ
त्यर्थः। बृहस्पतिः। क्षेत्राधिकं यदा भुक्तं मूल्यं तत्रमधिकं ततः। मूल्योदयं प्रतिविष्टं चेत्तदाधिं प्राप्नुयाद्दणी। याज्ञ
वल्क्यः। यदा तु द्विगुणीभूतमृणमाधौ तदा खलु। मोच्यश्चाधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने। अथ प्रतिभूः। तत्रै
विध्यमाह याज्ञवल्क्यः। दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते। प्रत्ययः समीचीनोयमित्येवं विश्वासो रामः
त्पादनं बृहस्पतिस्तु चातुर्विध्यमाह। आदेकोदर्शयामीति साधुरित्यपरो ब्रवीत्। दाताहमेतद्द्रविणम
र्पयामीति चापरः। अर्पयामि दापयिष्यामीत्यर्थः। कात्यायनः। नष्टस्यान्वेषणार्थं तु देयं पक्षत्रयं परं। यद्यसौ ॥५२८॥

दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत्। पक्षत्रयमित्युपलक्षणं वा कालोपि द्विनित्त्वावंतं दद्यादित्यर्थः। कात्यायनः
दर्शनप्रतिभूर्यत्र देशे कालेन दर्शयेत्। निबंधमावहेत्तत्र दैवराजकृताद्दते। निबंधमावहेद्धनिकाय वृद्धं दद्या
त्। बृहस्पतिः। आधौ तु विनष्टे दायोतत्कालावेदितं धनं। उत्तरे तु विसंवादे तौ विनाजन्म नौ तथा। कात्यायनः
प्रातिभाव्यागते पौत्रैर्दातव्यं न तु तत्क्वचित्। पुत्रेणापि समं देयमृणं सर्वत्र पैतृकम्। व्यासोपि। ऋणं पैतामहं
पौत्रः प्रातिभाव्यागतं सुतः। समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः। पैतामहमृणं पौत्रो मूलमात्रं दद्यात्
ति न व्याजांशकारे तु पुत्रपौत्राभ्यामपि समं वृद्धिकं देयं। तथा च कात्यायनः। गृहीत्वा बंधकं यत्र दर्शनस्य स्थितो
भवेत्। विना पित्रा धनात्तस्माद्दाप्यः स्यात्तदृणं सुतः। याज्ञवल्क्यः। बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनं। एक
च्छायाश्रितेषु धनिकस्य यथारुचि। अहमेवं सर्वदास्यामीति प्रत्येकप्रतिज्ञा एकच्छायानाश्रितेषा पत्रेषु
धनिके क्षयायः कश्चिद्द्यात्। अंशैर्दास्याम इति प्रतिज्ञायां तु न यादेयमित्यर्थः। कात्यायनः। एकच्छायाप्रवि
ष्टानां दाप्यो यस्तत्र दृश्यते। प्रोषिते तत्सुतः सर्वं पित्रंशं तु मृते सुतः। पित्र्यं वा न पित्र्यं शातुसारेण। याज्ञवल्क्यो

व्य.म.
॥६८॥

पि॥ प्रतिभूर्दापितो यस्तु प्रकाशं धनिनां धनं॥ द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत्॥ बृहस्पतिः॥ प्रातिभाव्यं
चयोर्दद्यात्पीडितः प्रतिभावितः॥ त्रिपक्षात्परतः सोपि द्विगुणं लब्धुमर्हति॥ अथोत्तमर्णस्यर्णग्रहणप्रकारः॥ बृहस्प
तिः॥ प्रतिपन्नमृणं दाप्यः सामादिभिरुपक्रमैः॥ धर्मोपाधिबलात्कारैर्गृहसंरोधनेन च॥ प्रतिपन्नमधर्मेणांगी
कृतं॥ उपक्रमैरुपायैः॥ नान्विषणेति स एव॥ सुहृत्संबंधुसंदिष्टैः सामोक्त्यानुगमेन च॥ प्रायेण वा ऋणी दाप्यो
धर्म एष उदाहृतः॥ छद्मना याचितं चार्थमानीय ऋणिकाद्धनी॥ अन्वाहितादि संगृह्य दाप्यते यत्र सोपधिः॥
बध्वा स्वगृहमानीय ताडनाद्यैरुपक्रमैः॥ ऋणिको दाप्यते यत्र बलात्कारः स उच्यते॥ पुत्रदारं पशून्बध्वा कृत्वा द्वा
रोपवेशनं॥ यत्रर्णिको दाप्यते र्थं तदाचरितमुच्यते॥ अनुगमोनुसरणं॥ प्रायः प्रार्थना॥ अन्वाहितमन्यस्मै दा
तुं दत्तमलंकारादि॥ धर्माद्युपायानां नियममाह कात्यायनः॥ राजा तु स्वामिने विप्रं सांत्वेनैव प्रदापयेत्॥ रि
क्थिनं सुहृदं वापि छलेनैव प्रदापयेत्॥ वणिजः कर्षकांश्चैव शिल्पिनश्चाब्रवीद्गुरुः॥ देशाचारेण दातव्यास्तु
दुष्टान्संपीड्य दापयेत्॥ स एव॥ धार्योवरुद्ध ऋणिकः प्रकाशं जनसंसदि॥ यावद्दद्याद्देयं देशाचारस्थि

रामः
॥५२९॥

तिर्यथा॥ अवरुद्धस्य विगमनशंकायामवरोधनं निषेधेति स एव॥ विगमनशंका यत्र स्याद्वार्यमाणः स देहिनः
दृष्टस्तस्यानुगंतव्यो निबंधं वा समुत्सृजेत्॥ निबंधः स्वप्रतिनिधिर्न्यस्तं पुत्रादिकं॥ अवरुद्धो दर्शनप्रतिभुवं
गृहीत्वा देनाक्तव्य इत्याह स एव॥ सद्धनप्रतिभूश्चैव मोक्तव्यः स्याद्दिने दिने॥ आहारकाले रात्रौ च निबंधे
प्रतिभूस्थितः॥ यो दर्शनप्रतिभुवं नाधिगच्छेन्न वाश्रयेत्॥ स चारके निरोधव्यः स्थाप्यो वा वेघरक्षिणा॥ न चारके
निरोद्धव्योर्थपत्नतः॥ श्रुचिलो निबंधः॥ नोक्तयो निबंधः स्थापयेन वा॥ न वश्रयेन्न दद्यात्॥ चारके कारागारे रक्षि
णो रक्षकानावेश्म स्थाप्यः॥ अप्यपि को विश्वस्य॥ बृहस्पतिः॥ पूर्णे वधे शांतलाभः समृणमुद्धरयेद्धनी॥ कारयेद्वा ध
र्मलिखितं चक्रवृद्धिव्यवस्थया॥ पूर्णे वधौ द्वैगुण्यपादिके जाते अत एव शांतलाभे वोपपद्यते धनी ऋणी तु ऋ
ह्ययेत्तद्गृह्णीयात्॥ वृद्धिमपि भ्रलेख्य देयतस्यापि वृद्धिकरणं चक्रवृद्धिः॥ नारदः॥ अथ शक्तिविहीनः स्यादृणी
कालविपर्ययात्॥ शक्त्यपेक्षं ऋणी दाप्यः काले काले यथोदयं॥ मनुः॥ कर्मणापि समं कुर्याद्धनिकस्याधमर्णि
कः॥ समोपकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः॥ याज्ञवल्क्यः॥ हीनजातिं परिक्षीणमृणार्थं कर्म कारये

व्य·म·
॥६०॥

त॥ ब्रह्मणस्तु परिक्षिणश्शनैर्दाप्यो यथोदयमिति॥ तत्र ब्राह्मणपदमुत्कृष्टजातिपरं॥ स एव॥ उपपन्नं साधयन्न
र्थेन वाच्यो नृपतेर्भवेत्॥ साध्यमानो नृपं गच्छन् दंड्यो दाप्यश्च तद्धनं॥ बृहस्पतिः॥ प्रतिपन्नस्य धर्मोयं व्यपलापी तु
संसदि॥ लेख्येन साक्षिभिर्वापि भावयित्वा प्रदाप्यते॥ नरो धव्यः क्रियावादी संदिग्धेर्थे कपंचनः॥ आसेधयस्तु
नासध्यं दध्यो भवति धर्मतः॥ आसेधो राजाम यावरोधः॥ स एव॥ प्रदातव्यं यङ्गतिन्यायऽतत्त दद्वाम्यहं॥ एवं पत्र
र्णिको ब्रूते क्रियावादी स उच्यते॥ कात्यायनः॥ पीडयेत्तु धनी यत्र ऋणिकं न्यायवादिनं॥ तस्मादर्थात्स हीयेत तत्स
मं वाप्नुयाद् दमं॥ बृहस्पतिः॥ आनाय्य ज्ञातुरज्ञेय संदिग्धेर्थे प्रवर्तते॥ असद्य समविनेयः स्यात्स तथाप्यर्थेन सिध्यति
यमः॥ ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति॥ राज्ञा दापयितव्यः स्याद्गृहीत्वा द्विगुणं ततः॥ याज्ञवल्क्यः॥ राज्ञाध
मर्णिको दाप्यः साधिताद्दशकं शतं॥ पंचकं च शतं दाप्यः प्राप्तार्थे ह्युत्तमर्णिकः॥ दशकं दशोत्तरं दशांशा श्वेतस्यर्थ
॥ तन्नैतावंशौ राज्ञोऽन्यद्युतमर्णिके इति भावः॥ दशकमयं ग्रहणं निर्धनिकपरं सधने तु विशेषमाह नारदः॥ ऋणिकः स
धनो यस्तु दौरात्म्यान्न प्रयच्छति॥ राज्ञा दापयितव्यः स्याद्गृहीत्वांतु कमादायो धनिना मधमर्णिकः॥ दत्वा तु ब्रा

रामः
॥५३०॥

ह्मणायैव नृपतस्तदनंतरं विवादरत्नाकरे कात्यायनः॥ नांतरा लेख समवायेत्तु यद्यत्स्वर्वतं भवेत्॥ तत्र देवाग्रतो दे
यराज्ञः श्रोत्रियतेनुच॥ एकादेलिखितं पत्रं तत्कुर्याद्दृणं समं॥ ग्रहणं लोन मन्यथाउपयाउपयाकर्म॥ पु
स्पजवेण यस्तु एपं साधितं यो विभावयेत्॥ तत्र स्थाणिको नैव दातव्यं तस्य नान्यथा॥ याज्ञवल्क्यः॥ लेख्यं सदृष्टे ले
ख्ये दत्वा दत्त्वर्णिनो धनं धनी वोपगतं दद्यात्स्वहस्तेपरिचिह्नितं॥ लेख्यं दद्यात् विशुद्धर्णोतदभावे प्रतिश्रवाधध
निकर्णिकयोरेवं विशुद्धिः स्यात्परस्परं॥ प्रतिदं श्रवः प्रतिदानं श्रवणं यद्युद्धि पत्रं॥ ऋणदाने धर्मेणोस्मा निष्टं
फलमाह कात्यायनः॥ उद्धारादिकमादाय स्वामिने न ददाति च॥ स तस्य दासो भृत्यः स्त्री पशुर्वा जायते ध्रुवं॥ क्र
धारोहणं॥ स्वादिनायाचित निक्षेपयोर्ग्रहणं॥ दासो गर्भदासः भृत्यो मल्लो पानः॥ नारदः॥ याच्यमानं न दद्याच्चेद्
णं वापि प्रतियद्दं॥ तत्तद्द्रव्यं वर्द्धते तावद्यावत्कोटि गुणं भवेत्॥ ततः कोटिगतो तेषु पूर्णे विष्टितस्तेन कर्मणा॥ अस्यः स्व
रो वृषो दासो भवेज्जन्मनि जन्मनि॥ याच्यमानं न दत्तं प्रतिभूक्ते व्यासो पि॥ तपस्वी चाग्निहोत्री च ऋणवान् म्रियते यदि त
यश्चे वाग्निहोत्रं च सर्वं च धनिनो भवेत्॥ बृहस्पतिः॥ ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयं विभावितं॥ तामदसमं देयं

तत्सुतस्य च॥ याज्ञवल्क्यः॥ पितरि प्रोषिते प्रेते व्यसनाभिप्लुते पि वा। पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितं॥ वि
शंति वर्षवयमा पुत्रादिभिर्ऋणं देयमित्याह नारदः। अर्वाक् संवत्सराद्विंशात्पितरि प्रोषिते सुतः। ऋणं दद्या-
त्पितृव्ये च ज्येष्ठे भ्रातरि यथा पिता॥ कात्यायनः॥ विद्यमाने पि रोगार्ते स्वदेशात्प्रोषिते पि वा॥ विंशात्संवत्सराद्देय-
मृणं पितृकृतं तथा॥ प्रोषितपदं मृतस्याप्युपलक्षकं॥ अतएव विष्णुः॥ धनग्राहिणि प्रेते प्रव्रजिते द्विदशाः स-
माः प्रोषिते वा तत्पुत्रपौत्रैर्न देयं॥ नारदः॥ पितर्युपरते पुत्रा ऋणं दद्युर्यथांशतः। विभक्ता अविभक्ता वा यो वा
तामुद्वहेत्॥ कात्यायनः॥ पित्र्ये सति विद्यमाने तु न च पुत्रो धनं हरेत्। देयं तद्धनिके देयं कृते पुत्रस्तु दाप्यते। द्रव्यमृत
इति संबंधः। द्रव्यं विनेत्यर्थः॥ बृहस्पतिः॥ पित्र्यमेवाग्रतो देयं पश्चादात्मीयमेव च। तयोः पैतामहं पूर्वं देयमेव
ऋणं सदा॥ याज्ञवल्क्यः॥ सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं। वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं॥ बृह-
स्पतिः॥ सौराक्षिकं वृथादानं कामक्रोधप्रतिश्रुतं॥ प्रतिभाव्यं दंडशुल्कं शेषं पुत्रं तु दापयेत्। उशना॥ दंड
वा दंडशेषं च शुल्कं तच्छेषमेव च। न दातव्यं तु पुत्रेणैतच्च न ब्यावहारिकं। ऋणदानाधिकारिणः क्रममाह या-

ज्ञवल्क्यः। रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च। पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥ जेरवा
दिदोषयुक्ते पुत्रे विद्यमाने पि योन्यपि नदोषो भाव्येप्यन्यायेन वा तत्पितृरिक्थं हरते स रिक्थग्राहः। एव
मेव परत्वाज्ज्ञ तयोषिद्ग्राहः॥ अनन्याश्रितद्रव्यत्वं च तत्र यथा पित्र्यन्याश्रितत्वरूपविशिष्टप्रतियोगिका-
भावा द्रव्यरूपविशेषणमात्रप्रतियोगिकाभावः। अत्रादौ रिक्थग्राहः तदभावे योषिद्ग्राहस्तदभावे नन्या-
श्रितद्रव्यः पुत्रः तदभावे पौत्रमात्रं तदभावे प्रपौत्र पत्नीकन्यादयो रिक्थिनो द्रव्यग्राहिणः स्वे दद्यु-
रित्यर्थः॥ रिक्थग्रहणाभावे प्रपौत्रेण पत्न्यादिभिश्च न। पुत्रहीनस्येति मृतस्य रिक्थिनो द्रव्यग्रहणाधि-
कारिणः पत्नीकन्यादयः पत्न्यादीनामधमर्णाद्दरोग्रस्त्री क्षुरित्यन्यो तिमपादार्थ्यः॥ विष्णुः॥ अपुत्रस्य वाथ
पुत्रस्य ऋक्थग्राही ऋणं दद्यादित्यर्थः। बृहस्पतिः॥ स्त्रीहारी च तथैव स्यात्तदभावे धनहारिणः॥ कात्यायन
॥ ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवं॥ द्रविणार्हश्चतुर्थश्च नान्यथा दापयेत्सुतं॥ पूर्वं दद्याद्धनग्राह
॥ पुत्रस्तस्मादनंतरः। योषिद्ग्राहः सुताभावे पुत्रे वात्यंतनिर्धने॥ नारदः॥ या तु सप्रधनैव स्त्री सापत्या चान्य

व्य॰म॰

॥७२॥ नाश्रयेत्॥ सोस्याद्दद्याद्दणं भर्तुरुत्सृजेद्वा तथैव तां। कात्यायनः॥ निर्द्धनेरनपत्येस्त्यक्तं यत्कृतं शौंडिकादि
भिः। तत्स्त्रीणामपि भोक्ता तु दद्यात्तद्दणमेव हि। नारदः॥ धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्॥ पुत्रो:
सतोः स्त्रीधनिनोः स्त्रीहारी धनपुत्रयोरिति सधनपुत्राभावे स्त्रीहारा ऋणं दद्यादित्यनुपादार्थः॥ कात्याय
नः॥ प्रोषितस्यामतेनापि कुटुंबार्थमृणं कृतं। दासस्त्रीमातृशिष्यैर्वा दद्यात्पुत्रेण वा गृहः॥ याज्ञवल्क्यः
न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं तथा॥ कात्यायनः॥ येये प्रति
श्रुतं यद्याद्यस्यादनुमोदितं॥ नारदः॥ कृतं वा यदृणं कृच्छ्रे दद्यात्तु न्यस्तत्स्थिता॥ याज्ञवल्क्यः॥ गोपशौंडि
कशैलूषरजकव्याधयोषितां ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया॥ स एव॥ प्रतिपन्नं स्त्रिया देयं
पत्या वा सह यत्कृतं स्वयंकृतं वा यदृणं नान्यस्त्री दातुमर्हति॥ अप्रतिपन्नमपि रिक्थग्राहिणी स्त्री दद्या
त्॥ तथा च कात्यायनः॥ भर्तुकामेनया भर्त्रा उक्तो देयमृणं त्वया॥ अप्रपन्नापि सा दाप्या धनं यद्याश्रितं
स्त्रिया॥ नारदः॥ पुत्रिणी तु समुत्सृज्य पुत्रं स्त्री यान्यमाश्रयेत् तस्या ऋणं हरेत्सर्वं निःस्वायाः पुत्र एव तु इदं राम:

॥५३२॥

तु रिक्थग्राहपुत्रपरं॥ नारदः॥ पितृव्येण विभक्तेन भ्रात्रा वाप्यदृणं कृतं॥ मात्रा वा यत्कुटुंबार्थे दद्युस्तत्सर्वरि
क्थिनः इदमपुत्रपरं नारदः॥ पितृव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतं॥ उत्तमर्णतत्पुत्राद्यभावे ऋणदाने प्रकारमा
ह नारदः॥ ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः॥ निर्वपेत्तत्सकुल्येषु तदभावेस्य बंधुषु॥ यदा तु न सकुल्याः
स्युर्न च संबंधिबांधवाः॥ तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत्॥ प्रजापतिरपि॥ बंधुरभावे विप्रेभ्यो देयं ते
ष्वपि जलेऽपि वा। जले क्षिप्तं तयोर्मेना च धनं स्यात्पारलौकिकं॥ यदा तु जलादौ क्षिप्ते धन्या पतितदासः प्राप्नोत्येव
इति श्रीमद्भट्टशंकरात्मजभट्टनीलकंठेन कृते भगवंतभास्करे व्यवहारमयूखे ऋणादानप्रकरणं॥ अथ निक्षेपः॥
नारदः॥ स्वद्रव्यं यत्र विस्रंभान्निक्षिपत्यविशंकितः॥ निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः॥ असंख्यातमवि
ज्ञातं समुद्रं यन्निधीयते॥ तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः॥ बृहस्पतिः॥ ददतो यद्भवेत्पुण्यं हेमरूप्यांबरादि
कं। तत्स्यात्पालयतो न्यासं तथैव शरणागते॥ स्थापितं येन विधिना येन यच्च यथाविधि॥ तथैव तत्प्रदातव्यं न देयं
त्वनंतरे॥ न्यासो निक्षेपः॥ मनुः॥ यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते॥ तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दं

ममिति॥ नैदेनोपेक्षया नाशेन दोष॥ याज्ञवल्क्यः॥ आजीवन्स्वेच्छया दण्ड्यो दाप्यस्तं चापि सोदयं॥ आजीवनत्ना
गवृद्ध्यर्थप्रयोगादिनोपजीवनः॥ तस्य विशेषमाह॥ कात्यायनः॥ निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च॥ पा
ञ्चमानं तवेदस्याद्दत्तेयं चकं ज्ञातं॥ मितिमनुः॥ निक्षेपस्यापहर्तारं तत्समं दापयेद्दमं॥ तथैव निधिहर्तारं वि
शेषेणैव पार्थिव॥ बृहस्पतिः॥ देवराजोपघातेन यदि तन्नाशमाप्नुयात्॥ नष्टात्तद्व्यसदिति न तत्र दोषो न विद्यते॥
याज्ञवल्क्यः॥ न दोषो यो पहृतं तत्तु राजदैविकतस्करैः॥ स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनंतरं न सरा ज्ञानियोक्ता॥
वोनानिर्दिष्टमुश्वश्च धुनि॥ प्रत्यनंतरसंनिहितः॥ प्रमाणं विनाधिकाप्य विषये नानियोज्यतइत्यर्थः॥ सर्वमेप्येतु॥
निक्षेपन्यायमन्यत्राप्यतिदिशति बृहस्पतिः॥ अन्वाहिते याचितके शिल्पिन्यासे सर्वबंधके। एष एवोदितो ध
र्मस्तथा च शरणागते॥ अन्वाहितममुकेनममपित्स्थापितं त्वया तस्मै देयमिति पुरुषोत हस्ते र्पितं याचित
मुद्वाहादौ शोभार्थं नीतमलंकारादि शिल्पिन्यासो हेमकारादिपु कुंडलाद्यर्थं निक्षिप्तं नारदोपि॥ एष एव
विधिर्दृष्टो याचितान्वाहितादिषु॥ शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च॥ प्रतिन्यासः स्वामिनायत्र नि

क्षिप्तं तेनाप्यन्यत्र निक्षिप्तं राजदेवादिनष्टस्या विशिल्पिन्यस्तस्य क्वचित्प्रतिन्यासः स्वामिना यत्र निक्षिप्तं तेना
प्यन्यत्र निसोदिवसैः परिनिष्ठितैः॥ तदूर्ध्वं स्थापयेच्छिल्पी दाप्यो दैवाकृतेपितं॥ याज्ञवल्क्यः॥ वसाननः स्त्रीत्वगा
दं ग्रोरजकस्तु परांशुकं॥ विक्रयावनयाचितेषु पणान्दर्श स्वक्रयो नाटकं॥ गृहीत्वान्यत्रार्पणं अधामा
धीकरणं सुवर्णेन्निन्धतावरो ध्मायमो क्षोसनियमोमाह॥ सएव॥ अग्नौ सुवर्णमक्षीणं रजते द्विपलं शतं॥ अ
ष्टौ त्रपुणि सीसे च ताम्रे पंचदशायसि॥ इतोधिके रूप्यादेः द्वयेहेमकरादेर्दंडः॥ कचिद्वस्त्रायर्पतंतुसंसर्पणेव
द्धौ निरोषमाह सएव॥ शते दशपला वृद्धिरौर्णे कार्पाससौत्रिके॥ मध्ये पंचपला वृद्धिः सूक्ष्मेतु त्रिपला मता॥ क
चित्क्षयमाह स एव॥ कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः न क्षयो न च वृद्धिश्च कौशेये वल्क
लेषु चेति॥ कार्मिके सिद्धपदादौ पदस्तत्रादिना स्वस्तिकाद्याकारनिर्माणे॥ निपतावधिके शिल्पिन्यस्ते न्वधिमध्ये
याचितिः दत्ते न ददेपि च शिल्पिनो धाभावमावमाह सएव॥ यदि तत्कार्यमहिप्रपकाले परिनियम्य वा याचितोना
कृते तस्मिन्स्वप्राप्ते न तु दाप्यते॥ एतद्विपर्ययमाह सएव॥ प्राप्तकाले कृते कार्ये न दद्याद्याचितोपि सन्॥ तस्मिन्न

छेदृते वापि निहीतां मूल्यमावहेत्॥ स एव। यो याचितकमादाय न दद्यात्प्रतियाचिता स निगृह्य बलाद्दाप्यो दंड्यश्च
न ददाति यः॥ ॥इति व्यवहारमयूखे निक्षेपप्रकरणं॥ अथास्वामिविक्रयः। व्यासः। याचितान्वाहितन्यासं दत्वा
चान्यस्य यद्धनं। विक्रीयते स्वाम्यभावे स ज्ञेयोऽस्वामिविक्रयः॥ कात्यायनः। अस्वामिविक्रयं दानमाधिं च विनिव
र्तयेत्॥ अस्वामीति पृथक्पदं क्रियाविशेषणं च। नारदोपि। प्रकाशतः॥ क्रयशुद्धिः क्रेतुस्तेयं रहः क्रमात्
नारदः॥ अस्वाम्यनुमताद्दासादसतश्च जनाद्रहः। हीनमूल्यमवेलायां क्रीणंस्तद्दोषभाग्भवेत्॥ तद्दोषश्चौर
दोषः। याज्ञवल्क्यः। आगमेनोपभोगेन नष्टं भाव्यमतोन्यथा। पंचबंधो दमस्तस्य राज्ञे तेनाविभाविते। पंच
बंधो नष्टद्रव्यपंचमांशः। नाष्टिकोपन्यस्तसाक्षिणां विरुद्धोक्तौ नष्टद्रव्याद्द्विगुणं दंडमाह व्यासः। वादी चे
न्मार्गितं द्रव्यं साक्षिभिर्न विभावयेत्। दाप्यस्याद्द्विगुणं दंडं क्रेता तद्द्रव्यमर्हतीति। क्रेतुः कृत्यमाह स एव
मूले समाहृते क्रेता नाभियोज्यः कथंचन। मूलेन सह वादस्तु नाष्टिकस्य विधीयते॥ बृहस्पतिः। विक्रे
तादर्शितो यत्र हीयते व्यवहारतः। क्रेता राज्ञे मूल्यदंडौ प्रदद्यात्स्वामिनो धनं। कात्यायनः। मूलानयनकालस्तु

त्र देयो धसंख्यया। असमाहार्यमूलस्तु क्रयमेव विशोधयेत्। विशोधिते क्रये राज्ञा वक्तव्यः स न किंचन। अभियोक्ता
धनं कुर्यात्स्वयमं ज्ञातिभिः स्वकं। पश्चादात्मविशुद्ध्यर्थं क्रयं क्रेता त्वबंधुभिः। क्रेत्रा क्रये साधितेपि द्रव्यं नाष्टिक
एव लभते। तथा च मनुः। अथ मूलमनाहार्यं प्रकाशक्रयशोधितं। अदंड्यो मुच्यते राज्ञा नाष्टिको लभते धनं
अनाहार्यापदरूपं प्रकाशशोधितं द्रव्यमित्यर्थः। कात्यायनः। अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन्। यथा
भियोगं धनिने धनं दाप्यो दमं च सः॥ बृहस्पतिः। वणिग्वीथिपरिगतं विज्ञातं राजपुरुषैः। अविज्ञाताश्रयात्क्री
तं विक्रेता यत्र वा मृतः। स्वामी दत्वार्धमूल्यं तु प्रगृह्णीत स्वकं धनं। अर्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः
मरीचिः। अविज्ञातनिवेशात्वा यत्र मूलं न लभ्यते। हानिस्तत्र समा कल्प्या क्रेतृनाष्टिकयोर्द्वयोः। निवेशो विक्रेतृ
स्थलं। नारदः। उद्दिष्टमेव नोक्तव्यं स्वापस्तु वसुधापि वा। अर्पितं तु योनुक्तेनुक्तभागं प्रदापयेत्। उद्दिष्टमनुज्ञाते
नुक्ता भोगानुरूपं भाटकं॥ याज्ञवल्क्यः। शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं। अर्वाक्संवत्सरात्स्वामी
हरते परतो नृपः। यत्तु मनुः। प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत्। अर्वाक्त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरे

व्य.म.
७४

दिति। तच्चोत्रियस्वामिकद्रव्यविषयं स एव। आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः। दशमं द्वादशं वापि सतां
धर्ममनुस्मरन्निति। तत्र प्रथमे वर्षे सर्वं दद्यात्। द्वितीयवर्षे द्वादशं भागं गृहीत्वा दद्यात्। ततीये दशमं चतुर्थे
षष्ठमिति। हरते परतो न्यः इत्येतत्स्वामिन्यनागते त्र्यब्दादूर्ध्वमपाकरणमनुज्ञामात्रपरं। आगते तु स्वामि
नि व्ययीकृतमपि देयमिति मिताक्षरायां। इदं च स्वामिनो ज्ञाने। यदा त्वमुक इदं द्रव्यं विस्मृत्य गतवधारणं
तदा त्रिवर्षादूर्ध्वमपि लभते। राज्ञोपि न ग्रहणादधिकारः। आगंतुकं चिह्न क्षायादेव। परस्वामिकनष्टलब्धपशू-
नामेकदिनरक्षणे भृतिमाह याज्ञवल्क्यः। पणमेकशफे दद्याच्चतुरः पंचमानुषे। महिषोष्ट्रगवां द्वौ द्वौ पादं पा
दमजादिके। लब्धं तु देयमेवाभि वा निधिप्राप्तौ याज्ञवल्क्यः राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योर्द्धं द्विजः पुनः। वि
द्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः। इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत्। अनिवेदितविज्ञातो दाप्यस्तं दंड
मेव चेति। यदा तु कश्चिच्चिह्नमानादिस्वस्वकीयनिधिं भावयति तदाधिगंत्रे द्वादशभागं दत्वात्ययं षष्ठं गृहीत्वा राम:
तस्मै दद्यात्। ममायमिति यो ब्रूयान्निधिं सत्येन मानवः। तस्याददीत षड्भागं राजा द्वादशमेव वा। द्वादशांस्त्वधिगं ॥५३५॥

वे। चौरहृतं प्रत्याहृत्य स एव दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्धनं हृतं राजा तदुपयुंजानश्चौरस्याप्नोति किल्बि
षं। यदा त्वाहरणे शक्तस्तदाह कृष्णद्वैपायनः। प्रत्याहर्तुमशक्तस्तु धनं चौरैर्हृतं यदि स्वकोशात्तद्धि देयं स्या
दशक्तेन महीक्षितेति। इत्यस्वामिविक्रयनिरूपणं। अथ संभूयसमुत्थानं। नारदः। वणिक्प्रभृतयो यत्र कर्म
संभूय कुर्वते तत्संभूयसमुत्थानं व्यवहारपदं स्मृतं। बृहस्पतिः। बहूनां संमतो यस्तु दद्यादेको धनं नरः। क
रणं कारयेद्वापि सर्वैरेव कृतं भवेत्। परीक्षकाः साक्षिणस्तु त एवोक्ताः परस्परं। संदिग्धे वंचनायां चेद्वि
द्वेषसंयुताः। यः कश्चित्कारकस्तेषां विज्ञातः क्रयविक्रये। शपथैः सोपि संशोध्यः स्यादेवं वादे स्वयं विधिः। या
ज्ञवल्क्यः जिह्मं त्यजेयुर्निर्लाभमशक्तोन्येन कारयेत्। प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितं। स तद्दद्या
द्विप्लवाद्रक्षितादृशमांशमवाप्नुयात्। कात्यायनः। शिल्पकाभिज्ञकुशलाश्चाचार्याश्चेति शिल्पिनः। एक द्वि त्रि च
तुर्भागान् हरेयुस्ते यथोत्तरं। शिल्पिकाः शिष्याः अभिज्ञा ज्ञानवंतः कुशलाः दक्षाः आचार्या नृत्तनमार्ग
प्रवर्तकाः। बृहस्पतिः। हर्म्यं देवगृहं वापि धार्मिकोपस्कराणि च। संभूय कुर्वतां तेषां प्रमुखो द्व्यंशमर्हति स ए

व्य॰
७५ का नामेव धर्मः सद्भिरुदाहृतः॥ तान्नज्ञो जनते ध्वर्द्धं गोपनान्तु समांशिनः॥ कात्यायनः॥ तिषां चेत्प्रसृतानां
ग्रामवानुयात्॥ तन्मोक्षणार्थं यद्दत्तं वहेतुस्तेयथां शतः॥ वणिजां कर्षकाणां च वैराणां शिल्पिनां तथा
र्म्यां ग्राकहेणां स वैषामेव निर्णयः॥ इति मन्मूलमुक्तं। अथ दत्ताप्रदानं। नारदः॥ दत्त्वा द्रव्यमसम्यग्
हर्तुमिच्छति। दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्॥ असम्यगिति क्रियाविशेषणं निषिद्धमित्यर्थ
॥ अथ देयमदेयं देवेनं चादत्तमेव च॥ व्यवहारस विज्ञेयो दानमार्गश्चतुर्विधः॥ अन्वाहितं याचित
ः साधारणं च यत्॥ निक्षेपं पुत्रदारं च सर्वस्वं चान्वये सति॥ अदेयान्याहुराचार्या यच्चान्यस्मै प्रति॥
त्रपुत्रदर्शं तेषु स्वत्वाभावात् द्विषयेनांतरज्ञेनदिनातिव निषिध्यतुवादमात्रं॥ एतेन स्विकुटुंबा
न देयं दारसुता हतेइति याज्ञवल्कीय। पर्युदासोपिव्याख्यातः॥ पुत्रदारेषु स्वत्वाभावः॥ दृ वसु प
ः सत्ववादेः॥ एतद्दानेनके वलंव्यवहारासिद्धिः किंतु प्रायश्चित्तमपीत्याहे तानिचत्त्रदत्तः॥ योदत् रामः
ड्डात्मा प्रायश्चित्तीयते नरः॥ मनुः॥ अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति॥ तावुभौ चौरवच्छास्यौ दाप्यौ ॥५३६॥

चोत्तमसाहसमिति॥ देयमाह बृहस्पतिः॥ कुटुंबं भक्तवसनाद्देयं यदतिरिच्यते॥ अवरूपदेशमाहकात्या
यनः॥ स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहं॥ न दद्याद्दणवद्दाप्यः प्राप्नुयात्पूर्वसाहसं॥ गौतमः॥ प्रतिश्रु
त्याप्यधर्मसंयुक्ताय न दद्यादिति॥ दत्तं दानविक्रयौ प्रतिषेधति व्यासः॥ ये जाता येप्यजाताश्च ये च गर्भे व्यवस्थित
ाः वृत्तिं च ते निकांक्षंति न दानेन च विक्रयः इति॥ दत्तादत्तभेदानाह दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकं॥ प
ण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः॥ स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः॥ अनुग्रहे धर्मः॥ अदत्तं
तु भयक्रोधशोकवेगरुगन्वितैः॥ तथोत्कोचपरिहासः व्यत्यासच्छलयोगतः॥ बालमूढास्वतंत्रार्तमत्तोन्म
त्तापवर्जितं॥ कर्ताममायं कर्मेति लाभेच्छया च यत्॥ अपात्रे पात्रमित्युक्ते कार्ये वा धर्मसंज्ञिते॥ यद्दत्तं स्यादवि
ज्ञानाददत्तमिति तत्स्मृतं॥ रुगपत्तापः॥ भयादियुक्ते तापान्वितै रित्यर्थेन्वयः॥ ताडनादिभयाद्धुपतसेन दत्त
मित्यर्थः॥ एवं क्रोधादिके ध्यध्यायोजयितव्यमिति विध्याहृतं॥ व्यत्यासो रूप्यं दातुं प्रवृत्तेन ताम्रादिसुवर्णादत्तं॥ छलयोग
तः देवदत्ताय ज्ञायमानो यो येति ज्ञात्वा गृहीतदेवदत्तवेषायान्यस्मै प्रदत्तं यापि दत्तं॥ आर्तो रोगेणास्थिरचित्तः॥ म

व्य॰म॰

॥७६॥ तोमहतो यश्चैव उन्मत्तो वा दितादिना। अपवर्जितं तं मामकम। बीजमपत्यं तु वणावदवेत्यर्थः। नारदः। स्वदा
समिच्छेद्यः कर्तुमदासं प्रीतमानसः। स्कंधादादाय तस्यापि भिंद्यात्कुंभं सहांभसा। अक्षताभिः सपुष्पाभिर्मू
र्धन्यद्भिरवाकिरन्। अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत्। ततः प्रभृति के वक्तव्यः स्वाम्यनु
ग्रहपालितः। भोज्यान्नोऽप्रतिग्राह्यो भवत्यभिमतः सतां। कात्यायनः। दासेनोढा त्वदासी या सापि दास
त्वमाप्नुयात्। यस्माद्भर्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्हुत। दासस्य तु धनं यत्स्यात्स्वामी तस्य प्रभुर्मतः।
इति। इत्यभ्युपेत्याशुश्रूषा। अथ वेतनादानं। नारदः। भृतानां वेतनस्योक्तो दानादानविधिक्रमः। वेतनस्या
नपाकर्म तद्विवादपदं स्मृतं। याज्ञवल्क्यः। दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः। अनिश्चित्य भृतिं य
स्तु कारयेत्स महीक्षिता। एतदप्यायासपरं आयासकृत्वे बृहस्पतिः। त्रिभागं पंचभागं वा गृह्णीयात्सीर रामः
वाहकः। भक्ताच्छादभृतः सीराद्भागं गृह्णीत पंचमं। जातं सस्यात्त्रिभागं तु प्रगृह्णीयादथाभृतोऽन्नवस्त्र
दानेन योषितः। नारदः। कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्वा भृतिं बलात्। भृतिं गृहीत्वाकुर्वाणो द्विगुणां भृति ॥५३७॥

माप्नुयात्। मनुः। भृतो नार्तो न यः कुर्याद्दर्पात्कर्म यथोदितं। स दंड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनं। स एव
यथोक्तमार्तः स्वस्थो वा यस्तत्कर्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्मणः। आर्तस्तु कुर्यात्स्वस्थ
ः सन्यथाभाषितमादितः। स दीर्घस्यापि कालस्य तल्लभेतैव वेतनं। विष्णुः। भृतकश्चापूर्णे काले त्य
जन्भृत्यः सकलमेव मूल्यं जह्यात्। दंडं च पणशतं दद्यादिति। स एव। स्वामी चेद्भृतकमपूर्णे काले जह्यात्त
स्य सर्वमेव मूल्यं दद्यात्। अन्यत्र भृतकदोषात्। वृद्धमनुः। प्रमादान्नाशितं दाप्यः समं द्विर्दोहनाशितं। न तु
दाप्यो हृतं चौरैर्दग्धमूढं जलेन वा। द्रोहो द्वेषः उभयहृतं। याज्ञवल्क्यः। प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्वि
गुणां भृतिं। प्रक्रांते सप्तमं भागं चतुर्थं पथि संत्यजन्। वृद्धमनुः। पथि विक्रीय तद्भांडं वणिग्भृत्यं त्यजेद्यदि
अप्यतस्यापि देयस्याद्भृतेरर्द्धं लभेत सः। कात्यायनः। यथा च पथि तद्भांडमाक्षिप्येन क्रियेत वा। यावान
ध्वागतस्तेन प्राप्नुयात्तावतो भृतिं। त्यजेत्पथि सहायं यः श्रांतं रोगार्तमेव वा। प्राप्नुयात्साहसं पूर्वं ग्रामे त्र्यह
मपालयन्। आसिध्येत राजाज्ञया आवरुध्येत। बृहस्पतिः। प्रभुणा विनियुक्तः सन्भृतको विदधा

व्य.म.

॥७७॥ वियः॥ तदर्थमस्तु नं कर्मस्वामी तत्रापराध्नुयात्॥ कृते कर्मणि यः स्वामी न दद्याद्वेतनं नृते राज्ञा दाप्यः पितृव्य
:स्याद्वेतनं चानुरूपत इति नारदः॥ अनपनृत्याटयित्वा तु भांडं वापानवाहने॥ दाप्यो ऽन्नतिचितुर्भागं सर्वमः
र्थपथे त्यजन्॥ यानं स्थापयित्वा वाहनं साज्ञा दस्वामि कात्यायनः॥ हस्तस्थ गोस्वरो द्वारीनग्रहीत्वा नाटकेयः नार्पये
त्कृतकृत्यः सन् तावद्दाप्यः स नाटकं नारदः॥ परभूमौ गृहं कृत्वा स्तोमं दत्वा वसेत्तु यः स तद्गृहीत्वा निर्गच्छेत्तृण
काष्ठेष्टकादिकं स्तोमाद्विनो वसित्वा तु परभूमावनिश्चितः॥ यान्सवस्तृणकाष्टानिति विष्टिका विनिवेशिता॥ वि
निर्गच्छंस्तु तत्सर्वं स्वामिने विनिवेदयेत्॥ स्तोमं नाटकं अथ समं विद्यतिक्रमः॥ नारदः॥ पाषंडनैगमादीनां स्थि
ति समय उच्यते॥ समयस्यान पाकर्म तद्विवादपदं स्मृतं॥ पाषंडवेदमार्गविरोधिनो वाणिज्यादिकरा नैगमा
स्तद्विरोधिनः॥ आदिपदेन त्रैविद्या गृह्यते॥ नवराजकृतमाह बृहस्पतिः॥ वेदविद्याविदो विप्रान् श्रोत्रियानग्नि
होत्रिणः॥ आहृत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत्॥ अनाच्छेद्यकराः स्तेभ्यः प्रदद्याद्गृहसमयः॥ मुक्तानां राम:
व्यास्यन्नृपतिलेखयित्वा स्वशासने॥ अनाच्छेद्योऽयाद्य करोयाम्यस्तात्स्वनाच्छेद्यकराः॥ मुक्तनाव्याव्यामुक्तकत्तु ॥५३०॥

कृष्टिभाव्यं भूम्यादिफलं यासां ता इत्यर्थः॥ तेषां च श्रोत्रियादीनां धर्ममाह याज्ञवल्क्यः॥ निजधर्मविरोधेन यस्तु
सामयिको भवेत्॥ सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः॥ नारदः॥ पाषंडनैगमश्रेणिपूगव्रातगणादिषु
संरक्षेत्समयं राजा दुर्गे जनपदेषु च॥ नानाजातीया नानामेकजातीयं कर्म कुर्वतां संघातः॥ श्रेणयः॥ तेषामे
व भिन्नजातीया कया कर्म कुर्वतां संघाताः पूगाः॥ व्राताः॥ जातिसंबंधिबहूनां संघाताः॥ एतएव कुलानीत्य
पुच्यंते॥ पाषंडिनो नैगमाश्च व्याख्याताः॥ एतेषां षडादिनो व्रातां संघागणाः॥ एतेषां समये भेदे दंडमाह याज्ञव
ल्क्यः॥ गणद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः॥ सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् इति॥ इति संविद्व्यतिक्र
मः॥ अक्रीतानुशयः॥ नारदः॥ क्रीत्वा मूल्येन यः पण्यं केता न बहु मन्यते॥ क्रीतानुशय इत्येतद्विवा
दपदमुच्यते॥ पण्यपरीक्षावधिमाह स एव॥ अहा दोह्यं परीक्षेत पंचाहाद्वाह्यमेव तु॥ मुक्ता वज्रप्रवाला
नां सप्ताहं स्यात्परीक्षणं॥ द्विपदामर्धमासं तु पुंसां तद्विगुणं स्त्रियाः॥ दशाहं सर्वबीजानामेकाहं लोहवास
सां॥ कात्यायनः॥ भूमेर्दशाहे तु भवेत्केतुर्विक्रेतुरेव वा॥ बृहस्पतिः॥ अतो वोक्तपण्यदोषप्रकटपदिसं जायते क

व्य॰म॰

॥७८॥

चेत् विक्रेतुः प्रतिदेये तत्क्रेता मूल्यमवाप्नुयात्॥ कात्यायनः॥ अविज्ञातं तु यत्क्रीतं दुष्टं पश्चाद्विभावितं॥ क्रीतं तत्
स्वामिने देयं पण्यं कालेन्यथा न तु॥ नारदः॥ क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं मन्यते क्रयी॥ विक्रेतुः प्रतिदेयं तत्
तस्मिन्नेवाह्न्यविक्षितं॥ द्वितीयेह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत्॥ द्विगुणं तत्तृतीयेह्नि परतः क्रेतु
रेव तत्॥ नारदः॥ परिभुक्तं तु यद्वासः क्लिष्टरूपं मलीमसं॥ सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः॥ इतिक्री
तानुशयः॥ अथ विक्रयासंप्रदानं॥ नारदः॥ विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते॥ विक्रीयासंप्रदानं तत् वि
वादपदमुच्यते॥ याज्ञवल्क्यः॥ गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति॥ सोदयं तस्य दाप्योसौ दिग्लाभं वा दि
गागते॥ दिग्देशांतरं तत्र यो देशांतरीयपण्यजो लाभः॥ स एव॥ राजदैवोपघातेन पण्ये दोषमुपागते॥ हानिर्वि
क्रेतुरेवासौ याचितस्याप्रयच्छत॥ स एव॥ हानिश्च क्रेतृदोषेण क्रेतुरेव हि सा भवेत्॥ नारदः॥ दीयमानं न गृ
ह्णाति क्रीत्वा पण्यं च यः क्रयी॥ विक्रीणानस्तदन्यत्र विक्रेता नापराप्नुयात्॥ याज्ञवल्क्यः॥ मत्तोन्मत्तेन विक्री
तं हीनमूल्येन येन वा॥ अस्वतंत्रेण मूढेन त्याज्यं तस्य पुनर्भवेत्॥ अयं च मनुवेपि विधिर्मूल्यदत्तेत्वयमेव दे

राम:

॥५३॥

येनान्यस्मै ति विक्रेता समामयेकृतिर्बोध्यः दत्तमूल्यपण्यस्य विधिरेष प्रकीर्तितः॥ अदत्तेन्यत्र समयान्न
विक्रेतुरतिक्रम इति नारदोक्तेः॥ सदोषपण्यविक्रये याज्ञवल्क्यः॥ याज्ञासदोषं यः पण्यं विक्रीणीताविच
क्षणः॥ तदेव द्विगुणं दाप्यस्तत्समं विनयं तथा॥ इति विनयं तथा॥ इति विक्रीयासंप्रदानं॥ अथ स्वामिपा
लविवादः॥ पालदोषेण पश्वादिनाशे याज्ञवल्क्यः॥ पालदोषेण पश्वादिपाले दंडो विधीयते॥ अर्धत्रयोद
शपणाः स्वामिने द्रव्यमेव च॥ द्रव्यं गवादि॥ पश्वादिमरणे निक्षेपकमाह मनुः॥ कर्णौ चर्म च बालांश्च ब
स्तिं स्नायूं च रोचनां॥ पशुस्वामिषु दद्यात्तु मृतेष्वंकानि दर्शयेत्॥ अंकः शृंगादीति मदनः॥ गवादिप्रचारार्थं भूमि
भागमाह याज्ञवल्क्यः॥ धनुःशतं परीणाहो ग्रामक्षेत्रांतरं भवेत्॥ द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतं
परीणाहो गवादिप्रचारार्थान्तः॥ अयमेव परीहारः॥ धनुःशतं परीहारो ग्रामस्य स्यात्समंततः॥ इति मनूक्तेः
॥ अनेककार्षकावलयुक्तो ग्रामः खर्वटः॥ बहुकंटकसंतान इति केचित्॥ परसस्यादिभक्षणे स्वामि
नो दंडमाह याज्ञवल्क्यः॥ माषानष्टौ तु महिषी सस्यघातस्य कारिणी॥ दंडनीया तदर्धं तु गौस्तदर्धमजाविकं

प्रव्रजितोपनिष्टानां यथोक्ताद्विगुणो दमः॥ समं मेषां विवीते परिवृरो छ्रमहिषीसमं॥ यावत्सस्यं विनश्येत्तु तावत्सा
त्क्षेत्रिणः फलं॥ गोपस्ताड्यश्च यं कर्म करिष्यतीति कर्मेकृत्वा एणायदत्तं॥ स्वधर्मविनियोक्ते धर्मं करिष्यतीति
बुध्यादत्तं॥ एतान्यपरावर्तंते कात्यायनः॥ कामक्रोधास्वतंत्रार्तक्लीबोन्मत्तप्रमोहितः। च इत्यर्थः॥ यस्तु तोव
लात्॥ दंडं चैकादशागुणमाक्रमंगीयमानवाः॥ उत्कोचस्य रूपमाह स एव॥ स्नेहस्नाहसिकोद्धृततारहारि
कशंसनात्॥ दर्शनान्निष्ठव्यस्य तथासत्यप्रवर्तनात्॥ प्रागमे तैस्तु यत्किंचिदुक्तो चारव्यं तदुच्यते॥ मनुः॥ योध
ःगाधसमविक्रीयैनैगतान प्रतिग्रहे॥ यस्य चाप्युपधिपरीतत्सर्वं विनिवर्तयेत्॥ योगउपाधिः॥ यस्य वा
प्यन्यस्य वापि कार्यस्यातत्सर्वमुपधपगमे परावर्तंत इत्यर्थः॥ कात्यायनः॥ स्वच्छेनात्तेन वादत्तं प्रावितं
धर्मकारणात्॥ अदत्तं तु भ्रुते दाप्यस्ततस्तु तेनात्रसंशयः॥ अत्र विस्तरो गुरुकृते द्वैतनिर्णये द्रष्टव्यः॥ इ
तिदत्तापूर्णहानिकनिर्णयः॥ अथाभ्युपेत्याशुश्रूषा॥ नारदः॥ अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते॥ अशु राम:
श्रूषाभ्युपेत्येतद्विवादपदमुच्यते तत्र शुश्रूषकत्रैविध्यमाह बृहस्पतिः॥ अध्युधीरस्ते मः प्रोक्तो मध्यम ॥५४॥

स्तु कृषीवलः॥ भारवाहो धमः प्रोक्तोस्तथा च गृहकर्मकृत्॥ नारदः॥ सर्वेषामधिकृतो यः स्यात्कुटुंबस्य तथो
परि सोधिकर्मकृतो ज्ञेयः स च कौटुंबिकः स्मृतः॥ कात्यायनः॥ स्वतंत्रस्यात्मनो दानाद्दासत्वं दारवद्भृगुः॥ त्रि
ष्वेव वर्षेषु विज्ञेयं दास्यं विप्रस्य न क्वचित्॥ वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः॥ राजन्यवैश्यशूद्राणां
त्यजतां हि स्वतंत्रतां॥ नारदः॥ वर्णानां प्रातिलोम्येन दासत्वं न विधीयते॥ कात्यायनः॥ प्रव्रज्यावसिता यत्र
त्रयो वर्णा द्विजातयः॥ निर्वासं कारयेद्विप्रं दासत्वं क्षत्रियं नृपः॥ क्षत्रग्रहणं विट्शूद्रयोरुपलक्षणं॥ वि
प्रनिवासनप्रकारमाह तु स एव नारदो परिव्राज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति॥ श्वपदेनांकयित्वा तु राज
शीघ्रं प्रवासयेत्॥ कात्यायनः॥ सवर्णोऽपि तु विप्रं तु दासत्वं नैव कारयेत्॥ शीलाध्ययनसंपन्ने तदनंक
र्मकारं मतः॥ तत्रापि नाशुभं किंचित्कारयेत द्विजोत्तमं॥ मनुः॥ क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्षितौ
विभृयादानृशंस्येन स्वामिकर्मतु कारयेत्॥ स्वामिकर्म तत्तमंतद्योगेसित्यर्थः॥ कात्यायनः॥ आदद्याद्ब्राह्म
णो यस्तु विक्रीणीयात्तथैव च॥ राजा तदकृतं कार्यं दंड्यास्युः सर्व एव ते॥ कामात्तु संश्रिता यस्तु कुर्याद्दासीकुल

॥८०॥ स्त्रियां क्रमेयेन्नवान्यतुदं प्रसक्त्याहृतं भवेत्॥ बालधात्री च दासी मितब्रुनक्रियाः परिचारयन्ती च प्राप्नुयात्स्व
र्वेसाहसंविच्छु॥ यस्तत्रमवरणं दास्येनियोजयति तस्योत्तमसाहसो दंडः॥ कात्यायनः॥ विक्रीणामानां यो न
क्रादासीं विक्रेतुमिच्छति॥ अनापदिस्थः सक्तः स न प्राप्नुयात्पूर्वसाहसं॥ दासभेदे नारदः॥ गृहजातस्त
थाक्रीतो लब्धो दायादुपागतः॥ अनाकालभृतस्तद्वदाहितः स्वामिना च यः॥ मोक्षितो महतश्चर्णाद्युद्धप्रा
प्तः पणजितः॥ तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥ भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः॥ विक्रेता
चात्मनः शास्त्रे दासाः पंचदश स्मृताः॥ तत्र पूर्वश्चतुर्वर्गो दासत्वान्न निवर्त्तते॥ प्रसादात्स्वामिनोन्यत्र दास्यमे
षां क्रमागतं॥ विक्रीणीते स्वतंत्रः सन्य आत्मानं नराधमः॥ स जघन्यतमस्तेषां सोपि दास्यान्न मुच्यते॥ यो वे
षां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्॥ दासत्वात्स प्रमुच्येत पुत्रभागं लभेत च॥ याज्ञवल्क्यः॥ प्रव्रज्यावसि
तो राज्ञो दास आमरणांतिकं॥ नारदः॥ अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्॥ आहितोपि धनं दत्वा राम:
स्वामी यद्येनमुद्धरेत्॥ ऋणं तु सोदयं दत्वा ऋणी दास्यात्प्रमुच्यते॥ तवाहमित्युपगतो युद्धप्राप्तः पणे जितः॥ ॥५४२॥

प्रतिशीर्षप्रदानेन मुच्येरन्तुल्यकर्मणा॥ कृतकालव्यपगमात्॥ कृतो दासो विमुच्यते॥ भक्तस्योपेक्षणात्स
द्यो भक्तदासः प्रमुच्यते॥ निग्रहाद्वडवायास्तु मुच्यते वडवाहृत इति॥ प्रतिशीर्षः प्रतिनिधिः वडवा दासी प्रतिनि
धिः याज्ञवल्क्यः॥ बलाद्दासीकृतश्चौरैर्विक्रीतश्चापि मुच्यते॥ नारदः॥ तवाहमिति चात्मानं यो स्वतंत्रः प्रयच्छति॥
न स तं प्राप्नुयात्कामं पूर्वस्वामी लभेत सं॥ अस्वतंत्र परदास॥ अस्मिन्प्रकरणे दासपदं गतं तु स्वस्यापि विवक्षि
तत्वाद्दास्यामप्येष सर्वो विधिर्ज्ञेयः॥ तत्र दासीत्वविमोककारणमाह कात्यायनः॥ स्वां दासीं यस्तु संगच्छेत्प्रसू
ता च भवेत्ततः॥ अवेक्ष्य बीजं कार्या स्याद्दासी सान्वया तु सा मातु पूर्वोक्तं दंडमर्हति॥ विवीतं तृणकाष्ठादि
संचयस्थलं॥ एतदपवादस्तु उशना॥ अदंड्या आश्रमस्त्वे गावः प्राह्काले न तथैव च व्यास॥ अकामस्य च द्विजेर्त्तुकं
परीक्षाणेश्व वो धवे॥ गोनिश्वरत्राई लवाजपेयादिविष्यते॥ उशना॥ गोभिर्विनाशितं धान्यं यो नरः प्रतिप
चते॥ पितरस्तस्य नाश्नंति यदिस्युस्त्रिदिवौकसः॥ इति स्वामिपालविवादः॥ अथ सीमाविवादः॥ सीमाज्ञानोप
पायमाह बृहस्पतिः॥ करीषास्थितुषांगारशर्करात्मकपालिकाः सिकतेष्टकगोबालकार्पासास्थीनि भस्म

प्रच्छिप्य कुंभेष्वेतानि सीमांतेषु निधापयेत्॥ अन्यसाक्षिणां विशेषमाह याज्ञवल्क्यः। सामंता वा समग्रामाश्चत्वा
रोष्टौ दशापि वा। रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः॥ नारदः। नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि
गुरुत्वाद्दस्य कार्यस्य क्रियैषा बहुषु स्थिता॥ बृहस्पतिः। ज्ञातचिह्नैर्विनासाधरेकोप्यनषसंमतः। रक्तमा
ल्यांबरधरो मृदमादाय मूर्द्धनि। सत्यव्रतः सोपवासः सीमानं दर्शयेन्नरः॥ कात्यायनः। सीमाचंक्रमणे को
शं पादस्पर्शनं तथैव च। त्रिपक्षं पक्षं सप्ताहं दैवराजिकमिष्यते॥ मनुः। यथोक्तेन नयंतस्ते पूयंते सत्यसाक्षि
णः। विपरीतं नयंतस्तु दाप्याः स्युर्द्विशतं दमं॥ नारदः। अथ चेदनृतं ब्रूयुः सामंताः सीमनिर्णये। सर्वे पृथक्दंड्या रा
ज्ञा मध्यमसाहसः॥ कात्यायनः। बहूनां तु गृहीतानां न सर्वैर्निर्णयं॥ यदि कुर्युर्भयाल्लोभाद्दाप्यास्तूत्त
मसाहसं॥ याज्ञवल्क्यः। अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता॥ मनुः। सीमायामविषह्यायां स्वयं रा
जा च धर्मवित्। प्रदिशेद्भूमिमेकेषामुपकारादिति स्थितिः॥ स एव। निवेशकालादारभ्य गृहद्वारापणा
दिकं। येन यावद्यथा भुक्तं तस्य तन्न विचालयेत्॥ कात्यायनोपि। मेखलाभ्रमनिष्कासगवाक्षान्नोपरोध रामः

येत्। प्रणालीं गृहवास्तु च पीडयन् दंडभाग्भवेत्॥ मेखला भित्तिमूलबंधः। भ्रमो जलनिर्गमः। निष्कासो
हर्म्यादिविनिर्गतकाष्ठादिनिर्मितमस्पृष्टभूमिकमुपवेशनस्थलमिति मदनः। धूमनिष्का इति क्वचित्पाठः।
धूमनिर्गमार्थं गवाक्षादीति तदर्थः। अहिपदेन परभित्त्यादि। स एव। निवेशसमयादूर्ध्वं नैते योज्याः कदाच
न। दृष्टिपातं प्रणालीं च न कुर्यात्परवेश्मसु॥ बृहस्पतिः। वर्चःस्थानं वह्निचयं गर्तोच्छिष्टांबुसेचनं। अत्यारात्परकु
ड्यस्य न कर्तव्यं कथंचन॥ वर्चःस्थानं शौचस्थानं। अत्यारादतिसमीपे॥ कात्यायनः। विण्मूत्रोदकसेचं च क्षिपश्च नि
वेशनं। अरत्निद्वयमुत्सृज्य परकुड्यान्निवेशयेत्॥ बृहस्पतिः। यांत्यायांति जना येन पशवश्चानिवारिताः। तदुच्य
ते संसरणं न रोद्धव्यं तु केनचित्॥ नारदः। अवस्करस्थलश्वभ्रमस्यंदनिकादिभिः। चतुष्पथसुरस्थानराजमार्गान्नरो
धयेत्॥ कात्यायनः। सर्वे जनाः संदायेन प्रयांति स चतुष्पथः। अनिषिद्धा यथाकालं राजमार्गः स उच्यते॥ बृहस्पति
ः। मस्तत्वसंकरश्वभ्रं वृक्षारोपणमेव च। कामात्कुराषंकुर्याच्च तस्य दंडस्तु माषकः॥ मनुः। समुत्सृजेद्राजमार्गे
यस्त्वमेध्यमनापदि। स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्॥ कात्यायनः। तडागोद्यानतीर्थानि योमेध्येन विना

व्य.म.
॥९२॥ शायेत्। अमेध्यं शोधयित्वा तु दंड्येत् सर्वमाहरं। याज्ञवल्क्यः। मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा। क्षेत्रस्य
हरणे दंडा अधमोत्तममध्यमाः। गृहं तडागमारामं क्षेत्रं वा भीषया हरन्। शतानि पंच दंड्यस्स्यादज्ञानाद्द्विश
तो दमः। कात्यायनः। सीमामध्ये तु जातानां शाखापत्रान्यसंस्थिता। स्वामिनं तं विजानीयाद्यस्य क्षेत्रेषु संस्थि
ताः। याज्ञवल्क्यः। स्वामिने यो निवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत्। उत्पन्ने स्वामिनो भोगस्तदभावे महीपते स एव
न निषेध्योल्पबाधस्तु सेतुः कल्याणकारकः। परभूमिं हरेत्कूपः स्वल्पक्षेत्रो बहूदकः। न निषेध्य इत्यनुषंग
ः। नारदोपि। परक्षेत्रस्य मध्ये तु न प्रतिसिध्यते महागुणोल्पदोषश्चेद्वृद्धिरिष्टा क्षये सति। नारदः। पूर्वप्रवृत्तमु
त्सन्नमपृष्ट्वा स्वामिनं तु यः। सेतुं प्रवर्तयेद्यस्तु न स तत्फलभाग्भवेत्। व्यासः। क्षेत्रं गृहीत्वा यः कश्चिन्न च
कारयेत्। स्वामिने स शतं दद्याद्राज्ञे दंडं च तत्समं। शतं क्षेत्री तत्सदृक्फलं। इति सीमाविवादः। अथ वाक्पारु
ष्यं। बृहस्पतिः। देशग्रामकुलादीनां क्षेपपापनियोजनं। द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते। भगिनी
मातृसंबंधउपपातकसंशनं। पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्रवेदिभिः। अभक्ष्यापेयकथनं महापातकदूष राम:
॥५४३॥

णं। पारुष्यमुत्तमं प्रोक्तं तीव्रमर्मातिघट्टनमिति। द्रव्यं विना द्रव्यवैशिष्ट्यं विना केवलौ वा क्षतमेवेतदर्थः। अभि
घट्टनमुद्घाटनं। विष्णुः। समवर्णाक्रोशने द्वादशपणान् दंड्यः। स्पर्शेतरे। पारुष्यदोषावृतयोर्युगपत्संप्रवृत्तयो
ः। विशेषश्चेन्न दृश्येत विनयः स्यात्समस्तयोः। नारदः। पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक्। पश्चाद्य
ः सोप्यसत्कारी पूर्वे तु विनयो गुरुः। मनुः। शतं ब्राह्मणमाक्रुश्य क्षत्रियो दंडमर्हति। वैश्योप्यर्धशतं द्वे वा शूद्रा
स्तु वधमर्हति। बृहस्पतिः। विप्रे शतार्द्धं दंडस्तु क्षत्रियस्याभिशंसने। विशस्यादर्धपंचाशच्छूद्रस्यार्धत्रयोद
शः। शूद्रविषये स एव। धर्मोपदेशकर्ता च वेदोदाहरणान्वितः। आक्रोशकस्तु विप्राणां जिह्वाछेदेन दंड्यते। मात
रं पितरं जायां भ्रातरं श्वशुरं गुरुं। आक्षारयच्छतं दाप्यः पंथानं चाददद्गुरोः। भ्राता ज्येष्ठः। पित्रादिसाहचर्या
त्। मातृशानांप्रमापराधत्वे जायायाश्च निरपराधत्वे दंड इति मिताक्षरादिषु। याज्ञवल्क्यः। बाहुग्रीवानेत्रसक्थि
विनाशे वाचिके दमः। शत्यस्तदर्धिकः पादनासाकर्णादिषु। अशक्तस्तु वदन्नेवं दंडनीयः पणान् दश। तथा। श
क्तः प्रतिभुवं दाप्यो ग्रहेमायतस्य तु स एव। अभिगतास्म भगिनी मातरं चात वेत्ति च। शापं तदा पयेद्राजा पं

चविंशतिकः दमः। त्रैविद्यनृपदेवानां दंडउत्तमसाहसः॥ नारदः। पतितं पतितेत्युक्त्वा चोरं चौरेति वा पुनः। वचना
त्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेत्॥ याज्ञवल्क्यः। सत्यासत्यान्यथा वैस्तोत्रैर्न्यूनांगेंद्रियरोगिणां। क्षेपं करोति
चेद्दंड्यः पणानर्धत्रयोदश॥ उशना। मोहात्प्रमादात्संघर्षात्प्रीत्या वोक्तं मयेति यः। नाहमेवं पुनर्वक्ष्ये दंडार्द्धं त
स्य कल्पयेत्॥ इति वाक्पारुष्यं॥ अथ दंडपारुष्यं॥ नारदः। परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः। भस्मादिभि
श्चोपघातो दंडपारुष्यमुच्यते॥ बृहस्पतिः। आकृष्टस्तु समाक्रोशंस्ताडितः प्रतिताडयेत्। हत्वापराधिनं चैव ना
पराधी भवेन्नरः इति। कात्यायनः। कर्णौष्ठघ्राणपादाक्षिजिह्वाशिश्नकरस्य च। छेदने चोत्तमो दंडो भेदने मध्यमो भृगु
ः। याज्ञवल्क्यः। भस्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः। अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः। समेष्वेवं पर
स्त्रीषु द्विगुणस्तूत्तमेषु च। हीनेषु च अर्धो दमो मोहमदादिभिर्न दंडनं॥ पार्ष्णिः पादपश्चाद्भागः। कात्यायनः।
छर्दितमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः। षड्गुणः कायमध्ये स्यान्मूर्ध्नि त्वष्टगुणः स्मृतः॥ याज्ञवल्क्यः। उद्गूर्णे हस्त
पादे तु दशविंशतिकौ दमौ। परस्परं तु सर्वेषां शास्त्रे मध्यमसाहसः। स एव पादकेशांशुककरोल्लुंचनेषु प रामः
॥५४४॥

णान्दश। पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः। शोणितेन विना दुःखं कुर्वन्काष्ठादिभिर्नरः। द्वाविंशतं पणा
न्दंड्यो द्विगुणो दर्शनेऽसृजः। पीडेत्यादि अंशुकेनावेष्ट्य दृढमाकृष्य पादेनाध्यासे शतमित्यर्थः। स एव कर
पाददतो भंगे छेदने कर्णनासयोः। मध्यो दंडो व्रणोद्भेदे मृतकल्पहते तथा॥ विप्रपीडाकरं छेद्यमंगमब्राह्मण
स्य तु॥ उद्गूर्णे प्रथमो दंडः संस्पर्शे तु तदर्द्धिकः। मनुः। येन केनचिदंगेन हिंस्याच्छ्रेयांसमंत्यजः। छेत्तव्यं तत्तदेवास्य
तन्मनोरनुशासनं॥ पाणिमुद्यम्य दंडं वा पाणिच्छेदनमर्हति॥ कात्यायनः। वाक्पारुष्ये यथैवोक्ताः प्रातिलो
म्यानुलोमतः। तथैव दंडपारुष्ये पात्या दंडा यथाक्रमं॥ विष्णुः। एकं बहूनां निघ्नतां प्रत्येकं शास्त्रोक्तो दंडो द्विगु
णः। कात्यायनः। देहेंद्रियविनाशे तु यथा दंडं प्रकल्पयेत्॥ तथा तुष्टिकरं देयं समुत्थानं च पंडितैः। तुष्टिस्ता
डितस्य तोषकरं समुत्थानमौषधादिमूल्यं च पंडितैरभिज्ञैः कल्पितं देयमित्यर्थः। पशुताडने याज्ञवल्क्यः। दु
ःखे च शोणितोत्पादे शाखांगच्छेदने तथा। दंडः क्षुद्रपशूनां स्याद्द्विपणप्रभृतिः क्रमात्॥ लिंगस्य छेदने मृत्यौ म
ध्यमो मूल्यमेव च। महापशुष्वेतेषु स्थानेषु द्विगुणो दमः॥ वृक्षोपघाते मनुः। वनस्पतीनां सर्वेषामुपभोगो

व्य.म.
॥९५॥ यथायथा॥ तथातथादमः कार्यो हिंसायामिति धारणा॥ इति दंडपारुष्यः॥ अथ स्तेयं॥ तुडपयोगितया त्रिविधं
द्रव्यमाह॥ नारदः॥ मृद्भांडासनखट्वास्थिदारुचर्मतृणादि यत्॥ शमीधान्यं कृतान्नं च क्षुद्रद्रव्यमुदाहृतं॥ वासः
कौशेयवर्जं च गोवर्जं पशवस्तथा॥ हिरण्यवर्जं लोहं च मध्यं व्रीहियवादि च॥ हिरण्यरत्नकौशेयं स्त्रीपुंगोगजवा
जिनः॥ देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमं॥ तत्र प्रकाशतस्करास्तावदाह स एव॥ नैगमा वैद्यकितवास
भ्योत्कोचकवंचकः॥ दैवोत्पादकराः क्षुद्राः शिल्पज्ञाः प्रतिरूपकाः॥ अक्रियाकारिणश्चैव मध्यमाः कूटसाक्षिणः॥
प्रकाशतस्करा ह्येते तथा कुहकजीविनः॥ स्मृतं नरेपि॥ प्रकाशवंचकास्तत्र कूटमानतुलाश्रिताः॥ उत्कोच
कामोपधिकावंचकाः॥ पापयोषितः॥ प्रतिरूपकराश्चैव मंगलादेशवृत्तयः॥ इत्येवमादयो ज्ञेया ज्ञेयाः प्रकाश
तस्करा भुवि॥ बृहस्पतिः॥ प्रच्छाद्य दोषं को व्याधिं स्यापुनः संस्कृतविक्रयी॥ पण्यं तद्द्विगुणं दाप्यो वणिग्दत्वाच
तत्समं॥ अज्ञानौषधिमंत्रस्तु व्याधरतत्ववित्॥ रोगिभ्योर्थं समादत्ते स दंड्यश्चौरवद्भिषक्॥ कूटाक्षदेविनः
क्षुद्राराज्यानावहराश्च ये॥ गणकावंचकाश्चैव दंड्याले कितवाः स्मृताः॥ अन्यायवादिनः सभ्यास्तथैवो
राम: ॥५४५॥

त्कोचजीविनः॥ विश्वस्तवंचकाश्चैव निर्वास्याः सर्व एव ते॥ ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तथान्तराणां॥ ग्रंकु
नादिवपेत्रुषु विनिपात्ते प्रयत्नतः॥ वस्त्रालंकरणैर्युक्तमात्मानं दर्शयंति ये॥ हिंसंति छद्मनान्नराणां वध्या
स्ते राजपुरुषैः॥ स्वल्पमूल्यं तु संस्कृत्य नयंति बहुमूल्यतां॥ ये चान्यं वंचयंति दंड्यास्ते यथानुसारतः॥ द्वे
मस्तप्रवालाद्यानां कृत्रिमानां करोति ये॥ केतुर्मूल्यं प्रदाप्यास्ते राज्ञे च द्विगुणं दमं॥ मध्यस्था वंचका
स्तुश्चेदगलेनादिनापदासाक्षिणश्चान्यथा ब्रुवुदाप्यास्ते द्विगुणं दमं॥ व्यासः॥ साधनान्विता रात्रीय दिव
छन्नचारिणः॥ अविज्ञातनिवासाश्च ज्ञेयाः प्रच्छन्नतस्कराः॥ स एव॥ उत्क्षेपकाः संधिभेत्तारः पांथमुष्टाग्निमो
चकाः॥ स्त्रीपुंगोश्वपशुस्तेयाश्चौरेनवविधाः स्मृताः॥ संधिभित्त्यादि॥ याज्ञवल्क्यः॥ उत्क्षेपकग्रंथिभेदौ करसंदंश
हीनकौ कार्यौ द्वितीयापराधे करपादविहीनकौ॥ संदंशाः तर्जन्यंगुष्टौ॥ संधिं छित्वा तु ये चौर्यं रात्रौ कुर्वंति तस्करा
॥ तेषां छित्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत्॥ बृहस्पतिः॥ तर्षयां थापां पतुषो हस्ते गले बध्वावलंबयेत्
अंगुलीग्रंथिभेदस्य छेदयेत्प्रथमे ग्रहे॥ द्वितीये हस्तचरणौ तृतीये वधमर्हति॥ अंगुली तर्जन्यंगुष्टौ॥ कृत्वांगहीनां चौर

व्य.म.

६५ पल्लापनेविशेषमाहयाज्ञवल्क्यः॥गोचरेयस्यमुष्येततेनचौरःप्रयत्नतः॥ग्राह्योदाप्योथवान्येषांपदंयदिननिर्गतं
निर्गतेतुपुनरेतस्मान्नचदन्ययाचितं॥पंचग्रामीबहिःक्रोशाद्दशग्राम्यथवापुनरति॥स्त्रीहरणेव्यासः॥स्त्री
हर्त्तालोहशयनेदग्धव्योवैकटाग्निना॥नरहर्त्ताहस्तपादौछित्वास्थाप्यश्चतुष्पथे॥नारदः॥सर्वस्वंहरतोना
रीकन्यांहरतोवधः॥वाजिवारणलोहानांचादरीतवृहस्पतिः॥स्वर्वस्वमित्यनुषंगः॥व्यासः॥पशुहर्त्तुस्त्व
र्धपादंतीक्ष्णशस्त्रेणकर्त्तयेत्॥महापशुस्तेनयतोदंडउत्तमसाहसः॥मध्यमंमध्यमपशून्पूर्वंक्षुद्रपश्र
न्हता॥मनुः॥धान्यंदशभ्यःकुंभेभ्योहरतोभ्यधिकेवधः॥शेषेप्येकादशगुणंदाप्यस्तस्यचतद्धनं॥कुंभोविंशति
प्रस्थः॥सरावमुख्यानांचैवरत्नानांहरणेवधमर्हति॥नारदः॥सुवर्णरजतादीनामुत्तमानांचवाससां रत्ना
नांचैवसर्वेषांशतादभ्यधिकेवधः॥मनुः॥सुवर्णरजतादीनामुत्तमानांचवाससां॥पंचाशतस्त्वभ्यधिकेह
स्तच्छेदनमिष्यते॥शेषेष्वेकादशगुणंमूल्याद्दंडःप्रकल्प्यते॥याज्ञवल्क्यः॥संधिंकृत्वास्तेनंहत्वास्वरा रामः
शूलेद्विप्रवासयेत्॥मनुः॥प्रायश्चित्तंचकुर्वाणाःपूर्वेवर्णायथोदितं॥नांकाराज्ञाललाटेतुदाप्यास्तूत्तमसाहसं ॥५६॥

याज्ञवल्क्योपि॥चौरप्रदाप्यायहृतंघातयेद्विविधैर्वधैः॥नारदः॥नक्तावकाशदातारस्तेनानांयेप्रसर्पतां
शक्ताश्चयेउपेक्षंतेतेपितद्दोषभागिनः॥तद्दंडभागिनश्च॥इतिस्वैषां॥अथसाहसं॥तस्यस्वरूपंदेनोक्तं
सहसाक्रियतेकर्मयत्किंचिद्बलदर्पितं॥तत्साहसमितिप्रोक्तंसहोबलमिहोच्यते इति वृहस्पति
॥मनुष्यमारणंचौर्यंपरदाराभिमर्शनं॥पारुष्यमुभयंचेतिसाहसंस्याच्चतुर्विधं॥उभयंवाक्पारुष्यंचे
ति॥नारदः॥फलमूलोदकादीनांक्षेत्रोपकरणस्यच॥भंगाक्षेपोपमर्दाद्यैःप्रथमंसाहसंस्मृतं॥व्यासः
पश्वन्नपनानांगृहोपकरणस्यच॥एतेनैवप्रकारेणमध्यमंसाहसंस्मृतं॥व्यापादोविषशस्त्राद्यैःपरदा
राभिमर्शनं॥प्राणोपरोधियच्चान्यदुक्तमुत्तमसाहसं॥याज्ञवल्क्यः॥वेदियाहांस्तथावाजिकुंजराणांवि
हिंसाप्रसह्यघातिनश्चैवशूलानारोपयेन्नृपः॥वृहस्पतिः॥प्रकाशघातकायेतुतथाचोपांशुघातकाः
ज्ञात्वासम्यग्धनंहृत्वाहंतव्याविविधैर्वधैरिति॥वृहस्पतिः॥एकस्यवाहवोयत्रप्रहरंतिरुषान्विताः॥
मर्मप्रहारकारंतुघातकास्ततउक्ता॥कात्यायनः॥आरंभकृत्सहायश्चतथामार्गानुदेशकः॥आश्रयदः

स्वदानाच्च नक्तदाताविकर्मणां॥ युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकः॥ उपेक्षाकार्ययुक्तश्च दोषवक्तानुमो
दकः॥ अनिषेधात्क्षमो यस्मात्सर्वे ते कार्यकारिणः॥ यथाशक्त्यनुरूपं तु दंडमेषां प्रकल्पयेत्॥ विप्रस्य दंडे विषमा
ह॥ नारदः॥ अविशेषेण सर्वेषां एष दंडविधिः स्मृतः॥ वधादृते ब्राह्मणस्य न वधं ब्राह्मणोर्हति॥ शिरसो मुं
डनं दंडस्तस्य निर्वासनं पुरात्॥ ललाटे चाभिशस्तांकः प्रयाणं गर्दभेन चेति॥ आततायिन्यपि विप्रे न वधः नात
तायिवधे दोषोन्यत्र गोब्राह्मणादिति सुमंतूक्तेः॥ कात्यायनः॥ आततायिनि चोत्कृष्टे तपःस्वाध्यायसंयुते॥
वधस्तत्र तु नैव स्यात्पापे हीने वधो भृगुः॥ आततायिनमाह स एव॥ उद्यतासिर्विषाग्निश्च शापोद्यतकर
स्तथा॥ आथर्वणेन हंता च पिशुनश्चापि राजनि॥ भयतिक्रमकारी च रंध्रान्वेषणतत्परः॥ एवमाद्यान्वि
जानीयात्सर्वानेवाततायिनः॥ वसिष्ठोपि॥ अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः॥ क्षेत्रदारहरश्चैव षडे
ते आततायिनः॥ यत्तु मनुः॥ गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं॥ आततायिनमायांतं हन्यादेवावि
चारयन्निति॥ यच्च कात्यायनः॥ आततायिनमायांतमपि वेदांतगं रणे॥ जिघांसंतं जिघांसीयान्न तेन ब्र

ह्महा भवेदिति॥ तदपि शास्त्राद्वाद्वशाद्ब्राह्मणेतराततायिवधपरं॥ ब्राह्मणग्रहणं तु कैमुतिकन्यायार्थं॥ आ
ततायि आततायि ब्राह्मणोपि वध्यः किमुतान्ये इति॥ मिताक्षरायां तु उद्यम्य शस्त्रमायांतं भ्रूणम
प्याततायिनं॥ निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा न स्यात् हत्वा भ्रूणहा भवेदिति स्वाध्यायिनं कुले
जातं यो हन्यादाततायिनं॥ अहत्वा भ्रूणहा स्यादहत्वा भ्रूणहा भवेदिति बृहस्पत्युक्तेश्चात्र वधपर्यंतमागम
नाततायी ब्राह्मणोपि वध्य एव॥ क्षेत्रदारादिहरो ब्राह्मणो न वध्यः॥ क्षत्रियादिस्तु तादृशोपि वध्य एव॥ क्षे
त्रदारादिहरो ब्राह्मणो न वध्यः॥ क्षत्रियादिस्तु तादृशोपि वध्य इति चंद्रिकाशयः॥ युक्तश्चायमनुकासा यतः
गालव बृहस्पतिवचसोर्वधयोद्येताततायिविशेषविषयासामान्यविषयो पूर्वोक्तसुमंतुकात्यायनवचसो वी
धर्म्योचितत्वात्॥ यत्तु बृहस्पतिः॥ आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतं॥ यो हन्यात्स वधप्राप्तः सोश्वमेधफलं
लभेदिति तदपि स्ववधोद्यतभिन्नाततायिपरं॥ किंच॥ आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनमिति कलौ
वधोत्र तस्मादाततायिनो विप्रस्य हननं निषिद्धं॥ तस्य विधितो ज्ञाप्ते कलौ निषिद्धं॥ तस्य विधितोप्राप्ते कलौ निषिद्धं

तस्य विधितो प्राप्तेः कलौ निषेधो व्यर्थः स्यात् सर्वेषामपि कलिनिषेधानां विधिप्राप्तगोचरत्वस्य इमान् धर्मान् ध
र्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः इति धर्मपरत्वरसेन सर्वनिबंधेषु व्यवस्थापितस्यात् ॥ अजः कलौ स्ववधो
द्यतोप्याततायिनि प्रोनवध्यः युगांतरे तु वध्य एव। अत्यन्तात्ततायि विप्रः सर्वेष्वपि युगेषु वध्यः क्षत्रियादि
स्त्वाततायिसवेपि सर्वयुगेषु वध्य इति दिक् ॥ हीनमध्योत्कृष्टद्रव्यहरणे दंडमाह बृहस्पतिः क्षेत्रोपकर
णं चैव पुष्पमूलफलानि च। विनाशयन् हरेन् दंड्यः शतादीमनु पत॥ पशुवस्त्रान्नपानानि गृहोपकरणं त
था। हिंसन् चोरयन् चोरयन् द्व्यास्यो द्विशास्यो द्विशता दंदमं तथा। स्त्रीपुंसौ हेमरत्नानि देवविप्रधनं त था॥
पौषेषं चोत्तमद्रव्यमेषां मूल्यसमो दमः। द्विगुणो वा कल्पनीय पुरुषापेक्षया न्ये पे। हर्ता वा घातनीयस्यात्प्रसं
गविनिवृत्तये। पौषापन्नोधनं वा वाक्षा एव पे। अत्र विनाशयन् हरेन्नेति पक्षः स्वरमात्मसाहसविषयवेतद्व्य इति मद
न। साहसप्रयोजकस्य दंडमाह याज्ञवल्क्यः। सः साहसं कारयति स दाप्यो द्विगुणं दमं। यश्चैवमुक्त्वाहं दाता
कारयत्सचतुर्गुणं दैगुण्यात् चतुर्गुणो मा ह्वान्कार्त दंडापेक्षया। विप्रान् बलात्कृतो दंडमाह मनुः। सहस्रं ब्राह्मणो

दण्ड्यो विप्रां गुप्तां बलाद्व्रजन्। तादृशं पां विप्रायां क्षत्रियाद्युक्ताह बृहस्पतिराह। मा हसाकामयेद्यस्तु धनं तस्या
खिलं हरेत्। उत्कृत्यलिंगवृषणौ भ्रामयेद्गर्दभेन तु। कामयेत्पुरपत्नीं गच्छेत। क्षत्रियादीनां स्वीतेषु मानांचब
लात्सजातीयपरनार्यागमने दंडमाह कात्यायनः। स्त्रीछत्वोपभोगः स्यात्समद्युपुरुषोयदा वधेतत्र प्रवर्त्तेत
कार्यातिक्रमणं हितत्। मृए वा अनीछंति ये तु स्का गुप्तां तावासये इहे। मलिनांगीम धाशय्यापिंडमात्रोप
जाविनी। स एवं हीनवर्णोयमुक्का वाताज्याव आप्यवाज्ववेत्। वधस्त्विछंतीवो ध्य हानमध्योत्तमसाहसेषु
दंडमाह नारदः। तस्य दंडक्रियापेक्षाः प्रथमस्य शतावरः मध्यमस्य च त्वाए चजेह ष्टा पंच ज्ञातावरः। उत्तमे साह
से दंडः सहस्रावर इष्यते। वंधः सर्वस्वहरणं पुरान्निर्वासनांकने। तदंगछेद इत्युक्तो दंड उत्तमसाहसः इति व
धछेनाकपदे श्वाक्क राजानं प्रतितान्यस्य तस्ये वदंडकरणेधिकारात्। इति साहसं। अथ स्त्रीसंग्रहणं। वा
बलात्परनार्यागमनस्य साहसत्वात्पूर्वमेव दंड उक्तः। छलेन सजातीयपरनार्यागमने त्वाह बृहस्पतिः। छ
न्मनाकारयेद्यस्तु तस्य सर्वं हरेद्दमः। अंकयित्वा भगांकेन पुरान्निर्वासयेत्ततः। सर्वहरः सर्वस्वहरः। अयं च

॥८८॥ दंडस्समायां हीनायामेव दंडः॥ उत्तमायां वधः॥ तथा च स एव॥ दमोनयः समायां च हीनायामर्द्धिकस्ततः॥ पुंसः कायां
तुगमने संप्रमापणं॥ हीनमध्योत्तमत्रिविधस्त्रीसंग्रहणे दंडमाह स एव॥ त्रयाणामपि चैतेषां प्रथमो मध्यउत्त
म विनयः॥ कल्पनायस्यान्मध्यमोपि बलात् इह॥ ह्रते तस्य परस्त्रियां सहसंजपिणे दंडमाह मनुः॥ परस्य पत्न्या
पुरुषः संभाषां योजयन्रहः॥ पूर्वमाक्षारितो दोषैः॥ प्राप्नुयात्पूर्वसाहसं॥ पित्रादिभिर्निवारितयोः स्त्रीपुंसोः सं
भाषणे दंडमाह याज्ञवल्क्यः॥ स्त्री निषेधे शतं दद्यात् द्विशतं तु दमं पुमान्॥ प्रतिषेधे तयोर्दंडो यथासंग्रहणे त
था॥ प्रत्येकनिषेधविषयं पूर्वमर्धं॥ उभयनिषेधे उत्तरार्द्धं॥ उभयोरनुरागकृते संयोगे दंडमाह याज्ञवल्क्यः॥
सजातावुत्तमो दंडः आनुलोम्येतु मध्यमः॥ प्रातिलोम्ये वधः पुंसां नार्याः कर्णादिकर्त्तनं॥ कात्यायनः॥ सर्वेषु चापराधे
षु पुंसो योर्थदमः स्मृतः॥ तदर्धं योषितो दद्युः वधे पुंसो ऽगकर्त्तनं॥ व्यभिचरितविप्रागमने तु मनुः॥ शतानि पं
च दंड्यः स्यादिच्छंत्या सह संगमे॥ इदं सजातीयापरं॥ व्यभिचरितास्वनुलोमानुगमने स एव॥ अगुप्ते वैश्यरा राम:
जन्ये शूद्रां वा ब्राह्मणो व्रजन्॥ शतानि पंच दंड्यः स्यात् सहस्रं त्वंत्यजस्त्रियामिति॥ यत्तु सहस्रं ब्राह्मणो दाप्यो ॥५४॥

गुप्ते विट् क्षत्रिये व्रजन् इति तत्साध्वीपरं॥ शूद्रस्य प्रातिलोम्येन गमने दंडमाह मनुः॥ शूद्रो गुप्तमगुप्तं वा द्वैजा
तं वर्णमावसन्॥ अगुप्तं लिंगसर्वस्वैर्गुप्तं सर्वेण हीयते॥ शूद्रो अगुप्तां द्विजां गच्छन् लिंगछेदनं सर्वस्वहर
णं चार्हति॥ गुप्तां तु गच्छन् सर्वस्वहरणं वधं चार्हतीत्यर्थः॥ गौतमः॥ आर्यस्त्र्यभिगमने लिंगोद्धारः सर्वस्व
हरणं च गुप्ता चेद्वधोधिक इति॥ मनुः॥ ब्राह्मणीं तु यदा गुप्तां गच्छेतां वैश्यपार्थिवौ॥ वैश्यं पंचशतं कुर्यात् क्ष
त्रियं तु सहस्रिणं॥ स एव॥ उभावपि हि तावेव ब्राह्मण्या गुप्तया सह॥ विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना
स एव॥ वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्॥ यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः॥ अगुप्तां वै
श्यां वा क्षत्रियो व्रजेत्॥ यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः॥ अगुप्ताब्राह्मणीगमने यो दंडः स इत्यर्थः॥ वसि
ष्ठः॥ राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येदेवं वैश्यो राजन्यायां मैथुनमाचरन्
शूद्रस्तु राजन्यवैश्ययोरिति॥ नारदः॥ एवं मातृसमामातृष्वसा मातुलानी पितृष्वसा॥ पितृव्यसखिशिष्यस्त्री भगि
नी सखी स्नुषा॥ दुहिताचार्यभार्या च सगोत्रा शरणागता॥ राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या॥ आसा

व्य·म· अन्यतमां गच्छन् गुरुतल्पग उच्यते॥ शिश्नस्योत्कर्तनात्तत्र नान्यो दंडो विधीयते याज्ञवल्क्योऽपि॥ पितुः स्वसारं मा
॥६९॥ तुः स्वसारं मातुलानीं स्नुषामपि॥ मातुः सपत्नीं भगिनीमाचार्यतनयां तथा॥ आचार्यपत्नीं तनयां गच्छंस्तु गुरुतल्पगः
छित्त्वा लिंगं वधस्तस्य सकामायाः स्त्रिया अपि॥ अयं च दंडो न ब्राह्मणस्य॥ परदाराभिमर्शेतु प्रवृत्तं तु समहीप
तिः उद्वेजनकरैर्दंडैश्चिह्नयित्वा प्रवासयेत्॥ अब्राह्मणः संग्रहणे प्राणांतं वधमर्हतीति ब्राह्मणाधिकारे बृह
स्पतिवचनात्॥ शंखलिखितौ॥ येन येनांगेनापराधं करोति तत्तदस्य छेत्तव्यमन्यत्र ब्राह्मणात्॥ ब्राह्मणं दास्या
दिगमने दंडमाह॥ याज्ञवल्क्यः॥ अवरुद्धासु दासीषु भुजिष्यासु तथैव च॥ गम्यास्वपि पुमान् दाप्यः पंचाशत्
पणिकं दमं॥ अवरुद्धाः स्वामिना पुरुषांतरं प्रति गंतुं निषिद्धाः॥ नारदः॥ स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी
च॥ निष्कासिनी च या गम्यास्तु शास्तुलोम्येन स्त्रियो न प्रतिलोमतः॥ आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत्॥ अ
ब्राह्मणीति स्वैरिणीति स्वैरिणी विशेषणं॥ स्वैरिणी स्वतंत्रा पुंश्चली निष्कासिनी कुटुंबान्निर्गता॥ पुंश्चली॥ या राम:
ज्ञवल्क्यः॥ अंत्याभिगमने त्वंक्यः कबंधेन प्रवासयेत्॥ शूद्रस्तथांत्य एव स्यादंत्यस्यार्यागमे वधः॥ स्त्रीहते संग्रहणे ॥५५०॥

तस्या दंडमाह॥ गृहमागतया नार्या प्रलोभ्य स्पर्शनादिना॥ कामयेत्तत्र सा दंडं अन्नरस्यार्द्धं दमः स्मृतः॥ ब्राह्मण्
यादीनां शूद्रादिगमने दंडमाह॥ वृषलं सेवते या तु ब्राह्मणी मदमोहिता॥ ताम्वनिर्वादयेद्राजा संस्थाने वध
घातिनां॥ वैश्यं वा क्षत्रियं वापि ब्राह्मणी सेवते तु या॥ शिरसो मुंडनं तस्याः खरारोगर्दभेन तु॥ वृषलः शूद्रः॥ वध
तिनः सौनिकाः तेषां स्थानं इत्यर्थः॥ अयं च दंडोऽत्यासक्तावितिचंद्रिकायां॥ अभिचारनिश्चये पापमाह॥ याज्ञ
वल्क्यः॥ पुमान्संग्रहणे ग्राह्यः केशाकेशि परस्त्रिया॥ सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा॥ द्वयोरित्यनेनात्म
तरेण प्रतिपन्नेऽपि व्यभिचारे निश्चय॥ दूषणमाह याज्ञवल्क्यः॥ ज्ञातस्त्रीदूषणे दद्याद्धेतुमिथ्याभिशंसने पश्चन्ग
च्छन् शतं दाप्यो हीनां स्त्रीं चैवमधममति॥ तथा॥ अयोनौ गच्छतो योषां पुरीषं चाभिमेहतः चतुर्विंशतिको दंडस्त
था प्रव्रजितागमे॥ हीनां दुःखितां स्वपत्नीमपि॥ स्त्रीसंमुखं पुरीषादिकं कुर्वत इत्यर्थः॥ इति स्त्रीसंग्रहणं॥ अथ स्त्री
पुंधर्मः॥ आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं॥ त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः॥ स्त्रियं प्रत्या
हमरणव स्त्री निर्नष्टं वचः कार्यमेष धर्मः परस्त्रियाः॥ आज्ञाभंगेऽसत्प्रतिस्पर्धादि महापातकदूषिता॥ इति स्त्रीपुंधर्म

॥ ॥अथ द्यूतं॥ ॥याज्ञवल्क्यः॥ ॥प्राप्ते नृपतिना भागे प्रसिद्धे धूर्त्तमंडले॥ जितं ससभिके स्थाने दापयेदन्य
था न तु॥ प्रसिद्धे अप्रच्छिन्ने॥ धूर्तमंडले द्यूतस्थले॥ सभिको राज्ञा कृतो द्यूताध्यक्षः॥ एवं प्रकारेण जितं राजा दा
पयेन्नान्यथेत्यर्थः॥ द्यूते कपटकर्तुर्दंडमाह स एव॥ राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः॥ उपधिश्छलं
राजाज्ञे विद्यूते दंडमाह मनुः॥ द्यूतं समाह्वयं चैव यः कुर्यात्कारयेत वा। सर्वांस्तान्घातयेद्राजा शूद्रांश्च द्विजलिंगि
नः॥ द्विजलिंगमुपवीतवेदपाठादि॥ द्यूतधर्मं समाह्वये तिदिशति याज्ञवल्क्यः॥ एष एव विधिर्ज्ञेयः प्राणि
द्यूते समाह्वये॥ प्राणिद्यूतं समाह्वयं विशेषणं तदभिन्न इत्यर्थः॥ इति द्यूतं समाह्वयश्च॥ अथ प्रकीर्णकं
॥ ॥याज्ञवल्क्यः॥ ॥ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनं। पारदारिकचौरौ वा मुंचतो दंड उत्त
मः॥ अभक्ष्येण द्विजे दूष्य दंड्य उत्तमसाहसं। मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्धिकं। अभक्ष्यं सुरालशुनपुरी
षादि॥ स एव॥ कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी। अंगहीनश्च कर्तव्यो दाप्यश्चोत्तमसाहसं॥ वि राम:
मांसं गवादिमांसं॥ चराष्टेनां ग छेदमयीतितादृशायां शक्तो ह्यमोक्षयन्स्वामी दंष्ट्रिणां शृंगिणां तथा॥ प्रथ ॥५५१॥

मं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा॥ विक्रोशः आक्रंदनं मनुः॥ मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषं भवेत्॥ प्राणि
भृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु॥ क्षुद्रकाणां पशूनां तु हिंसने द्विशतो दमः॥ पंचाशत्तु भवेद्दंडः शुभेषु मृग
पक्षिषु॥ गर्दभाजाविकानां तु दंडः स्यात्पंचमाषकः॥ माषकस्तु भवेद्दंडः श्वसूकरनिपातने इति॥ अपंचेह तन्म
ल्पदानोत्तरबोध्यः॥ याज्ञवल्क्यः॥ जारं चौरेत्यभिवदन्दाप्यः पंचशतं दमं॥ उपजीव्य धनं मुंचंस्तदेवाष्टगुणी
कृतं॥ उपजीव्य गृहीत्वा॥ राज्ञो निष्टप्रवक्तारं तस्यैवाक्रोशकारिणं। तन्मंत्रस्य च भेत्तारं छित्वा जिह्वां प्रवासयेत्॥
अनिष्टं मरणादि आक्रोशो वास्तव राज्यभ्रंशो भवत्वित्यादि॥ मनुः॥ राज्ञः कोशापहर्तॄंश्च प्रतिकूले च वस्थितान्
घातयेद्विविधैर्दंडैः रीणां चोपजापकं॥ याज्ञवल्क्यः॥ मृतांगलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा। राजयानासनारो
ढुर्दंड उत्तमसाहसः॥ मृतांगलग्नं मृतकवस्त्रादि॥ स एव॥ द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा। विप्रत्वेन च शू
द्रस्य जीवतोष्टशतो दमः॥ नेत्रद्वयभेदिनः राजनिषिद्धकर्मकर्तुर्विप्रत्वाजीवितुश्शूद्रस्येत्यर्थः॥ श्राद्धभोजने तु य

ज्ञोपवीत धारयेत स्वर्णशलाकया यज्ञोपवीतवल्लेखा कार्येति मिताक्षरायां॥ व्यवहारान्यथाकारिणां दण्डमाह॥ स एव
दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु॥ सभ्याः सजयिनो दण्ड्या विवादाद् द्विगुणं दमं॥ यो मन्यताजितोस्मीति न्यायेनापि
पराजितः। तमायान्तं पुनर्जित्वा दापयेद् द्विगुणं दमं॥ अत्र सर्वत्रानुक्तसंख्यायां संख्या पणविषयिणी ज्ञेया॥ पणस्तु
कर्षोन्मितं ताम्रं कार्षिकं ताम्रं कार्षिकस्ताम्रिकः॥ कर्षपञ्चचतुर्थो वा॥ वराटकानां दशकद्वयं चत्वारः काकिणी
तास्च पणस्चतस्र इति भास्कराचार्योक्तस्च पणः॥ उत्तमसाहसादिकं तु साशीति पणसाहस्रो दण्ड उत्तमसाहसः॥
तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृत इति॥ तथापराधे शूकपतिमाणं दण्डैर्दमनात्सन्नवोधिकोपि दण्डः॥ यथा
हापस्तंबः दण्डो हि दमनादित्याहुस्तेनादान्तान्दमयेदिति॥ तथा सर्वस्वापहारदण्डे विशेषमाह नारदः॥ अत्र युधान्यायु
धान्युपधीनां वाह्यादीन्यास्यजीविनां वेश्यास्त्रीणामलंकारान्वाद्यातोद्यानि॥ यच्च यस्योपकरणं येन जीवन्ति
कारुकाः सर्वस्वहरणेप्येतन्न राजा हर्तुमर्हति॥ अमायया कृतातस्य दण्डस्य प्रतिपत्तिमाह याज्ञवल्क्यः॥ राज्ञा॥ राम:

न्यायेन यो दण्डो गृहीतो वरुणाय तं॥ निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं॥ त्रिंशद्गुणं देशेन संकल्प्य वि
प्रेभ्यो दद्यादित्यर्थः॥ ॥इति श्रीसेंगरवंशावतंसमहाराजाधिराजश्रीभगवंतदेवादिष्टश्रीजगद्गुरुभ
ट्टनारायणसूरिसूनुपण्डितशिरोरत्नमीमांसापारावारपारीणधुरीणनन्दपण्डिताकरसूनोर्नीलकण्ठस्य कृ
तौ भगवद्भास्करे व्यवहारमयूखः संपूर्णम्॥ मंगलं लेखकानां च पाठकानां च मंगलं॥ मंगलं सर्वलोकानां भू
मिभूपति मंगलं॥१॥ लेखकपाठकयोः शुभं भवतु॥ कल्याणमस्तु॥ ॥श्रीरस्तु॥ ॥श्रीरविर्जयति॥

व्य·मु·
॥५२॥

राम:
॥५५३॥